THE

BAUDHĀYANA ŚRAUTA SŪTRA

BELONGING TO THE

TAITTIRĪYA SAMHITĀ

14446

CENTRAL ARCHAEOLOGICAL LIBRARY
New Delhi

EDITED BY

DR. W. CALAND.

VOLUME I.

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
A384 V. 102
Library Regr No
INDIA.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.
1904.

TRAL ARCH
BRARY, NEW
No.... 14446
.... 10-5-1961
No. ... Sa2VS1/Ban/Cal

TO

MR. AUG. BARTH

THE GREAT SANSKRITIST OF FRANCE

THIS EDITION IS INSCRIBED

AS A TOKEN

OF RESPECT AND GRATITUDE

BY THE EDITOR.

ERRATA.

P.	xi.	l.	5.	r.	'The quotations.		
P.	xii.	l.	38.	r.	r.	i. s. o.	v.
P.	xii.	l.	42.	r.	not always.		
P.	44.	l.	3.	r.	सर्वं	i. s. o.	सर्वे
P.	129.	l.	18.	r.	॰वर्हिंषप॰		
P.	130.	n.	२.	r.	प्रच॰	i. s. o.	प्रचं
P.	145.	l.	10.	r.	प्रदक्षिणं	i. s. o.	प्रदक्षिणं
P.	168.	l.	5.	r.	वषट्कृत	i. s. o.	वषत्कृत
P.	176.	l.	18.	r.	चतुर्थी॰	i. s. o.	च तुर्थी॰
P.	187.	l.	11.	r.	प्राकृशो	i. s. o.	प्रकृशो
P.	190.	l.	11.	r.	तस्योदीचीं	i. s. o.	तस्योदीं
P.	204.	n.	२.	r.	TS. III. 5. 8. b.		
P.	218.	n.	१.	r.	r.	i. s. o.	y.
P.	223.	l.	8.	r.	द्विर्जुहोति		
P.	235.	n.	२	r.	अयोक्ता॰		

OFFICE ... DIRECTOR GENERAL OF ARCH...
Library ... 167 of 05

PREFACE.

For this editio princeps of the Baudhāyana S'rauta Sūtra the following MSS. have been used:

1. **B.** A modern copy in Devanāgarī writing made in 1868 by Vyaṅkājī Nārāyaṇa, containing, in eight parts, an almost complete text of our Sūtra. Copied for the Government of Bombay and registered as Class I. B. 5 (Elphinstone College), cp. the list published by Georg Bühler in the Journal of the German Oriental Society, Vol. XLII, p. 552. The MS. is carefully written on blue paper, 13 lines on a page, and, if I am not mistaken, in some places corrected and completed by the hand of Bühler. The text is on the whole correct, especially in the first nine praśnas. The later praśnas are also very carefully written, but copied from an original that must have been corrupted. The original of the later praśnas is probably a Grantha MS., as is shown by the nature of the clerical errors. The contents of this MS. are not those that have been given by Bühler in the Journal of the German Or. Soc., but:

(*a*) On 76 leaves the darśapūrṇamāsa, ādhāna, the daśādhyāyika, paśubandha, cāturmāsya and pravargya, together 2,500 granthas.

(*b*) On 112 leaves the agniṣṭoma, cayana, vājapeya, rājasūya and iṣṭikalpa, together 4,000 granthas.[1]

(*c*) On 22 leaves the aupānuvākya, 800 granthas.

(*d*) On 16 leaves the aśvamedha, 500 granthas.

(*e*) The uttarā tatih, on 61 leaves, together 3,000 granthas.

(*f*) On 22 leaves the last two dvaidha praśnas, 675 granthas.

(*g*) The prāyaścittasūtra on 21 leaves, containing 700 granthas.

(*h*) On 15 leaves part of a bhāṣya (by Sāyaṇa?) on the paśubandha; 500 granthas.

From this analysis it will be seen that this MS. is of the greatest value for the construction of the text of our Sūtra, as it enables us, with the aid of the other MSS., to reconstruct nearly the whole Sūtra.

2. **Be.** A collection of texts belonging to the Government Sanskrit College, at Benares, No 115 (cp. Sūcīpattram, page 70). It consists of 18 parts, written by different hands on paper in Devanāgarī.

(*a*) darśapūrṇamāsa, on 26 leaves, S'ake 1677.

(*b*) upavyāharaṇādhāne punarādhānādi hautrāntaṃ ca: the second and third praśnas, on 30 leaves; modern, well written.

---

[1] The part containing the vājapeya, rājasūya and iṣṭikalpa is called in this MS. in margin: एकपात्सून॰

(*c*) paśusūtra, on 16 leaves, by the same hand as (*a*), on the same kind of paper; Śake 1673.

(*d*) cāturmāsya, on 17 leaves, by the same hand as (*a*) and (*c*) and on the same kind of paper; Śake 1660.

(*e*) cayanasūtra, 22 leaves; Śake 1803.

(*f*) vājapeya, on 9 leaves, well written, no year, corrected.

(*g*) rajasūya, on 12 leaves, written by the same hand and on the same kind of paper as (*f*).

(*h*) iṣṭikalpa, on 14 leaves, Śake 1803; same hand and kind of paper as (*e*).

(*i*) aśvamedha, on 15 leaves, well written, apparently by the same hand as (*f*) and (*g*); corrected.

(*k*) dvādaśāha, on 16 leaves, corrected.

(*l*) mahāvrata, etc., called at the end: **एकारत्नौसूत्रं** on 17 leaves; the numbers of the khaṇḍas are corrected so as to continue the numbering of (*k*); apparently written, together with (*k*), by the same hand that wrote (*f*), (*g*), and (*i*); partly corrected.

(*m*) kāṭhakasūtra, on 8 leaves; same handwriting and paper as (*e*) and (*h*).

(*n*) uttarā tatiḥ, on 41 leaves, well written, but containing a very corrupted tradition, just as B; happily the greater part of this MS. has been carefully corrected. The khaṇḍa-numbers have been partly effaced.

(*o*) dvaidhasūtra, on 63 leaves, *śamaṃtaṃ* (sic) 1825. Rather badly written.

(*p*) first karmānta praśna, on 23 leaves, presents several lacunæ.

(*q*) second and third karmānta praśnas, on 38 leaves; the second praśna has been carefully corrected; the third is very corrupted and full of lacunæ.

(*r*) śulbasūtra, on 17 leaves.

(*s*) pravarasūtra, on 7 leaves, written by the same hand as (*e*).

This valuable collection will be seen to contain a nearly complete Baudhāyana Sūtra. Missing are the soma-, pravargya-, aupānuvakya-, and prāyaścitta praśnas. On every part the number of the praśna (here called adhyāya) is written; sometimes the number found in the original handwriting is corrected. This (secondary) numbering of Benares 115 agrees wholly with the numbering of the praśnas in B.

3. **H**, belonging to the Court and State Library at Munich, registered as: MS. Sanskrit Cod. 107 (No. 163 of the "Verzeichniss"). This MS. contains in Devanāgarī writing: darśapūrṇamāsa, ādhāna, the [illegible] paśubandha, cāturmāsya, agniṣṭoma, pravargya, cayana, vājapeya, the atirātra aptoryāma and ekādaśinī chapters, the kāṭhakasūtra, the sautrāmaṇī, the first two dvaidha praśnas, the karmāntasūtra, prāyaścitta, śulbasūtra, and finally the dharmasūtra. Some parts of this MS. are very badly written.

4. **J.** A copy of the MS. belonging to the Mahārāja of Jammu

and Kashmir, mentioned by M. A. Stein in his Catalogue of Sanskrit MSS. of His Highness the Mahārāja of Jammu and Kashmīr. The *original* MS. is written in Devanāgarī, has 135 leaves, 11 lines per leaf, the line 37 akṣaras; leaves 57-68 (the paśubandha) are wanting. This MS. contains the darśapūrṇamāsa, ādhāna, the daśādhyāyika, cāturmāsya, agniṣṭoma, and pravargya. Professor Hillebrandt of Breslau, for whom this copy was made, allowed me with the greatest generosity the use of this MS. At the end of the copy we find the following notice:—

संवत् १९५२ श्रीशाके १८१७ ईसासंवत् १८९६ माघशुक्लदशम्यां जन्वरीमासस्य पञ्चविंशे दिने श्रीमच्छ्रीडाक्तर् ओरिल् स्तैन साहिबाचार्याज्ञया तदाश्रितकाश्मीरिकपण्डितसहजभट्टेन जम्बूपुरीयरघुनाथमन्दिरस्य पुस्तकालयान्तर्वर्तिपुस्तकात्सप्तद्विचन्द्रपञ्च ५१२७ संख्यायुक्तादवतारितं बौधायनसूत्रपुस्तकमिदं शोधितं च मूलपुस्तकसादृश्येन यथामतीत्यलम् ॥

In the handwriting of Stein follow these lines: "Jammu MS. No. 5127 abgeschrieben in Srinagar von Paṇḍits Sahajabhaṭṭa und Nārāyaṇabhaṭṭa, zum zweiten Male collationirt von Paṇḍit Govind Kaul zu Lahore, 6-19 Febr. 1896. Das Original ist dem Papier und der Schrift nach zu urtheilen, etwa 150-200 Jahre alt. Schwer lesbare Stellen sind in der Abschrift durch eine Klammer bezeichnet. Abgesandt an Prof. Dr. A. Hillebrandt Breslau am 19. Februar 1896. (M. A. STEIN).

Although the MS. has been "corrected," the secunda manus proved to have no value and the prima manus to give generally the better reading.

5. **T.** A copy, in Grantha writing, apparently of the Tanjore MS., described by Burnell in his Classified Index of the Sanskrit MSS. in the Palace of Tanjore, page 18, No. 9147, leaves 180, written before 1700. For the use of this copy, too, I am greatly indebted to Professor Hillebrandt, for whom it was procured by Dr. Hultzsch. This MS. contains: darśapūrṇamāsa, ādhāna, the daśādhyāyika, paśubandha, cāturmāsya, pravargya *with* avāntaradīkṣā and the agniṣṭoma. On the whole, the text is preserved tolerably well in this MS., but the numbering of the khaṇḍas is wholly unreliable.

6. **F.** The Fleet MS., belonging to the India Office Library, described by Eggeling in his Catalogue under No. 3186; the copy is modern and the tradition preserved in it is the least good of all the Baudhāyana MSS., known to me.

7. **I.O.** The pravargyapraśna only, given by No. 3009, 1. of the MSS. Collection of the India Office, cp. Eggeling, Catalogue, Part I, 49.

8. **P.** The Paris MS. D 190. To Mr. Aug. Barth I am indebted for [illegible] of this MS.: "76 feuillets, 10 lignes par [illegible] ras à la ligne; écriture assez régulière d'aspect, mais peu soignée pourtant, et assez difficile à lire parceque les caractères sont menus et tracés avec un gros calame; ī et

ā, par exemple, sont rarement distingués et **pa** et **ya** ne le sont pas d'avantage; l'anusvāra se confond parfois avec l'e.—Des corrections faites, les unes dans la ligne, en surcharge, les autres à la marge, avec un crochet de renvoi, paraissent provenir en partie du scribe, mais sont dues le plus souvent à une autre main. *Celle-ci*, *ou une* troisième, a ajouté un grand nombre d'additions à la marge, en une écriture cursive et bacleé, très difficile à déchiffrer.—Les mantras sont presque toujours accentués à l'encre rouge.—Le texte est écrit, d'un bout à l'autre, sans alinéa, ni distinction en sūtras, *mais avec distinction* de paragraphes plus longs, qui sont chiffrés. Ces séries de paragraphes chiffrés sont au nombre de quatre; mais à la fin de la première seulement se trouve l'indication que la série correspond à un praśna.—Le 1° feuillet recto est en blanc, et porte le titre, d'une autre main que celle du scribe: **बौधायनीयमग्निष्टोमसूत्रमिदं** —This MS. contains the Somasūtra, the first praśna divided into 32, the second into 20, the third into 8, the fourth into 14 khaṇḍas; the pravargya (without the avāntaradīkṣā) consists of 17 khaṇḍas and closes with **सर्वसमन्विहकं वा** । To the greatest kindness of Mr. Aug. Barth I owe a collation of some doubtful or otherwise interesting passages.

9. **Be 11.** No. 11 of the collection of Sanskrit texts belonging to the Government Sanskrit College at Benares (see p. 73 of the Sūcīpattra), containing on 19 leaves the dvādaśāha, rājasūya, and vājapeya; dated Saṃ. 1877, Ś. 1742.

10. **Be 4.** No 4 of the same collection; 10 leaves; containing the iṣṭikalpa, written by the same scribe who wrote Nos. 9 and 11; on the last leaf the sahasrabhojanavidhi is added in the same writing.

11. **Be 7.** No 7 of the same collection (see Sūcīpattra, p. 71), gives on 34 leaves the uttarā tatiḥ, *viz.*, the same portion of our Sūtra as given by Be 1 *and* n. Well written, but preserving a very corrupted tradition.

12. **T.** A copy from No 3796 belonging to the collection of Sanskrit MSS. at *the Palace of Tanjore, containing the rājasūya* only.

13. **T.** A copy from No. 3798 belonging to the same collection containing the dvādaśāha.

14. **T.** A copy from No. 359 belonging to the same collection, containing the pravarakhaṇḍa. These three copies have been procured for me by Dr. Hultzsch.

15. **Brl.** No. xciii. of the Burnell collection preserved at the India Office in London. The pravarakhaṇḍa; cp. p. 35 of the Catalogue of a collection of Sanskrit MSS. by A. C. Burnell.

Other materials that have been used for the construction of parts of our text are:—

Bh. The vivaraṇa of Bhavasvāmin.

Keś. The prayogasāra of Keśavasvāmin.

Sāy. The commentary of Sāyaṇa on the darśapūrṇamāsa.

Somapray. The Baudhāyanasomaprayoga by Rudradatta. (I.O. 1262. 3. A).

Mādh. The 119 notations from Baudhāyana in Mādhava's commentary on the Taittirīya Saṃhitā.

Mantramālā. The collection of Mantras used at the agniṣṭoma, I. O No. 3009 (agniṣṭomamantramālā).

Śrautapadārtha. The śrautapadārthanirvacana by Nāgeśvara-Shāstrī Somaṇa, printed at Benares Saṃvat 1944.

Although the number of complete MSS. used for this edition is rather small, this circumstance is counterbalanced to a certain degree by the fact, that all the MSS., which contain the text of this first volume, are wholly independent of each other. The independence of the various textual traditions contained in them shows itself particularly in the numbering of the khaṇḍas and even partly of the praśnas, which in none of the MSS. is the same throughout. This fact increases not a little the difficulty of giving the right numbering. The division in adhyāyas, on the contrary, may be given with absolute security, at the hand of the Bhavasvāmin Vivaraṇa. The discrepancy of the khaṇḍa numbering might perhaps be explained from the fact that this division is obviously of later times. Bhavasvāmin knows no division in khaṇḍas; at least he does not mention it, just as Rudradatta in his commentary on Āpastamba does not reckon with kaṇḍikās, but only with paṭalas.

One of the greatest difficulties, if not the greatest of all, that presents itself to the Editor of the Baudhāyana Kalpasūtra, is the numbering and division of the praśnas. Even at the time of Bhavasvāmin there existed more than one system of counting and dividing the praśnas containing the agniṣṭoma ritual. Bhavasvāmin mentions a *threefold* numbering. *Firstly* he divides the agniṣṭoma portion into *five* praśnas, the first of which contains 10 adhyāyas (comprising the agniṣṭoma up to the prātaranuvāka and closing with the words राजानं गोपायन्ति); the second praśna comprises the prātaḥsavana (5 adhyāyas); the third comprises the mādhyandina savana (2 adhyāyas); the fourth comprises the tṛtīya savana (also 2 adhy.); the fifth comprises the yajñapuccha (also 2 adhyāyas). This number of five somapraśnas is also found in the Haug MS. *Secondly*, Bhavasvāmin knows a continuous numbering, according to which the whole agniṣṭoma consists of 21 adhyāyas. This system of numbering is also met with in the Haug MS., which gives no division in adhyāyas, but only in khaṇḍas, the numbers of the khaṇḍas being omitted towards the end. The *third* system of division known to Bhavasvāmin comprises two parts: (1) the first praśna containing 10 adhyāyas; and (2) a praśna containing 11 adhyāyas.

Now, as all the MSS. give different divisions, most of them not giving even any praśna numbers, I had to choose that division which seemed to be most in accordance with the rest of the work. The difficulties mentioned above become still more complicated by the question, where the pravargya is to be put in. Bhavasvāmin treats of it *before* the agniṣṭoma and the Bombay and Tanjore MSS. place it before; other MSS. (J, F, P, and the Benares MS. No. 63, mentioned Sūcipattra, page 70) give it *after* the agniṣṭoma. As the analogy of the other Sūtras and the contents of the pravargya section itself seem to point to placing this praśna *after* the soma praśnas, I have not followed in this respect the Vivaraṇa and the Bombay and Tanjore MSS. Another consideration seems to stand for this arrangement; there is more chance that the tradition of the pravargya section *became mutilated*, when it was put at the *close* of the agniṣṭoma as it is actually found in most of our MSS., than when it was handed down at the beginning As the cayana seems to be the 10th praśna, the vājapeya being the 11th (this number is given to the vājapeya in the Haug MS.), there is room left for only four praśnas between the cāturmāsya and the cayana praśnas Now, if the pravargya section is to be taken as one of these, then the soma proper cannot have contained more than *three* praśnas. The division adopted by me agrees, as to the 2nd and 3rd soma praśna, with the order given by F and by Keśavasvāmin in *his prayogasāra*, although in his numbering (according to the MS. of the India Office Library, at least) there are slight inaccuracies. A short note, communicated to me by Mr. A. Venis, found at the end of the agniṣṭoma MS. of the Benares Sanskrit College, gives as numbers of the praśnas (here called adhyāyas) of the agniṣṭoma portion, including the pravargya at the end, the numbers 6, 7, 8, 9, thus agreeing with the arrangement accepted by me. The separate pravargya MS. No. 50 of the same collection bears also the number 9.

The collection of various readings in this edition does not aim at being complete. Wherever the comparison of the Vivaraṇa and the evidence of corresponding passages make the reading evident, I omitted to give the varietas lectionum. The anunāsikā I put only before sibilants and before **v** and **h**, although the MSS. do not all agree in this respect. In accordance with the common use in the MSS., I omitted the visarga before the combination of sibilant with tenuis, although the MSS. are always consistent in this. The repetition of the words finishing an adhyāya and the anticipation of the words of the following khaṇḍa at the close of a khaṇḍa have not been taken into account, as these repetitions are only met with sporadically.

As the text of the Baudhāyana Sūtra has been handed down in sandhi form, without any trace of division into sūtras, I have not divided what the ancient Brāhmans had united, and not followed the example of other editors of ritualistic texts. I only separated the sentences, by placing a little stroke above the line, without being sure, however, to have given always the right interpunction.

The *first* volume of this edition of Baudhāyana is intended to comprise :—

1. The darśapūrṇamāsa.
2. The ādhāna.
3. The daśādhyāyika praśna.
4. The paśubandha.
5. The cāturmāsyas.
6. The agniṣṭoma, with pravargya and avāntaradīkṣā.

The *second* volume will, if the materials prove sufficient, contain the later praśnas from the cayana on, including the aśvamedha. The materials for the cayana, vājapeya, and rājasūya are sufficient.

A *third* volume would contain the so-called uttarā tatiḥ, perhaps the most interesting part of the whole Sūtra. I hope to be able to obtain enough MSS. to publish this text.

A *fourth* volume would comprehend the dvaidha, karmānta, and prāyaścitta praśnas.

In course of time I hope also to be able to publish the gṛhyasūtra, for which I have collected already sufficient materials. Of the pravara khaṇḍa four copies are in my possession. The very useful and instructing Vivaraṇa of Bhavasvāmin I also hope to edit, at the advice of Professor Hillebrandt of Breslau not, as I at first intended, in extracts, but the whole of it, as far as it is extant or accessible.

Whether the promises here given will be fulfilled, depends chiefly on the materials I can have access to. Therefore, if there are European or Indian Scholars and Paṇḍits, who might know of more MSS. containing text and commentary than those used by me, they will lay not only me, but also science under deep obligation by communicating to me what they know of them.

Finally, I have to express my thanks to the Trustees of the Libraries of the India Office and at Munich, who lent or caused Manuscripts to be lent to me, to Dr. Hultzsch, Government Epigraphist at Bangalore, who kindly provided me with copies of some parts of the work, to Mr. Albin Venis, Principal of the Government Sanskrit College at Benares, who kindly permitted me the use of the most valuable Benares MSS., to Mr. Aug. Barth, who collated the MS. P, and above all to Professor Hillebrandt, who in the most generous way permitted me the use of the copies originally procured for him by Dr. Hultzsch and Dr. Stein.

UTRECHT (HOLLAND),
BUYS BALLOTSTR. 17; *September*, 1903.

बौधायनश्रौतसूत्रम् ।

आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति । स पुरस्तादेव हविरातञ्चनमुपकल्पयत । एकाहेन वा द्व्यहेन वा यथर्त्विय वै ब्राह्मणं भवति दध्नातनक्ति सेन्द्रत्वायाग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्या इति । चन्द्रमसं वानिर्ज्ञाय संपूर्णं वा विज्ञायाग्नीनन्वादधाति । त्रीणि काष्ठानि गार्हपत्ये ऽभ्यादधाति त्रीण्यन्वाहार्यपचने त्रीण्याहवनीये । परिसमूहन्त्युपवसथस्य रूपं कुर्वन्त्यथास्य व्रतोपेतस्य पर्णशाखामाच्छैति[१] प्राङ्वोदङ्वा वाचंयमो यत्र वा वेत्स्यन्मन्यते । सा या प्राची वोदीची वा बहुपर्णा बहुशाखाप्रतिशुष्काग्रा भवति तामाच्छिनत्तीषे त्वोर्जे त्वेति । तया वत्सानपाकरोति वायव स्थोपायव स्थेत्यथैषां मातॄः प्रेरयति देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा व स्तेन ईशत माघशंसो रुद्रस्य हेतिः परि वो वृणक्त्विति । ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरिति

---

[१] Thus Koś. Sāy. Darśapūrṇ. prayoga by Veṅkateśvara (MS. Tübingen M.A. 1. 317) and Prayoga Burnell No. 52 (Grantha MS.); comp. आच्छायने of the Dvaidha Sūtra and Bh.; आकारः प्रमादपाठ इति केचित् . Most MSS. read आच्छेति or आच्छैति ; आच्छति B.

यजमानमीक्षते ˈ ऽथैतांꣳ शाखामग्रेणाहवनीयं पर्याहृत्य पूर्वया द्वारा प्रपाद्य जघनेन गार्हपत्यमग्निष्ठे ऽनस्युत्तरार्धे वाग्न्यगार[1]स्योद्गूहति यजमानस्य पशून्पाहीति नु यदि संनयति ˈ यद्यु वै न संनयति बर्हिः प्रतिपदेव भवति ˈ ॥ १ ॥ **प्रथमः** ॥

अथ जघनेन गार्हपत्यं तिष्ठन्नसिदं वाश्वपर्शुं[2] वादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्यादायाभिमन्त्रयते यज्ञस्य घोषदसीति ˈ गार्हपत्ये प्रतितपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इति त्रिर[3]थाहवनीयमभिप्रैति प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा त आवहन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमितीह बर्हिरासद इति वेदिं प्रत्यवेक्षते ˈ ऽथ तां दिशमेति यत्र बर्हिर्वेत्स्यन्मन्यते ˈ दर्भस्तम्बं परिगृह्णाति यावन्तमलं प्रस्तराय मन्यते देवानां परिषूतमसीत्यथैनमूर्ध्वमुन्मार्ष्टि वर्षवृद्धमसीत्यसिदेनोपयच्छति देवबर्हिर्मा त्वान्वङ्मा तिर्यक्पर्व ते राध्यासमित्याच्छिनत्त्याच्छेत्ता ते मा रिषमित्याच्छेदनान्यभिमृशति देवबर्हिः शतवल्शं विरोहेति ˈ सहस्रवल्शा वि वयꣳ रुहेमेत्यात्मानं प्रत्यभिमृशते ˈ सर्वश एवैनꣳ स्तम्बं लुनोति[4] ˈ कृत्वा प्रस्तरं निदधाति पृथिव्याः संपृचः पाहीति ˈ

---

[1] Thus HT Sāy. Keś.; वाग्न्यागार॰ the other MSS.

[2] Thus H Sāy. (sec. m.), the other MSS. परशुं

[3] त्रिः om. Be TF Sāy.; comp. III. 5.

[4] Thus Be BTH; लुनाति JF.

तूष्णीमत ऊर्ध्वमयुजो मुष्टींल्लुनोति[१] । त्रीन्वा पञ्च वा सप्त वा नव वैकादश वा यावतो वालं मन्यते । ऽथ त्रिरन्वाहितꣳ शुल्बं कलापसल्लैरावेष्टयत्यदित्यै रास्नासीति । तदुदीचीनाग्रं निधाय[२] । तस्मिन्प्रस्तरमभिसंभरति सुसंभृता त्वा संभरामीति । संनह्यतीन्द्राण्यै संनहनमिति । ग्रन्थिं करोति पूषा ते ग्रन्थिं ग्रथ्नात्विति । स ते मास्थादिति पश्चात्प्राञ्चमुपगूहत्यथैनदुद्यच्छत[३] इन्द्रस्य त्वा बाहुभ्यामुद्यच्छ इति । शीर्षन्नधिनिधत्ते बृहस्पतेर्मूर्ध्ना हरामीत्यैत्युर्वन्तरिक्षमन्विहीत्येत्योत्तरेण गार्हपत्यमनधः सादयति देवंगममसीति । तदुपरीव निदधाति यत्र शुष्कं मन्यते । तूष्णीं परिभोजनीयानि लुनोति[१] । सकृदाच्छिन्नं पितृभ्य आच्छिनत्त्यथ तथैव त्रिरन्वाहितꣳ शुल्बं कृत्वैकविꣳशतिदारुमिध्मꣳ संनह्यति यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन्। ततस्त्वामेकविꣳशतिधा संभरामि सुसंभृतेति । वेदं करोति वत्सज्ञुं पशुकामस्य मूतकार्यमन्नाद्यकामस्य त्रिवृतं तेजस्कामस्योर्ध्वाग्रꣳ स्वर्गकामस्य । वेदिं करोति प्रागुत्तरात्परिग्राहादथापराह्णे पिण्डपितृयज्ञेन चरति । ॥ २ ॥ द्वितीयः ॥

अथैतस्यै शाखायै पर्णानि प्रच्छिद्याग्रेण गार्हपत्यं निवपत्यथैनामधस्तात्परिवास्य जघनेन गार्हपत्यं स्थविमदुपवेषाय निदधात्यथास्याः प्रादेशमात्रं प्रमाय दर्भनाडीः प्रवेष्ट्य तस्मि-

---

[१] Thus Bo BTH ; लुनाति JF. [२] Thus Bo BTH ; निदधाति JF.

[३] Thus BH Sāy. ; अथैनमु॰ TFJ Bo.

वृक्षशाखापवित्रं करोति त्रिवृत्पलाशे दर्भ इयान् प्रादेशसंमितः। यज्ञे पवित्रं पोतृतमं पयो हव्यं करोतु म इत्यथ सायꣳ हुते ऽग्निहोत्र उत्तरेण गार्हपत्यं तृणानि सꣳस्तीर्य तेषु चतुष्टयꣳ सꣳसादयति दोहनं पवित्रꣳ सांनाय्यतपन्यौ स्थाल्यावित्यथैनान्यद्भिः[1] प्रोक्षति शुन्धध्वं दैव्याय कर्मणे देवयज्याया इति त्रिरथ जघनेन गार्हपत्यमुपविश्योपवेषेणोदीचो ऽङ्गारान्निरूहति मातरिश्वनो घर्मो ऽसीतिˈ तेषु सांनाय्यतपनीमधिश्रयति द्यौरसि पृथिव्यसि विश्वधाया असि परमेण धाम्ना दृꣳहस्व मा ह्वारितिˈ तस्यां प्राचीनाग्रꣳ शाखापवित्रं निदधाति वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमितिˈ तदन्वारभ्य वाचंयम आस्तेˈ ऽथ गा आयतीः प्रतीक्षत एता आचरन्ति मधुमद्दुहानाः प्रजावतीर्यशसो विश्वरूपाः। बह्वीर्भवन्तीरुपजायमाना इह व इन्द्रो रमयतु गाव इति महेन्द्र इति वा यदि महेन्द्रयाजी भवत्यथाहोपसृष्टां मे प्रब्रूतादित्युपसृष्टां प्राग्दोह्यमानामनुमन्त्रयते हुत स्तोको हुतो द्रप्सो ऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्यामित्यथ पुरस्तात्प्रत्यगानयन्तं पृच्छति कामधुक्ष इत्यमूमितीतरः प्रत्याहˈ तामनुमन्त्रयते सा विश्वायुरितिˈ द्वितीयमानयन्तं पृच्छति कामधुक्ष इत्यमूमित्येवेतरः प्रत्याहˈ तामनुमन्त्रयते सा विश्वव्यचा इतिˈ तृतीयमानयन्तं

---

[1] Thus Be TJ Sāy. Mādh.; अथैनान् BFH.

पृच्छति कामधुक्ष इत्य'मूमित्येवेतरः प्रत्याह ' तामनुमन्त्रयते सा विश्वकर्मेति ' तिसृषु दुग्धासु वाचं विसृजते बहु दुग्धीन्द्राय देवेभ्यो हव्यमाप्यायतां पुनः । वत्सेभ्यो मनुष्येभ्यः पुनर्दोहाय कल्पतामिति महेन्द्रायेति वा यदि महेन्द्रयाजी भवति ' विसृष्टवागन्वारभ्य तूष्णीमुत्तरा दोहयित्वा ' दोहने ऽप आनीय संक्षालनमानयति संपृच्यध्वमृतावरीरूर्मिणीर्मधुमत्तमा मन्द्रा धनस्य सातय इत्य'थैनत्प्रोदगुद्वास्य शीतीकृत्वा[1] तिरः पवित्रं दध्नातनक्ति सोमेन त्वातनच्मीन्द्राय दधीति महेन्द्रायेति वा यदि महेन्द्रयाजी भवति ' यावता मूर्च्छयिष्यन्मन्यते तावदानयत्य'ग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनुसंतनोमीत्य'थैनदुदन्वता कꣳसेन वा चमसेन वापिदधात्यदस्तमसि विष्णवे त्वा यज्ञायापिदधाम्यहम् । अद्भिररिक्तेन पात्रेण याः पूताः परिशेरत इति ' तदुपरीव निदधाति यत्र गुप्तं मन्यते विष्णो हव्यꣳ रक्षस्वेत्येतस्मिन्काले दर्भैः प्रातर्दोहाय वत्सानपाकरोति तूष्णीम् ' ॥ ३ ॥ तृतीयः ॥

अथ प्रातर्हुते ऽग्निहोत्रे हस्तौ संमृशते कर्मणे वां देवेभ्यः शकेयमिति ' नक्तं परिस्तीर्णा एवैते ऽग्नयो भवन्ति ' यद्यु वा अपरिस्तीर्णा भवन्त्याहवनीयमेवाग्रे पुरस्तात्परिस्तृणात्यथ दक्षिणतो ऽथ पश्चादथोत्तरत ' एवमेवान्वाहार्यपचनं परि-

---

[1] Thus TJH; शीतिकृत्वा BF, शांतिकृत्वा Bo.

स्तृणात्येवं गार्हपत्यमथाग्रेण गार्हपत्यं तृणानि सꣳस्तीर्य तेषु द्वन्द्वं न्यञ्चि यज्ञायुधानि सꣳसादयति ' स्फ्यं च कपालानि चाग्निहोत्रहवणीं च शूर्पं च कृष्णाजिनं च शम्यां चोलूखलं च मुसलं च दृषदं चोपलां च जुहूं चोपभृतं च स्रुवं च ध्रुवां च प्राशित्रहरणं चेडापात्रं च सेचनं च पिष्टोद्वपनीं च प्रणीताप्रणयनं चाज्यस्थालीं च वेदं च दारुपात्रीं च योक्त्रं च वेदपरिवासनं च धृष्टिं चेध्मप्रव्रश्चनं चान्वाहार्यस्थालीं च मदन्तीं च यानि चान्यानि पात्राणि तान्येवमेव द्वन्द्वꣳ सꣳसाद्य ' ब्रह्माणं दक्षिणत उपवेश्य ' पृष्ठ्याꣳ स्तृणाति संततां गार्हपत्यादाहवनीयाद्यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै स्तृणामि संतत्यै त्वा यज्ञस्य स्तृणामीत्यथ बर्हिषः पवित्रे कुरुते प्रादेशमात्रे समे अप्रतिच्छिन्नाग्रे अनखच्छिन्ने दर्भौ प्राणापानौ यज्ञस्याङ्गानि सर्वशः । आप्याययन्तौ संचरतां पवित्रे हव्यशोधने इत्येने अद्भिरनुमार्ष्टि पवित्रे स्थो वैष्णवी स्थो यज्ञिये स्थो वायुपूते स्थो विष्णोर्मनसा पूते स्थो यज्ञस्य पवने स्थ इत्यथोत्तरेण गार्हपत्यमुपविश्य कꣳसं वा चमसं वा प्रणीताप्रणयनं याचति ' तस्मिꣳस्तिरः पवित्रमप आनयन्नाह ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेति ' प्रसूतः समं प्राणैर्धारयमाणो ऽविषिञ्चन्नुत्तरेणाहवनीयं दर्भेषु सादयित्वा दर्भैः प्रच्छाद्य ' [पवित्रमादाय][१] प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्यादत्ते दक्षिणेनाग्निहोत्रहवणीꣳ सव्येन शूर्पं वेषाय

---

[१] om. Be BT Sāy.

त्वेति । गार्हपत्ये प्रतितपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इति त्रिरथ[1] जघनेन गार्हपत्यमग्निष्ठमनो भवति । तस्योत्तरां धुरमभिमृशति धूरसि धूर्व धूर्वन्तं धूर्व तं यो ऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वाम इत्यनो ऽभिमन्त्रयते त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वारिति । ॥ ४ ॥

अथ विष्णोः क्रमो ऽसीति दक्षिणमक्षपालिं क्रमित्वाभ्यारुह्य प्रउगे शूर्पं निदधाति[2] । शूर्पे स्रुचं स्रुचि पवित्रे । अथ पुरोडाशीयान्प्रेक्षते मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिꣳसिषमित्युरु वातायेति तृणं वा किꣳशारु वा निरस्यत्यथाप उपस्पृश्य दशहोतारं व्याख्याय हविर्निर्वप्स्यामीति यजमानमामन्त्र्य पवित्रवत्याग्निहोत्रहवण्या निर्वपति । यद्यु वै नानो भवति[3] जघनेन गार्हपत्यꣳ स्फ्यं निदधाति स्फ्योपरि पात्रीं पात्र्यां पुरोडाशीयानावपत्यथ पूर्वार्धे पात्र्या अभिमृशति धूरसि धूर्व धूर्वन्तं धूर्व तं यो ऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वारित्यथ पुरोडाशीयान्प्रेक्षते मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिꣳसिषमित्युरु वातायेति तृणं वा किꣳशारु वा निरस्यत्यथाप उपस्पृश्य दशहोतारं व्याख्याय हविर्निर्वप्स्यामीति यजमानमामन्त्र्य पवित्रवत्याग्निहोत्रहवण्या

---

[1] त्रिः om. Bo T Sāy.

[2] निधाय JF.

[3] भवत्यथ BH.

निर्वपत्यों निर्वपेति यजमानो ऽनुजानात्यथ निर्वपति । देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति त्रिरेतेन यजुषा । सकृत्तूष्णीमेतामेव प्रतिपदं कृत्वाग्नीषोमाभ्यामिति पौर्णमास्यामिन्द्राय वैमृधायेति वैन्द्राग्निभ्यामित्यमावास्यायामसंनयत इन्द्रायेति संनयतो महेन्द्रायेति वा यदि महेन्द्रयाजी भवत्यथ निरुप्तानभिमृशतीदं देवानामितीदमु नः सहेति ये ऽतिशिष्टा भवन्ति । [1]स्फात्यै त्वा नारात्या इत्यथाहवनीयमीक्षते सुवरभिविख्येषं वैश्वानरं ज्योतिरित्यथ गृहानन्वीक्षते दृꣳहन्तां दुर्या द्यावापृथिव्योरित्यथैनानादायोपोत्तिष्ठत्युर्वन्तरिक्षमन्विहीत्यथोत्तरेण गार्हपत्यमुपसादयत्यदित्यास्त्वोपस्थे सादयामीति । गार्हपत्यमभिमन्त्रयते ऽग्ने हव्यꣳ रक्षस्वेति । ॥ ५ ॥ चतुर्थः ॥

अथैतस्यामेव स्रुचि तिरः पवित्रमप आनीयोदीचीनाग्राभ्यां पवित्राभ्यां त्रिरुत्पुनाति देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति पच्छो । ऽथैना उन्मथयन्नुपोत्तिष्ठत्यापो देवीरग्रेपुवो अग्रेगुवो ऽग्र इमं यज्ञं नयताग्रे यज्ञपतिं धत्त युष्मानिन्द्रो ऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्य इत्यद्भिरेवापः प्रोक्षति प्रोक्षिता स्थ प्रोक्षिता स्थेति त्रिरथ पुरोडाशीयान्प्रोक्षति देवस्य त्वा सवितुः प्रसवे

---

[1] Be J insert before स्फात्यै the words: तानावपति, F तानावपत्यौकरोति; BHT and Sāy. omit these words, comp. Sāyaṇa's remark: अस्य मन्त्रस्य विनियोगो ऽनाकृतो ऽपि आवपनार्थे द्वैधीत्ताकर्मणि ... गम्यते ।

ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्याममुष्मा अमुष्मा इति यथादेवतं त्रिरुत्तानानि पात्राणि कृत्वा प्रोक्षति शुन्धध्वं दैव्याय कर्मणे देवयज्याया इति त्रिरतिशिष्टाः प्रोक्षणीर्निधाय । कृष्णाजिनमवधूनोत्यूर्ध्वग्रीवमुदङ्गावृत्यावधूतꣳ रक्षो ऽवधूता अरातय इति त्रिरथैनत्पुरस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृणात्यदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्त्विति । तस्मिन्नुलूखलमध्यूहत्यधिषवणमसि वानस्पत्यं प्रति त्वादित्यास्त्वग्वेत्त्विति । तस्मिन् पुरोडाशीयानावपत्यग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामीति । मुसलमवदधात्यद्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्यꣳ सुशमि शमिष्वेत्यथ हविष्कृतमाह्वयति हविष्कृदेहि हविष्कृदेहीति त्रिर् । [उच्चैः समाहन्तवा इति च][1] अथ दृषदुपले दृषारवेणोच्चैः समाहन्तीषमावदोर्जमावद द्युमद्वदत वयꣳ संघातं जेष्मेत्यवहत्योत्तुषान् कृत्वोत्तरतः शूर्पमुपयच्छति वर्षवृद्धमसीति । तस्मिन् पुरोडाशीयानुद्वपति प्रति त्वा वर्षवृद्धं वेत्त्वित्यथोदङ् पर्यावृत्य परापुनाति परापूतꣳ रक्षः परापूता अरातय इति । सव्येन तुषानुपहत्येमां दिशं निरस्यति रक्षसां भागो ऽसीत्यथाप उपस्पृश्य विविनक्ति वायुर्वो विविनक्त्विति । पात्र्यां तण्डुलान् प्रस्कन्दयति देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वित्यवहन्त्यै प्रयच्छन्नाह त्रिष्फलीकर्तवै त्रिष्फलीकृतान्मे

---

[1] om. Be FJT Sāy.

प्रब्रूतादिति । त्रिष्फलीकृतान् प्राञ्चस्त्रिष्फलीक्रियमाणानां यो न्यङ्गो अवशिष्यते। रक्षसां भागधेयमापस्तत्प्रवहतादित इति तण्डुलप्रक्षालनमन्तर्वेदि निनयत्युत्करदेशे वै तस्मिन् काले प्रातर्दोहं धेनूर्दोहयत्युदगग्रेण पवित्रेण । नात्रातनक्ति । ॥ ६ ॥

पञ्चमः ॥

अथ प्रोक्षितेषु त्रिष्फलीकृतेषु तथैव कृष्णाजिनमवधूनोत्यूर्ध्वग्रीवमुदङ्ङावृत्यावधूतꣳ रक्षो ऽवधूता अरातय इति त्रिरथैनत्पुरस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृणात्यदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्त्विति । तस्मिन्नुदीचीनकुम्बाꣳ शम्यां निदधाति दिव स्कम्भनिरसि प्रति त्वादित्यास्त्वग्वेत्त्विति । तस्यां प्राचीं दृषदमध्यूहति धिषणासि पर्वत्या प्रति त्वा दिव स्कम्भनिर्वेत्त्विति । दृषद्युपलामध्यूहति धिषणासि पार्वतेयी प्रति त्वा पर्वतिर्वेत्त्विति । तस्यां पुरोडाशीयानधिवपति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टमधिवपाम्यग्नीषोमाभ्याममुष्मा अमुष्मा इति यथादेवतम[1]धिवदते[2] धान्यमसि धिनुहि देवान्धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञनियमिति । पिꣳषति प्राणाय त्वापानाय त्वा व्यानाय त्वेति । बाह्य अन्ववेक्षते दीर्घामनु प्रसितिमायुषे धामिति । कृष्णाजिने पिष्टानि प्रस्कन्दयति देवो वः सविता हिरण्य-

---

[1] यथादैवत॰ most MSS.

[2] Thus HB and Sāyaṇa, who comments: अधिवाप्य जपति; अधिवदती T, अधिवपते J, अधिवपतेऽभिमृश्य जपति Be Keś.; अभिमृश्य जपति F.

पाणिः प्रतिगृह्णात्विति ' हविःपेष्यै प्रयच्छन्नाहासंवपन्ती पिꣳषाणूनि कुरुतादिति ' पिꣳषन्ति[1] पुरोडाशीयानि चरव्यान्दधति ' यदि चरुं करिष्यन्भवति प्रागधिवपनाच्चरुपुरोडाशीयान्विभजेरन् ' ॥ ७ ॥ षष्ठः ॥

अथैतानि कपालानि प्रक्षालितानि जघनेन गार्हपत्यमुपसादयत्यष्टौ दक्षिणत एकादशोत्तरतो ' ऽथ जघनेन गार्हपत्यमुपविश्य धृष्टिमादत्ते धृष्टिरसि ब्रह्म यच्छेति ' गार्हपत्यमभिमन्त्रयते ऽपाग्ने ऽग्निमामादं जहीति ' निष्क्रव्यादꣳ सेधेति दक्षिणाङ्गारं निरस्यत्यथान्यमावर्तयत्या देवयजं वहेति ' तं दक्षिणेषां कपालानां मध्यमेनाभ्युपदधाति ध्रुवमसि पृथिवीं दृꣳहायुर्दृꣳह प्रजां दृꣳह सजातानस्मै यजमानाय पर्यूहेत्यङ्गारमधिवर्तयति निर्दग्धꣳ रक्षो निर्दग्धा अरातय इत्यथ पूर्वार्ध्यमुपदधाति धर्त्रमस्यन्तरिक्षं दृꣳह प्राणं दृꣳहापानं दृꣳह सजातानस्मै यजमानाय पर्यूहेत्यथापरार्ध्यमुपदधाति धरुणमसि दिवं दृꣳह चक्षुर्दृꣳह श्रोत्रं दृꣳह सजातानस्मै यजमानाय पर्यूहेत्यथ दक्षिणार्ध्यमुपदधाति धर्मासि दिशो दृꣳह योनिं दृꣳह प्रजां दृꣳह सजातानस्मै यजमानाय पर्यूहेत्यथ पूर्वमुपधिमुपदधाति चित स्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूहेत्यथापरमेवमेव[2] ' द्वे उत्तरतः

---

[1] Thus only Bh., Sāy., Keś.; T पिंचन्ति, the other MSS. पिꣳषति।

[2] Thus H Sāy.; एवमेवं F; एवं J; एव Bc BT.

सꣳस्पृष्टे उपदधाति चित स्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूहेत्यथैनान्यङ्गारैरधिवासयति भृगूणामङ्गिरसां तपसा तप्यध्वमित्यथैनानि योगेन युनक्ति यानि घर्मे कपालान्युपचिन्वन्ति वेधसः । पूष्णस्तान्यपि व्रत इन्द्रवायू युङ्क्तामित्येवमेवोत्तराणि कपालान्युपदधात्यभीन्धते कपालान्युपेन्धते सहस्रालीमध्यस्यन्ति[१] श्रपणानि । तपन्ति पिष्टसंयवनीया आपः । ॥ ८ ॥ सप्तमः ॥

अथोत्तरेण गार्हपत्यमुपविश्य वाचंयमस्तिरः पवित्रं पात्र्यां कृष्णाजिनात्पिष्टानि संवपति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टꣳ संवपाम्यग्नीषोमाभ्याममुष्मा अमुष्मा इति यथादेवतमथ परिकर्मिणमाहाहराप आनयेत्याहरति प्रैषकारः प्रणीताभ्यः स्रुवेणोपहत्य वेदेनोपयम्य पाणिं वान्तर्धायैवं मदन्तीभ्यस्ता उभयीरानीयमानाः प्रतिमन्त्रयते समापो अद्भिरग्मत समोषधयो रसेन सꣳ रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृज्यध्वमित्यथातुपरिप्लावयत्यद्भ्यः परि प्रजाता स्थ समद्भिः पृच्यध्वमिति । संयौति जनयत्यै त्वा संयौमीति । संयुत्य व्यूह्याभिमृशत्यग्नये त्वाग्नीषोमाभ्याममुष्मा अमुष्मा इति यथादेवतं । पिण्डं करोति मखस्य शिरो ऽसीति । तं दक्षिणेषां कपालानां प्रत्यूह्याङ्गाराꣳस्तेष्वधिपृणक्ति घर्मो ऽसि विश्वायुरिति । प्रथयत्युरु प्रथस्वोरु ते

---

[१] Thus Be J Sāy. The other MSS. more or less corrupt.

यज्ञपतिः प्रथतामिति ˈ तं तन्वन्तं कूर्मप्रकारं करोति ˈ सर्वाणि कपालान्यभिप्रथयतीति ब्राह्मणम् ˈ ॥ ९ ॥

अथ तिरः पवित्रमाज्यस्थाल्यामाज्यं निर्वपति महीनां पयो ऽस्योषधीनाꣳ रसस्तस्य ते ऽक्षीयमाणस्य निर्वपामि देवयज्याया इत्यˈथोत्तरतो भस्ममिश्रानङ्गारान्निरूह्य तेष्वधिश्रयत्येवमेवोत्तरं पुरोडाशमधिवृणक्त्यˈथ शृतमथ दृष्ट्वाˈथ पात्र्यामप आनीय दक्षिणस्य पुरोडाशस्य त्वचं ग्राहयति त्वचं गृह्णीष्व त्वचं गृह्णीष्वेति त्रिरˈथोत्तरस्याˈथ पर्यग्नि करोत्यन्तरितꣳ रक्षो ऽन्तरिता अरातय इति त्रिरˈथ दक्षिणं पुरोडाशꣳ श्रपयति देवस्त्वा सविता श्रपयतु वर्षिष्ठे अधि नाके ऽग्निस्ते तनुवं माति धागिति ˈ गार्हपत्यमभिमन्त्रयते ऽग्ने हव्यꣳ रक्षस्वेत्येवमेवोत्तरं पुरोडाशꣳ श्रपयत्यˈथ दक्षिणं पुरोडाशं भस्मनाभिवास्य वेदेनाभिवासयति सं ब्रह्मणा पृच्यस्व सं ब्रह्मणा पृच्यस्वेति त्रिरˈथोत्तरमˈविदहन्त[1] श्रपयतेति वाचं विसृजते ˈ ऽथैतत्पात्रीसंक्षालनं गार्हपत्यादङ्गारेणाभितप्य हुत्वान्तर्वेदि प्रतीचीनं तिसृषु लेखासु निनयत्येकताय स्वाहा द्विताय स्वाहा त्रिताय स्वाहेत्यˈथ वेदमादत्ते ऽयं वेदः पृथिवीमन्वविन्दद्गुहा सतीं गहने गह्वरेषु। स विन्दतु यजमानाय लोकमच्छिद्रं यज्ञं भूरिकर्मा करोत्विति ˈ वेदेन वेदिं त्रिः संमार्ष्टि वेदेन वेदिं विविदुः पृथिवीꣳ सा पप्रथे

---

[1] The visarga omitted by Be BTF, written by JH.

पृथिवी पार्थिवानि। गर्भं बिभर्ति भुवनेष्वन्तस्ततो यज्ञो जायते विश्वदानिरिति ' ॥ १० ॥ **अष्टमः** ॥

अथ जघनेन वेद्यै तिष्ठन्स्फ्यमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद इत्यादायाभिमन्त्रयत इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा इत्यथैनं बर्हिषा सꣳश्यति[१] वायुरसि तिग्मतेजाः शतभृष्टिरसि वानस्पत्यो द्विषतो वध इत्यथान्तर्वेद्युदीचीनाग्रं बर्हिर्निदधाति पृथिव्यै वर्मासि वर्म यजमानाय भवेति ' तस्मिꣳस्फ्येन प्रहरति पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषमित्यपहतो ऽररुः पृथिव्या इत्यादत्ते ' व्रजं गच्छ गोस्थानमिति हरति ' वेदिं प्रत्यवेक्षते वर्षतु ते द्यौरिति ' हत्वोत्करे निवपति बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति ' द्वितीयं प्रहरति पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषमित्यपहतो ऽररुः पृथिव्यै देवयजन्या इत्यादत्ते ' व्रजं गच्छ गोस्थानमिति हरति ' वेदिं प्रत्यवेक्षते वर्षतु ते द्यौरिति ' हत्वोत्करे निवपति बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति ' तृतीयं प्रहरति पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषमित्यपहतो ऽररुः पृथिव्या अदेवयजन इत्यादत्ते ' व्रजं गच्छ गोस्थानमिति हरति ' वेदिं

---

[१] Thus BJT Sāy., संश्यति F, सꣳस्पृशति Mādh.; सꣳस्पृश्यति Bo.

प्रत्यवेक्षते वर्षतु ते द्यौरिति । उत्करे निवपति बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगरक्षो दिवं मा स्कानित्यचानुवर्तयति[१] । तूष्णीं चतुर्थꣳ हरति सह बर्हिषाथ पूर्वं परिग्राहं परिगृह्णाति वसवस्त्वा परिगृह्णन्तु गायत्रेण छन्दसेति दक्षिणतो रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन छन्दसेति पश्चादादित्यास्त्वा परिगृह्णन्तु जागतेन छन्दसेत्युत्तरतो । ऽथ करणं जपतीमां नराः कृणुत वेदिमेत्य वसुमतीꣳ रुद्रवतीमादित्यवतीं वर्ष्मन्दिवो नाभा पृथिव्या यथायं यजमानो न रिष्येदित्यथ प्राचीꣳ स्फ्येन वेदिमुद्धन्ति देवस्य सवितुः सवे कर्म कृण्वन्ति वेधस इत्यथाग्नीध्रमाहाग्नीदितस्त्रिर्हरेति । ततस्त्रिराग्नीध्रो हरति । यदाग्नीध्रस्त्रिर्हरत्यथ संप्रेषमाह ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामीति । प्रसूत उत्तरं परिग्राहं परिगृह्णात्यृतमसीति दक्षिणत ऋतसदनमसीति पश्चादृतश्रीरसीत्युत्तरतो । ऽथ प्रतीचीꣳ[२] स्फ्येन वेदिं योयुप्यते धा असि स्वधा अस्युर्वी चासि वस्वी चासि पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीरदातुर्यामैरयञ्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदृश्य यजन्त इत्यथान्तर्वेदि तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रेषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि पत्नीꣳ संनह्याज्येनोदेहीत्याहरन्त्येताः

---

[१] श्चानुवर्तते BH; T omits these two words.

[२] Thus HBT Sāy. Mādh., प्राचीꣳ FJ.

प्रोक्षणीरभिपूर्य ' दक्षिणेनाध्वर्युस्ता[1] स्फ्य उपनिनीय स्फ्यस्य वर्त्मन्सादयत्यथोत्करे स्फ्यं निहन्ति यो मा हृदा मनसा यश्च वाचा यो ब्रह्मणा कर्मणा द्वेष्टि देवाः। यः श्रुतेन हृदयेनेष्णता च तस्येन्द्रवज्रेण शिरश्छिनद्मीति ' हस्तौ प्रक्षाल्य स्फ्यं च प्रक्षालयत्युपसादयत्येतदिध्माबर्हिर्दक्षिणमिध्ममुत्तरं बर्हिः ' ॥ ११ ॥ नवमः ॥

अथैताः स्रुचः समादत्ते दक्षिणेन स्रुवं जुहूपभृतौ सव्येन ध्रुवां प्राशित्रहरणं वेदपरिवासनानीति ' गार्हपत्ये प्रतितपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयोऽग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामीत्यथ स्रुवꣳ संमार्ष्टि गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳ संमार्ज्मीति ' त्रिरन्तरतस्त्रिर्बाह्यतस्त्रिरेवं[2] मूलैर्दण्डꣳ संमृज्याद्भिः सꣳस्पर्श्य[3] प्रतितप्योत्प्रयच्छत्यथ जुहूꣳ संमार्ष्टि वाचं प्राणं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ संमार्ज्मीति ' तथैव संमृज्याद्भिः सꣳस्पर्श्य प्रतितप्योत्प्रयच्छत्यथोपभृतꣳ संमार्ष्टि चक्षुः श्रोत्रं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ संमार्ज्मीति ' तथैव संमृज्याद्भिः सꣳस्पर्श्य प्रतितप्योत्प्रयच्छत्यथ ध्रुवाꣳ संमार्ष्टि प्रजां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ संमार्ज्मीति ' तथैव संमृज्याद्भिः संस्पर्श्य प्रतितप्योत्प्रयच्छत्यथ प्राशित्रहरणꣳ संमार्ष्टि रूपं वर्णं पशुभ्यो मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳ संमार्ज्मीति '

---

[1] अध्वर्युस्ता JF Sāy., अध्वर्युः ताः Be, अध्वर्युं ता HBT.

[2] Thus BJ Sāy.; एव HFT Be.

[3] Here and further on the MSS. have °स्पर्शे and °स्पृश्य।

तथैव संमृज्याद्भिः सꣳस्पर्श्य प्रतितप्योत्प्रयच्छत्यथैतानि स्रुक्संमार्जनान्यद्भिः सꣳस्पर्श्य गार्हपत्येऽनुप्रहरति दिवः शिल्पमवततं पृथिव्याः ककुभिः श्रितं तेन वयꣳ सहस्रवल्शेन सपत्नं नाशयामसि स्वाहेत्यथापेणोत्करं तृणानि सꣳस्तीर्य तेषु स्रुचः सादयित्वाथैतां पत्नीमन्तरेण वेद्युत्करौ प्रपाद्य जघनेन दक्षिणेन गार्हपत्यमुदीचीमुपवेश्य योक्त्रेण संनह्यत्याशासाना सौमनसं प्रजाꣳ सौभाग्यं तनूमग्नेरनुव्रता भूत्वा संनह्ये सुकृताय कमिति । [अथैनां वाचयति युक्तं क्रियाता आशीः कामे युज्याता इति][१] । अथैनां तिरः पवित्रमप आचामयति पयस्वतीरोषधयः पयस्वद्वीरुधां पयः । अपां पयसो यत्पयस्तेन मामिन्द्र सꣳसृजेत्यथैनां गार्हपत्ये समिध आधापयत्यग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताꣳ स्वाहा वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताꣳ स्वाहेत्यथ जघनेन गार्हपत्यमुपसीदति सुप्रजसस्त्वा वयꣳ सुपत्नीरुपसेदिम । अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् ॥ इन्द्राणीवाविधवा भूयासमदितिरिव सुपुत्रा । अस्थूरि त्वा गार्हपत्योपनिषदे सुप्रजास्त्वाय ॥ मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् । उताहमस्मि संजया पत्युर्मे श्लोक उत्तम इति । [अथैनां

---

[१] The passage enclosed in brackets is only found in BF; Sāyaṇa remarks about it: अत्र सुकृताय कमित्यस्यानन्तरं युक्तं... युज्याता इत्यस्यापि पत्न्या वाचनं ब्राह्मणप्रमाणकम् ।

वाचयत्यूने ऽतिरिक्तं धीयाता इति च][1] । अथैनां गार्हपत्य-
मीक्षयत्यग्ने गृहपत उप मा ह्वयस्व देवानां पत्नीरुप मा
ह्वयध्वं पत्नि पत्न्येष ते लोको नमस्ते अस्तु मा मा हिꣳ-
सीरित्यथैनामाज्यमवेक्षयति महीनां पयो ऽस्योषधीनाꣳ रसो
ऽदब्धेन त्वा चक्षुषावेक्षे सुप्रजास्त्वायेत्यथैनद्गार्हपत्ये ऽधिश्रयति ५
तेजो ऽसीति । समिधमुपयत्य प्राङ् हरति तेजो ऽनु प्रेहीत्यथैन-
दाहवनीये ऽधिश्रयत्यग्निस्ते तेजो मा विनैदित्यथैताꣳ समिधं
मध्यत आहवनीयस्याभ्यादधाति [स्वाहेति][2] । अथैनदग्रेण
प्रोक्षणीः पर्याहृत्य दक्षिणार्धे वेद्यै निधाय यजमानमाज्य-
मवेक्षयति निमील्यावेक्षेतेति[3] ब्राह्मणमथैनद्यथाहृतं प्रति- १०
पर्याहृत्योत्तरार्धे[4] वेद्यै निधायाध्वर्युरवेक्षते ऽग्नेर्जिह्वासि सुभू-
र्देवानां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भवेत्यथैनदुदीचीना-
ग्राभ्यां पवित्राभ्यां पुनराहारं त्रिरुत्पुनाति शुक्रमसि ज्योति-
रसि तेजो ऽसीत्यथ प्रोक्षणीरुत्पुनाति देवो वः सवितोत्पुना-
त्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति पञ्चः । १५
प्रोक्षणीषु पवित्रे अवधायादत्ते दक्षिणेन स्रुवं सव्येन जुहूं

---

[1] The sentence enclosed in brackets is found in EJ Bo and B (here however without अथैनां वाचयति), omitted by TH Sāy., cp. Sāyaṇa's remark: अत्रापि ऊनेतिरिक्तं धीयाता इत्यन्तो जपः पूर्ववत्प्रमाणकः गोपालस्य ।

[2] Be TB Sāy. om.

[3] Thus only H Sāy. ; the other MSS., are here corrupt.

[4] प्रति om. Be BJ, read by TFH Sāy., Mādh.

वेदे प्रतिष्ठाप्य तस्यां गृह्णीते शुक्रं त्वा शुक्रायां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामीत्येतेन यजुषा चतुर्गृहीतं गृहीत्वा संमृश्योत्प्रयच्छत्यथोपभृति गृह्णीते ज्योतिस्त्वा ज्योतिषि धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामीत्येतेन यजुषाष्टगृहीतं गृहीत्वा भूयसो ग्रहान्गृह्णानः कनीय आज्यं गृह्णीते । तथैव संमृश्योत्प्रयच्छत्यथ ध्रुवायां गृह्णीतेऽर्चिस्त्वार्चिषि धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामीत्येतेन यजुषा चतुर्गृहीतं गृहीत्वाभिपूर्यं तथैव संमृश्योत्प्रयच्छति । ॥ १२ ॥ दशमः ॥

अथैतामाज्यस्थालीꣳ सस्रुवां जघनेन वेद्यै निधाय प्रोक्षणीरुन्महयन्नुपोत्तिष्ठत्यापो देवीरग्रेपुवो अग्रेगुवो ऽग्र इमं यज्ञं नयताग्रे यज्ञपतिं धत्त युष्मानिन्द्रो ऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्य इत्यद्भिरेवापः प्रोक्षति प्रोक्षिता स्थ प्रोक्षिता स्थेति त्रिरथैध्मं विस्रस्य प्रोक्षति कृष्णो ऽस्याखरेष्ठो ऽग्नये त्वा स्वाहेति । वेदिं प्रोक्षति वेदिरसि बर्हिषे त्वा स्वाहेति । बर्हिः प्रोक्षति बर्हिरसि स्रुग्भ्यस्त्वा स्वाहेत्याहरन्त्येतद्बर्हिरन्तरेण प्रणीताश्चाहवनीयं च । तदन्तर्वेदि पुरोग्रन्थ्यासाद्य प्रोक्षति दिवे त्वेत्यग्राण्यन्तरिक्षाय त्वेति मध्यानि पृथिव्यै त्वेति मूलानि । [1]सह स्रुचा पुरस्तात्प्रत्यञ्चं ग्रन्थिं प्रत्युक्ष्यातिशिष्टाः प्रोक्षणीर्निनयति दक्षिणायै श्रोणेरोत्तरायै श्रोणेः स्वधा पितृभ्य ऊर्ग्भव बर्हिषद्भ्य ऊर्जा पृथिवीं गच्छतेत्युदूह्य प्रोक्षणीधानं बर्हिर्विस्रस्य पुरस्तात्प्रस्तरं गृह्णाति विष्णो

---

[1] Before सह TBH Be insert अथ ततः ; not found in JF Sāy.

स्तूपो ऽसीति । तस्मिन्पवित्रे अपिसृजति यजमाने प्राणापानौ दधामीति वा तूष्णीं वा । तं यजमानाय वा ब्रह्मणे वा प्रयच्छत्यथैतानि बर्हिःसंनहनान्यायातयति दक्षिणायै श्रोणेरुत्तरादꣳसादथ दक्षिणे वेद्यन्ते बर्हिर्मुष्टिꣳ स्तृणाति देवबर्हिरूर्णाम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य इति । तां बहुलां पुरस्तात्प्रतीचीं त्रिवृतमनतिदृश्नꣳ[1] स्तृणात्यथ प्रस्तरपाणिः प्राङभिसृप्य परिधीन्परिदधाति गन्धर्वो ऽसि विश्वावसुर्विश्वस्मादीषतो यजमानस्य परिधिरिड ईडित इति मध्यममिन्द्रस्य बाहुरसि दक्षिणो यजमानस्य परिधिरिड ईडित इति दक्षिणं मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडित इत्युत्तरमथ सूर्येण पुरस्तात्परिदधाति सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्या इत्यूर्ध्वे समिधावादधाति वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमह्यग्ने बृहन्तमध्वर इति दक्षिणां तूष्णीमुत्तरामभ्याघार्यान्तर्वेद्युदीचीनाग्रे विधृती तिरश्ची सादयति विशो यन्त्रे स्थ इति । विधृत्योः प्रस्तरं वसूनाꣳ रुद्राणामादित्यानाꣳ सदसि सीदेति । प्रस्तरे जुहूं जुहूरसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीदेत्युत्तरामुपभृतमुपभृदसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीदेत्युत्तरां ध्रुवां ध्रुवासि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीदेत्यथ स्रुचः सचा अभिमृशत्येता असदन्सुकृतस्य लोके ता विष्णो पाहि

---

[1] Thus HJF Keś., Sāy.; समनतिदृश्नꣳ BT Be.

पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियमित्य॑थ[1] विष्णूनि स्थ वैष्णवानि धामानि स्थ प्राजापत्यानीत्याज्यान्यभिमन्त्रयते ' ॥ १३ ॥ एकादशः ॥

अथादत्ते दक्षिणेनाज्यस्थालीꣳ सस्रुवाꣳ सव्येन प्राचीं वेदमित्य॑तत्समादाय प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य जघनेन गार्हपत्यमुपविश्य प्राच्यां द्वेधोपस्तृणीते स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इत्य॑थ धृष्टिमादाय दक्षिणस्य पुरोडाशस्याङ्गारानपोहतीदमहꣳ सेनाया अभीत्वर्यै मुखमपोहामीत्य॑थैनं विदर्शयति सूर्यं ज्योतिर्विभाहि महत इन्द्रियायेति ' वेदेन विरजसं कृत्वाभिघारयत्याप्यायतां घृतयोनिरग्निर्हव्यानुमन्यताम्। खमङ्क्ष्व त्वचमङ्क्ष्व सुरूपं त्वा वसुविदं पशूनां तेजसाग्नये जुष्टमभिघारयामीति ' यद्देवत्यो वा भवत्य॑थैनमुद्वासयति ऋत उत्स्नाति जनिता मतीनामित्याज्येन सुसंतर्पयत्यार्द्रः प्रथस्नुर्भुवनस्य गोपा इत्यु॑परिष्टादभ्यज्याधस्तादुपानक्ति यस्त आत्मा पशुषु प्रविष्टस्तमङ्क्ष्वेत्ये॑वमेवोत्तरं पुरोडाशमुद्वासयत्य॑थ शृतमथ दध्य॑थ सांनाय्ये अलंकरोति यस्त आत्मा पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे। आत्मन्वान्सोम घृतवान्हि भूत्वा देवान्गच्छ सुवर्विन्द यजमानाय मह्यमिति ' प्रत्यज्य कपालान्युद्वासयतीरा भूतिः पृथिव्यै रसो मोत्क्रमीदिति ' संख्यायोद्वासयति

---

[1] अथ om. Bc JF Sāy.

यजमानस्य गोपीथायेति ब्राह्मणमथैनꣳ[१] स्रुवमाज्यस्य पूरयित्वान्तरेण पुरोडाशाववदधात्यथैनानि[२] संपरिगृह्यान्तर्वेद्यासादयति भूर्भुवः सुवरित्येताभिर्व्याहृतीभिर्मध्यतः पुरोडाशावासादयति दक्षिणतः शृतमुत्तरतो दध्यथैनꣳ[१] स्रुवमग्रेण स्रुचः पर्याहृत्य दक्षिणेन जुहूं प्रस्तरे सादयति स्योनो मे ५
सीद सुषदः पृथिव्यां प्रथयि प्रजया पशुभिः सुवर्गे लोके । दिवि सीद पृथिव्यामन्तरिक्षे ऽहमुत्तरो भूयासमधरे मत्सपत्ना इत्यथैनं यथाहृतं[३] प्रतिपर्याहृत्य ध्रुवायामवदधात्यृषभो ऽसि शाक्वरो घृताचीनाꣳ सूनुः प्रियेण नाम्ना प्रिये सदसि सीदेति ' ॥ १४ ॥ द्वादशः ॥ १०

अथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूह्यथ यत्र होतुरभिजानाति प्र वो वाजा अभिद्यव इति तत्प्रथमामभ्यादधाति ' प्रणवेप्रणवे ऽभ्यादधात्यथ यत्र होतुरभिजानाति समिद्धो अग्न आहुतेति तदन्ततो ऽभ्यादधाति ' परि समिधꣳ शिनष्ट्यथ यत्र होतुरभिजानात्याजुहोता दुवस्य- १५
तेति तदेतेन[४] वेदेन त्रिराहवनीयमुपवाजयत्यनूक्तासु सामिधेनीषु ध्रुवाज्यात्स्रुवेणोपहत्य वेदेनोपयम्य प्राजापत्यं तिर्यञ्च-

---

१-१ एनꣳ all MSS., also Prayoga Burnell, Keś. the second time and Sāyaṇa.

२ Thus Be HT Sāy. (sc. हवीꣳषि); अथैतानि J, अथैनं B,

३ Thus Be JF; अथैनमथा B; अथैनद्यथा TH.

४ तदेतेनैव Be J Sāy. (sec. m.)

माघारमाघारयति प्रजापतये स्वाहेति मनसाथ संप्रेषमाहाग्नीदग्नीꣳस्त्रिस्त्रिः संमृड्ढीत्यथैष आग्नीध्र इध्मसंनहनानि स्फ्य उपसंगृह्य परिधीन्संमार्ष्टि त्रिर्मध्यमं त्रिर्दक्षिणार्धं त्रिरुत्तरार्धं त्रिराहवनीयमुपवाजयत्यग्ने वाजजिद्वाजं त्वाग्ने सरिष्यन्तं वाजं जेष्यन्तं वाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्नादमन्नाद्यायेत्यथापरेण जुहूपभृतौ प्राञ्चमञ्जलिं करोति भुवनमसि विप्रथस्वाग्ने यष्टरिदं नम इत्यथादत्ते दक्षिणेन जुहूं जुह्वेह्यग्निस्त्वा ह्वयति देवयज्याया इति । सव्येनोपभृतमुपभृदेहि देवस्त्वा सविता ह्वयति देवयज्याया इति । सव्येनात्याक्रामञ्जपत्यग्नाविष्णू मा वामवक्रमिषं विजिहाथां मा मा संताप्तं लोकं मे लोककृतौ कृणुतमिति । स्थानं कल्पयते[1] विष्णो स्थानमसीत्यन्वारब्धे यजमाने मध्यमे परिधौ सꣳस्पर्शमृजुमाघारमाघारयति[2] संततं प्राञ्चमव्यवच्छिन्दन्नित इन्द्रो अकृणोद्वीर्याणि समारभ्योर्ध्वो अध्वरो दिविस्पृशमह्रुतो यज्ञो यज्ञपतेरिन्द्रावान्स्वाहेति । बृहद्भा इति स्रुचमुद्गृह्णात्यथासꣳस्पर्शयन्स्रुचावुदङ्ङत्याक्रामञ्जपति पाहि माग्ने दुश्चरितादा मा सुचरिते भजेति । जुह्वा ध्रुवाꣳ समनक्ति मखस्य शिरो ऽसि सं ज्योतिषा ज्योतिरङ्क्तामिति त्रिरथ यथायतनꣳ स्रुचौ सादयित्वा प्रवरं प्रवृणीत । उत्कर इध्म-

---

[1] कल्पयति F Be Mādh., the other MSS., also Sāy. have the Ātmanepadam.

[2] Thus BH; सꣳस्पृश्य Be TJ Keś., संमृश्य F.

संनहनानि स्फ्य उपसंगृह्य पृष्ठमाग्नीध्रो ऽनूपविश्यत्यथाश्रावयत्यो[१] श्रावयास्तु श्रौषडग्निर्देवो होता देवान्यक्षद्विद्वाꣳश्चिकित्वान्मनुष्वद्भरतवदमुवदमुवद्ब्रह्मण्वदेह वक्षद्ब्राह्मणा[२] अस्य यज्ञस्य प्रावितार इत्यसौ मानुष इति होतुर्नाम गृह्णात्युपोत्थाय होता विमुञ्चति। विमुक्तो ऽध्वर्युरुपविशति। प्रसवमाकाङ्क्षन्नास्ते। ॥ १५ ॥ त्रयोदशः ॥

अथ यत्र होतुरभिजानाति घृतवतीमध्वर्यो स्रुचमास्यस्वेति तज्जुहूपभृतावादायात्याक्रम्याश्राव्याह समिधो यजेति। वषट्कृते जुहोति यज यजेति। चतुर्थं यत्त्वर्धमौपभृतस्याज्यस्य[३] जुह्वाꣳ समानयते। पञ्च प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य सꣳस्रावेणानुपूर्वꣳ[४] हवीꣳष्यभिघारयति ध्रुवामेवाग्रे ऽथ दक्षिणं पुरोडाशमथ ध्रुवामथोत्तरं पुरोडाशमथ शृतमथ दध्युपभृतमन्ततो। ऽथ चतुर आज्यस्य गृह्णान आहाग्नये ऽनुब्रूहीत्यत्याक्रम्याश्राव्याहाग्निं यजेति। वषट्कृत उत्तरार्धपूर्वार्धे प्रतिमुखं प्रवाङ्ग्जुहोत्यथोदङ्ङत्याक्रम्य चतुर एवाज्यस्य गृह्णान आह सोमायानुब्रूहीत्यत्याक्रम्याश्राव्याह सोमं यजेति। वषट्कृते दक्षिणार्धपूर्वार्धे प्रतिमुखं प्रवाङ्ग्जुहोत्यथोपस्तीर्य दक्षिणस्य पुरोडाशस्य पूर्वार्धादवद्यन्नाहाग्नये ऽनुब्रूहीत्यथैनमुपतिष्ठते मा भेर्मा संविक्था मा त्वा

---

[१] Thus J Sāy.; नुपविश॰ Be BF; नपविश॰ H; T omits नू altogether.

[२] Instead of एह वक्षद् J has: चावक्षद् *i.e.* चा च वक्षद् (as Bhār. Āpast. and Hir.)

[३] Thus BH Sāy.; चौपभृतमाज्यं F; चौपभृतमाज्यस्य Bo J.

[४] नुपूर्व्यꣳ all the MSS. and Sāy. except T, which has ॰पूर्वं

हिꣳसिषं मा ते तेजो ऽपक्रमीदित्यथैनमभिमृशति भरतमुद्धरेमनुषिञ्चावदानानि ते प्रत्यवदास्यामि नमस्ते अस्तु मा मा हिꣳसीरिति । पूर्वार्धादवदायापरार्धादवद्यत्यभिघारयति प्रत्यनक्ति यदवदानानि ते ऽवद्यन्विलोमाकार्षमात्मनः । आज्येन प्रत्यनज्म्येनत्तत्त आप्यायतां पुनरित्यत्याक्रम्याश्राव्याहाग्निं यजेति । वषट्कृते जुहोत्यथ चतुर आज्यस्य गृह्णान आह प्रजापतय इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह प्रजापतिमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते जुहोत्यथोपस्तीर्योत्तरस्य पुरोडाशस्यापरार्धादवद्यन्नाहाग्नीषोमाभ्यामिति पौर्णमास्यामिन्द्राय वैमृधायेति चेन्द्राग्निभ्यामित्यमावास्यायामसंनयत इन्द्रायेति संनयतो महेन्द्रायेति वा यदि महेन्द्रयाजी भवति । ॥ १६ ॥

समान उपस्थानः । समानो ऽभिमर्शनो । ऽपरार्धादवदाय पूर्वार्धादवद्यत्यभिघारयति । समानः प्रत्यञ्जनो । ऽत्याक्रम्याश्राव्याहाग्नीषोमौ यजेति । वषट्कृते जुहोत्यथोपस्तीर्य द्विः पुरोडाशस्यावद्यन्नाहेन्द्रायानुब्रूहीति महेन्द्रायेति वा यदि महेन्द्रयाजी भवति । द्विः पुरोडाशस्यावद्यति द्विः शृतस्य द्विर्दध्नो । ऽभिघारयति । प्रत्यनक्त्यत्याक्रम्याश्राव्याहेन्द्रं यजेति महेन्द्रमिति वा यदि महेन्द्रयाजी भवति । वषट्कृते जुहोत्यथोपस्तीर्य दक्षिणस्य पुरोडाशस्योत्तरार्धादवद्यन्नाहाग्नये स्विष्टकृते ऽनुब्रूहीति । सकृद्दक्षिणस्य पुरोडाशस्योत्तरार्धादवद्यति सकृद्ध्रुवाज्यात्सकृदुत्तरस्य पुरोडाशस्य सकृच्छृतस्य सकृद्दध्नो । द्विरभिघारयति । न प्रत्यनक्त्यवत्ते स्विष्टकृति स्रुवेण पार्वणौ होमौ जुहोत्यृषभं वाजिनं

वयं पूर्णमासं यजामहे । स नो दोहताꣳ सुवीर्यꣳ रायस्पोषꣳ सहस्रिणम् । प्राणाय सुराधसे पूर्णमासाय स्वाहेति पौर्णमास्यामˈमावास्या सुभगा सुशेवा धेनुरिव भूय आप्यायमाना । सा नो दोहताꣳ सुवीर्यꣳ रायस्पोषꣳ सहस्रिणम् । अपानाय सुराधसेऽमावास्यायै स्वाहेत्यमावास्यायामˈत्याक्रम्याश्राव्याहाग्निꣳ स्विष्टकृतं यजेतिˈ वषट्कृत उत्तरार्धपूर्वार्धेऽतिहाय पूर्वा आहुतीर्जुहोत्यˈथैतन्मेक्षणमाहवनीयेऽनुप्रहरत्यˈथैनत्सꣳस्रावेणाभिजुहोत्यˈथोदङ्ङत्याक्रम्य जुह्वामप आनीय संक्षालनमन्तःपरिधि निनयति वैश्वानरे हविरिदं जुहोमि साहस्रमुत्सꣳ शतधारमेतम् । स नः पितरं पितामहं प्रपितामहꣳ सुवर्गे लोके गच्छतु पिन्वमानꣳ स्वधा नम इतिˈ निर्णिज्य स्रुचं निष्टप्याद्भिः पूरयित्वा बहिःपरिधि निनयतीमꣳ समुद्रꣳ शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये। घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन्नित्यˈथैतदौपभृतमाज्यꣳ सर्वश एव जुह्वाꣳ समानयतेˈऽथ यथायतनꣳ स्रुचौ सादयित्वा प्राशित्रमवद्यति दक्षिणस्य पुरोडाशस्योत्तरार्धाद्यवमात्रमज्यायो यवमात्रादाव्याधात्मत्यतामिदम्। मा रूरुपाम यज्ञस्य शुद्धꣳ स्विष्टमिदꣳ हविरित्यˈथैनत्स्रुवदण्डेनाभिघार्य जघनेन प्रणीताः सादयित्वाद्भिः स्रुवदण्डꣳ सꣳस्पर्श्यावदधाति[१]ˈ ॥ १७ ॥ चतुर्दशः ॥

अथ कꣳसं वा चमसं वेडोपह्वनं याचतिˈ तमन्तर्वेदि निधाय तस्मिन्नुपस्तीर्य दक्षिणस्य पुरोडाशस्य दक्षिणार्धात्प्रत्यञ्चावद-

---

[१] Thus BH Sāy., सꣳस्पृश्य JFT Bo.

धाति मनुना दृष्टां घृतपदीं मित्रावरुणसमीरिताम् । दक्षिणार्धादसंभिन्दन्नवद्याम्येकतोमुखामिति । द्वितीयनवदानानि संभिद्यावदधात्यथ[1] दक्षिणस्यैव पुरोडाशस्य पूर्वार्धात् त्र्यङ्गुलं वा चतुरङ्गुलं वाज्येन सुसंहतꣳ संतप्याग्रेण ध्रुवां यजमानभागं निदधाति । द्विर्ध्रुवाज्यादवद्यति द्विरुत्तरस्य पुरोडाशस्य द्विः शृतस्य द्विर्दध्नो । ऽभिघारयत्यथ होतुर्द्विरङ्गुलावनक्ति । जिप्रेण भक्षयित्वा । चतुरवान्तरेडामवद्यत्युपस्तृणाति । द्विरादधात्यभिघारयति[2] । समन्वारभन्ते ऽध्वर्युश्च यजमानश्च ब्रह्मा चाग्नीध्रश्चाथ यत्र होतुरभिजानाति दैव्या अध्वर्यव उपहूता उपहूता मनुष्या इति तद्दक्षिणं[3] पुरोडाशं चतुर्धा कृत्वा बर्हिषदं करोत्यथ यत्र होतुरभिजानात्युपहूतो ऽयं यजमान इति तर्हि यजमानो होतारमीक्षमाणो वायुं मनसा ध्यायेदित्युपहूतायामिडायामग्नीध आदधाति षडवत्तमुपस्तृणात्यादधात्यभिघारयत्युपस्तृणात्यादधात्यभिघारयति । प्राश्नन्ति । मार्जयन्ते । ऽथाह ब्रह्मणे प्राशित्रं परिहरेति । परि प्राशित्रꣳ हरन्त्यन्वपो ऽस्तु वेदेन ब्रह्मभागमथान्वाहार्यं याचत्युद्वासयन्त्येतद्धविरुच्छिष्टम् । ॥ १८ ॥ पञ्चदशः ॥

अथ संप्रैषमाह ब्रह्मन् प्रस्थास्यामः समिधमाधायाग्नीदग्नीन् सकृत्सकृत्संमृड्ढीति । प्रसूतो ऽग्नैताꣳ समिधं मध्यत आहवनी-

---

[1] संभिद्यैवावद० Sāy.; अथ om. JT.

[2] Thus Be BH Sāy., the other MSS. are more or less corrupt.

[3] Thus H Sāy.; तंदक्षिणं TJF; तदातदक्षिणं B; अथ दक्षिणं Be.

थस्याभ्यादधात्यथैष आग्नीध्रो ऽस्यैवेध्मसंनहनैः परिधीन्
संमार्ष्टि सकृन्मध्यमꣳ सकृद्दक्षिणार्ध्यꣳ सकृदुत्तरार्ध्यꣳ । सकृदा-
हवनीयमुपवाजयत्यग्ने वाजजिद्वाजं त्वाग्ने ससृवाꣳसं वाजं
जिगिवाꣳसं वाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्ना-
दमन्नाद्यायेत्यथैतानीध्मसंनहनान्यद्भिः सꣳस्पृश्याहवनीये[1] ऽनुप्रह- ५
रति यो भूतानामधिपती रुद्रस्तन्तिचरो वृषा । पशूनस्माकं
मा हिꣳसीरेतदस्तु हुतं तव स्वाहेत्यथ जुहूपभृतावादायात्या-
क्रम्याश्राव्याह देवान्यजेति । वषट्कृते जुहोति यज यजेति ।
त्रीन् प्रतीचो ऽनूयाजान्यजति । प्राचान्ततः संभिनत्त्यथोदङ्ङत्या-
क्रम्य यथायतनꣳ स्रुचौ सादयित्वा वाजवतीभ्याꣳ स्रुचौ व्यूहति १०
वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीदिति । दक्षिणेन जुहूमुद्गृह्णा-
त्यथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकरिति सव्येनो-
पभृतं निगृह्णात्युद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्निति
प्राचीं जुहूमूहत्यथा[2] सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यता-
मिति प्रतीचीमुपभृतं प्रत्यूहति । प्राच्या[3] परिधीननक्ति वसु- १५
भ्यस्त्वेति मध्यमं रुद्रेभ्यस्त्वेति दक्षिणमादित्येभ्यस्त्वेत्युत्तरमथो-
पभृतमद्भिः सꣳस्पृश्य यथायतनꣳ स्रुचौ सादयित्वा स्रुक्षु प्रस्त-
रमनक्त्यक्तꣳ रिहाणा इति जुह्वामग्राणि वियन्तु वय इत्युपभृति
मध्यानि प्रजां योनिं मा निर्मृक्षमिति ध्रुवायां मूलान्यथ प्रस्त-

---

[1] Thus Sāy., संस्पृश्य or संमृश्य MSS.

[2] Thus Be T Sāy.; [उद्धत्य॰ HJ Keś.; in BF this whole passage is wanting.

[3] Instead of प्राच्या (thus TF Bo Sāy.) the other MSS. have जुह्वा ।

रात्तृणं प्रच्छिद्य जुह्वामवदधात्य'थाश्रावयत्यो श्रावयास्तु श्रौषडिषिता दैव्याहोतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहीति' तमुपरीव प्राञ्चं प्रहरति नात्ययं प्रहरति न पुरस्तात्प्रत्यस्यति न प्रतिशृणाति न विष्वञ्चं [१]वियौत्यूर्ध्वमुद्यौत्याप्यायन्तामाप ओषधयो मरुतां पृषतय स्थ दिवं गच्छ ततो नो वृष्टिमेरयेत्य'थाग्नीध्रमीक्षते ऽग्नीदिति' तमाहाग्नीध्रः संवदस्वेत्य'गानग्नीदित्याहाध्वर्यु'रगन्नित्याहाग्नीध्रः' श्रावयेत्याहाध्वर्युः' श्रौषडित्याहाग्नीध्र' इदं ब्रूहीत्याहाध्वर्यु'रनुप्रहरेत्याहाग्नीध्रो' ऽनुप्रहरति' स्वगा दैव्याहोतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीत्य'थोपोत्थायाहवनीयमुपतिष्ठत आयुष्या अग्ने ऽस्यायुर्मे पाहि चक्षुष्या अग्ने ऽसि चक्षुर्मे पाहीत्य'थेमामभिमृशति ध्रुवासीति' मध्यमं परिधिमनुप्रहरति यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमाणः । तं त एतमनु जोषं भरामि नेदेष त्वदपचेतयाता इत्य'थेतरावुपसमस्यति यज्ञस्य पाथ उप समितमित्य'थैनान्त्सꣳस्रावेणाभिजुहोति' जुह्वामुपभृतꣳ संप्रस्रावयति सꣳस्रावभागा स्थेषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च देवा इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन्बर्हिषि मादयध्वꣳ स्वाहेत्य'थ प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य धुरि स्रुचौ विमुञ्चत्यग्नेर्वामपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनी सुम्ने मा धत्तं धुरि धुर्यौ पातमिति' यद्यु वै नानो भवत्युत्कर एवैने स्फ्ये विमुञ्चत्येतेनैव मन्त्रेण' ॥ १९ ॥ षोडशः ॥

---

[१] Thus (वियौति) Bc JF Sāy. Mādh., व्यूहति B, व्यूति H, जहति T.

अथादत्ते दक्षिणेनाज्यस्थालीꣳ सस्रुवाꣳ सव्येन जुहूं होत्रे वेदं प्रदाय । प्रदक्षिणमावृत्य प्रत्यञ्चावाद्रवतो । दक्षिणेनाध्वर्युर्गार्हपत्यं परिक्रामत्युत्तरेण होता । तौ जघनेन गार्हपत्यं पश्चात्प्राञ्चावुपविशतो दक्षिण एवाध्वर्युरुत्तरो होताथाध्वर्युर्वेदमुपस्मृतं कृत्वा चतुर आज्यस्य गृह्णान आह सोमायेत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याह सोममित्युपांशु यजेत्युच्चैर्वषट्कृते जुहोति । चतुर एवाज्यस्य गृह्णान आह त्वष्ट्र इत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याह त्वष्टारमित्युपांशु यजेत्युच्चैर्वषट्कृते जुहोति । चतुर एवाज्यस्य[1] गृह्णान आह देवानां पत्नीभ्य इत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याह देवानां पत्नीरित्युपांशु यजेत्युच्चैर्वषट्कृते परिश्रिते देवानां पत्नीर्जुहोत्यथ चतुर एवाज्यस्य[1] गृह्णान आहाग्नये गृहपतय इत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याहाग्निं गृहपतिमित्युपांशु यजेत्युच्चैर्वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोत्यथाग्रेण होतारमुपातीत्य होतुर्द्विरङ्गुष्ठावनक्ति । जिह्मेण भक्षयित्वा । चतुर्हस्तेडाꣳ[2] संपादयत्याज्यस्यैव । समन्वारभेते अध्वर्युश्चैव पत्नी चोपहूतायामिडायामग्नीध आदधाति षडवत्तं । प्राश्नीतो । मार्जयेते[3] । अथ स्रुचि चतुर्गृहीतं गृहीत्वापसलैः पर्यावृत्यान्वाहार्यपचने प्रायश्चित्तं जुहोत्युलूखले मुसले

---

[1] Thus BT Sāy., the other MSS. omit एव; Bc throughout चतुराज्यस्य ।

[2] Thus B Bc JH Keś. Sāy. (pr. m.); चतुरहस्ते॰ TF; चतुर्हस्ते॰ Sāy. sec. m.

[3] Corrected; मार्जयेतेथ Bc JFHT; मार्जयतेथ B.

यच्च शूर्पे आशिश्लेष दृषदि कृष्णाजिने यत्कपाले । अवप्रुषो विप्रुषः संयजामि विश्वे देवा हविरिदं जुषन्ताम् । यज्ञे या विप्रुषः सन्ति बह्वीरग्नौ ताः सर्वाः स्विष्टाः सहुता जुहोमि स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वान्वाहार्यपचन एवेध्मप्रव्रश्चनान्यभ्याधाय फलीकरणानोप्य फलीकरणहोमं जुहोत्यग्ने ऽदब्धायो ऽशीततनो पाहि माद्य दिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादविषं नः पितुं कृणु सुषदा योनिꣳ स्वाहेत्यथैतेनैव यथेतमेत्य [वेदे यजमानं वाचयति वेदो ऽसि वित्तिरसीत्यान्तादनुवाकस्य][1] होत्रे वेदं प्रदाय पत्नीं[2] विष्यतीमं विष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः । धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमीत्यथास्यै योक्त्रमञ्जलावाधायोदपात्रमानयति समायुषा सं प्रजया समग्ने वर्चसा पुनः । सं पत्नी पत्याहं गच्छे समात्मा तनुवा ममेत्यथ मुखं विमृष्टे यदप्सु ते सरस्वति गोष्वश्वेषु यन्मधु । तेन मे वाजिनीवति मुखमङ्ग्धि सरस्वतीत्यपो निनयत्यवभृथस्यैव रूपं कृत्वोत्तिष्ठतीति ब्राह्मणम् ॥ २० ॥

अथैनां तथैव[3] तिरः पवित्रमप आचामयति पयस्वतीरोष-

---

[1] The words enclosed in brackets found only in BH; om. Be JFT Sāy.

[2] Sāyaṇa has पत्नी and defends this reading, but knows also the reading पत्नीं ।

[3] om. J Be; तथैवं B.

धयः पयस्वद्वीरुधां पयः। अपां पयसो यत्पयस्तेन मामिन्द्र सꣳसृजेत्यथैनां[1] गार्हपत्ये समिध आधापयत्यग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे ऽराधि स्वाहा वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते व्रतमचारिषं तदशकं तन्मे ऽराधि स्वाहेत्यथ यथाप्रपन्नं निष्क्रामयत्यथ[2] प्राङेत्य ध्रुवामाप्याययत्याप्यायतां ध्रुवा घृतेन यज्ञंयज्ञं प्रति देवयद्भ्यः। सूर्याया ऊधो ऽदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन्नित्यथाज्यस्थाल्याः स्रुवेणोपघातं प्रायश्चित्तानि जुहोत्याश्रावितमत्याश्रावितं वषट्कृतमत्यनूक्तं च यज्ञे। अतिरिक्तं कर्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन्। स्वाहाकृताहुतिरेतु देवान्स्वाहेत्यथ यज्ञसमृद्धीर्जुहोतीष्टेभ्यः स्वाहा वषडनिष्टेभ्यः स्वाहा भेषजं दुरिष्ट्यै स्वाहा निष्कृत्यै स्वाहा दौराध्यै स्वाहा दैवीभ्यस्तनूभ्यः स्वाहा ऋद्ध्यै स्वाहा समृद्ध्यै स्वाहा सर्वसमृद्ध्यै स्वाहा भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः स्वाहेमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयास्ययासन्मनसाहितः। अयासन्हव्यमूहिषे ऽया नो धेहि भेषजꣳ स्वाहायास्याग्ने ऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि। अयसा मनसा धृतो ऽयसा हव्यमूहिषे ऽया नो धेहि भेषजꣳ स्वाहा यदस्मिन् कर्मण्यन्तरगाम मन्त्रतः कर्मतो वा। अनयाकृत्या तच्छमयामि सर्वं तृप्यन्तु देवा आवृषन्तां घृतेन स्वाहा यदस्य कर्मणो ऽत्य-

---

[1] TF insert तथैव.

[2] निष्क्रामत्यथ Bo Sāy.; क्रमयत्यथ J.

रीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत् स्विष्टकृद्विद्वान्सर्वꣳ स्विष्टꣳ सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुत आहुतीनां कामानाꣳ समर्धयित्रे स्वाहा। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाꣳ स्वाहेत्य'थ बर्हिषो धातूनाꣳ संप्रलुप्य ध्रुवायाꣳ समनक्ति समक्तं बर्हिर्हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः। समिन्द्रेण विश्वेभिर्देवेभिरक्तामित्य'थैनदाहवनीये ऽनुप्रहरति दिव्यं नभो गच्छतु यत्स्वाहेत्य'थोपोत्थाय दक्षिणेन पदा वेदिमवक्रम्य[१] ध्रुवया समिष्टयजुर्जुहोति देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं नो देव देवेषु यज्ञꣳ स्वाहा वाचि स्वाहा वाते धाः स्वाहेत्यु'द्द्रवति स्रुचं' निनयति प्रणीता' उपोत्थाय यजमानो दक्षिणेन पदा विष्णुक्रमान्क्रमते' संतिष्ठत आमावास्यं वा[२] पौर्णमास्यं वा हविः' ॥२१॥ सप्तदशः ॥

इति प्रथमः प्रश्नः ॥

---

[१] अतिक्रम्य Bo H, आक्रम्य T.

[२] om. JB; वा om. both times Bo.

अथोपव्याहरणंˈ विज्ञायते क्रत्वादौ क्रतुकामं कामयीत[१] यज्ञाङ्गादौ यज्ञाङ्गकाममितिˈ प्राक्कूलान्दर्भान्संस्तीर्य तेषु प्राङ्मुखो यजमान उपविश्य जपति याः पुरस्तात्प्रस्रवन्त्युपरिष्टात्सर्वतश्च याः । ताभी रश्मिपवित्राभिः श्रद्धां यज्ञमारभे ॥ देवा गातुविदो गातुं यज्ञाय विन्दत । मनसस्पतिना देवेन वाताद्यज्ञः प्रयुज्यतामिति[२] श्रद्ध एहि[३] सत्येन त्वा ह्वयामीत्याकूत्या वेदनं करोत्याकूत्यै त्वा कामाय त्वा समृधे त्वा पुरो दधे । अमृतत्वाय जीवसे ॥ आकूतिमस्यावसे काममस्य समृध्यै । इन्द्रस्य युञ्जते धियः ॥ आकूतिं देवीं मनसः पुरो दधे यज्ञस्य माता सुहवा मे अस्तु । यदिच्छामि मनसा सकामो विदेयमेनद्धृदये निविष्टमितिˈ मनसा त्रिः संकल्पयते त्रिरुच्चैःˈ सर्वकामो ऽग्नीनाधास्य इत्यग्न्याधेयेˈ स्वर्गकामो दर्शपूर्णमासाभ्यां यक्ष्य इति दर्शपूर्णमासयोःˈ स्वर्गकामश्चातुर्मास्यैर्यक्ष्य इति चातुर्मास्येषुˈ स्वर्गकामः पशुना यक्ष्य इति पशुबन्धेˈ स्वर्गकामः सोमेन यक्ष्य इति सोमेˈ स्वर्गकामो ऽग्निं चेष्य इत्यग्निचयेˈ ऽहीने ऽहर्गणे वा यथाकामो यत्कामो वा यजतेˈ तन्म ऋध्यतां तन्मे समृध्यतां तन्मे संपद्यतां काम इत्यथर्त्विजां[४] प्रतिवचनं तत्त ऋध्यतां तत्ते समृध्यतां तत्ते संपद्यतां काम इत्यों तथेति प्रतिवचनम्ˈ ॥ १ ॥

---

[१] Thus Bo JF Keś. ; कामयेत BT ; H corrupt.

[२] After इति B has श्रद्धामाह्वयते .

[३] Thus HBT ; एहीति JF ; एश्र्हि इति Bo.

[४] Thus BHT, अथ ऋत्विजां the other MSS.

अथर्त्विजो[1] देवयजनं याचते' ऽध्वर्यो देवयजनं मे देहीत्यध्वर्युमादित्यो देवो दैवो ऽध्वर्युः स ते देवयजनं ददात्वित्यों तथेति प्रतिवचनं' ब्रह्मन्देवयजनं मे देहीति ब्रह्माणं' चन्द्रमा देवो दैवो ब्रह्मा स ते देवयजनं ददात्वित्यों तथेति प्रतिवचनं' होतर्देवयजनं मे देहीति होतारमग्निर्देवो दैवो होता स ते देवयजनं ददात्वित्यों तथेति प्रतिवचनमुद्गातर्देवयजनं मे देहीत्युद्गातारं' पर्जन्यो देवो दैव उद्गाता स ते देवयजनं ददात्वित्यों तथेति प्रतिवचनꣳ' सदस्य देवयजनं मे देहीति सदस्यमाकाशो देवो दैवः सदस्यः स ते देवयजनं ददात्वित्यों तथेति प्रतिवचनꣳ' होत्रका देवयजनं मे दत्तेति होत्रकानापो देव्यो दैव्या होत्राशꣳसिन्यस्तास्ते देवयजनं ददत्वित्यों तथेति प्रतिवचनं' चमसाध्वर्यवो देवयजनं मे दत्तेति चमसाध्वर्यून्रश्मयो देवा दैवाश्चमसाध्वर्यवस्ते[2] ते देवयजनं ददत्वित्यों तथेति प्रतिवचनमपि वा न देवयजनं याचत' आदित एव तीर्थे स्नात्वोदेत्याहतं वासः परिधाय' शुद्धो हैव शुचिः पूतो मेध्यो विपाप्मा ब्रह्मचारी सहकारिप्रत्यय आ चतुर्थात्कर्मणो ऽभिसमीक्षमाणो वेदकर्माणि प्रयोजयेत्प्रागपवर्गाण्युदगपवर्गाणि वा प्राङ्मुखः प्रदक्षिणं यज्ञोपवीती दैवानि कर्माणि करोति' दक्षिणामुखः प्रसव्यं प्राचीनावीती पित्र्याणि' तिष्ठन्नासीनः प्रह्वो वा यथान्यायं' छन्दोगब्राह्मणं यथा वै दक्षिणः पाणिरेवं

---

[1] Thus HJT Be, अथ ऋत्विजो BJ.

[2] Thus T, दैव्याश्च॰ the other MSS.

देवयजनं । यथा सव्यस्तथा पितृयजनं । यथा पितृयजनं तथा श्मशानकरणं । यथा श्मशानकरणं तथाभिचरणीयेष्विष्टिपशुसोमेष्वादित एव[1] पुरोदकं देवयजनं यस्मादन्यत्पुरस्तात्समन्तिकं देवयजनं न विन्देयुरुत्तरतो देवयजनमात्रमतिशिनष्टि । ॥ २ ॥ प्रथमः ॥

अथर्त्विजां वरणं । विज्ञायते ब्राह्मणा[2] ऋत्विजो योनिगोत्रश्रुतवृत्तसंपन्ना[3] अविगुणाङ्गा[4] अश्वित्रिणो । न परिखातिक्रान्ता नान्तगा नान्त्यजा नाननूचाना[5] । शालेयवालेयपुत्रिकापुत्रपरक्षेत्रसहोढकानीनानुजावरद्विप्रवरान्परिहाप्याङ्गिरसो[6]ऽध्वर्युर्वासिष्ठो ब्रह्मा वैश्वामित्रो होतायास्य उद्गाता कौषीतकः सदस्यो । ऽवशिष्टा[7] भृगवो ऽङ्गिरसो वा । योनिर्वृत्तं विद्या च प्रमाणमित्येके । ताꣳश्चेद्वृणीताव्यापन्नाङ्गानेव वृणीताकुनखिनमध्वर्युमकिलासिनं ब्रह्माणमषण्डꣳ[8] होतारमकरालमुद्गातारमशिपिविष्टꣳ सदस्यमथ[9] प्रतिप्रस्थाता नेष्टोन्नेतेत्यध्वर्युपुरुषा । ब्राह्मणाच्छꣳस्याग्नीध्रः पोतेति ब्रह्मणो । मैत्रावरुणो ऽच्छावाको

---

[1] ष्वादित एव found only in Be F, but commented on by Bh.

[2] Thus HBe BF, ०णान् the other MSS.

[3] Thus Be BHF ; संपन्नां T; संपन्नान् J.

[4] Thus all except J which has ०ण्यांगान् ।

[5] Thus H Be BT, नाननूचानान् J, नांनूचानां F.

[6] Thus, or परिहाप्य Be HFJ, परिहृप्य T, परिहाप्यं B.

[7] Thus Veṅk. in his bhāṣya on the Karmānta ; the MSS. have वसिष्टा or वसिष्ठा except F, which has वशि ।

[8] Thus BT and J (sec. m.) ; अषंडं Be HFJ (pr. m.)

[9] अथ om. BT Be.

ग्रावस्तुदिति होतुः । प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इत्युद्गातुरभिगरो भुवगोपः सꣳश्राव इति[1] सदस्यस्य । स्वप्रधाना[2] । अस्वप्रधाना[2] इत्येके[2] । दश वैकादश वा चमसाध्वर्यवो ऽन्यद्दक्षिणाभिः परिक्रीता भवन्तीति विज्ञायते । तस्मादग्निहोत्रस्य यज्ञक्रतोरेक ऋत्विग्दर्शपूर्णमासयोश्चत्वार ऋत्विजो ऽध्वर्युर्ब्रह्मा होताग्नीध्र इति । चातुर्मास्येषु प्रतिप्रस्थाता पञ्चमः । पशुबन्धे मैत्रावरुणः षष्ठः । सर्वे सौम्ये ऽध्वरे । तान्कर्मणःकर्मणो वृणीतैकैकमुपसंगृह्य चोदयेदसावहमाध्वर्यवेण त्वा गच्छामि याजयतु मां भवानिति । ब्रह्मत्वेन हौत्रेणौद्गात्रेण सादस्येनेति । न सदस्यो विद्यत इत्येके । स्वेनस्वेन कर्मणा होत्रकान्[3] होत्रकानित्येके[3] । तत्पुरुषा होत्रकाश्चमसाध्वर्यवश्चाध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन स्तोमो योक्तव्य इति । ॥ ३ ॥

आदित्यो देवो दैवो ऽध्वर्युः स मे ऽध्वर्युरध्वर्यो ऽध्वर्युं त्वा वृण इत्यध्वर्युमादित्यो देवो दैवो ऽध्वर्युः स ते ऽध्वर्युस्तेनानुमतः कर्मैवाहं करिष्यामीत्योँ तथेति प्रतिवदनं । चन्द्रमा देवो दैवो ब्रह्मा स मे ब्रह्मा ब्रह्मन् ब्रह्माणं त्वा वृण इति ब्रह्माणं । चन्द्रमा देवो दैवो ब्रह्मा स ते ब्रह्मा तेनानुमतः कर्मैवाहं करिष्यामीत्योँ तथेति प्रतिवचनमग्निर्देवो दैवो होता

---

[1] सꣳस्राव B Be JH, संश्रावयति T, सꣳस्रावयति F, with श्र Bh.

[2] Thus Be, स्वप्रधानाः स्वप्रधाना इत्येके J; स्वप्रधान अस्वप्रधान इत्येके B; स्वधान अस्वप्रधानादित्येके F; स्वप्रधाना इत्येके H; स्वस्वप्रधाना इत्येके T.

[3] Thus B; होत्रकान्होत्रका इत्येके T; होत्रकान्होत्रकानित्येके JHF; Be om. न होत्रकान्।

स मे होता होतर्होतारं त्वा वृण इति होतारमग्निर्देवो दैवो होता स ते होता तेनानुमतः कर्मैवाहं करिष्यामीत्योँ तथेति प्रतिवचनं । पर्जन्यो देवो दैव उद्गाता स म उद्गातोद्गातरुद्गातारं त्वा वृण इत्युद्गातारं । पर्जन्यो देवो दैव उद्गाता स त उद्गाता तेनानुमतः कर्मैवाहं करिष्यामीत्योँ तथेति प्रतिवचनमाकाशो देवो दैवो सदस्यः स मे सदस्यः सदस्य सदस्यं त्वा वृण इति सदस्यमाकाशो दैवो देवः सदस्यः स ते सदस्यस्तेनानुमतः कर्मैवाहं करिष्यामीत्योँ तथेति प्रतिवचनमापो देव्यो दैव्या होत्राशꣳसिन्यस्ता मे होत्राशꣳसिन्यो होत्रका होत्रकान्वो वृण इति होत्रकानापो देव्यो दैव्या होत्राशꣳसिन्यस्तास्ते होत्राशꣳसिन्यस्ताभिरनुमताः कर्मैव वयं करिष्याम इत्योँ तथेति प्रतिवचनꣳ । रश्मयो देवा दैवाश्चमसाध्वर्यवस्ते मे चमसाध्वर्यवश्चमसाध्वर्यवश्चमसाध्वर्यून्वो वृण इति चमसाध्वर्यूꣳरश्मयो देवा दैवाश्चमसाध्वर्यवस्ते ते चमसाध्वर्यवस्तैरनुमताः कर्मैव वयं करिष्याम इत्योँ तथेति प्रतिवचनं । वृतोऽवृतो जपति महन्मे ऽवोचो यशो मे ऽवोचो भगो मे ऽवोचो भर्गो मे ऽवोचस्तपो मे ऽवोच स्तोमं मे ऽवोचः क्लृप्तिं मे ऽवोचो भुक्तिं मे ऽवोचो विश्वं मे ऽवोचः सर्वं मे ऽवोचः सर्वं मे कल्याणमवोचस्तन्मावतु[1] तन्माविशतु तन्मा जिन्वतु तेन भुक्षिषीय देवो देवमेतु[2] सोमः सोममेत्वित्योँ तथेति प्रतिवचनम् ॥ ४ ॥

---

[1] Thus only T, the other MSS.: तन्मामवतु ।

[2] Thus only F, the other MSS. have here and further on एति instead of एतु, TB omit the whole passage; cp. Pañc. Br. I. 1, 2.

[१]सिꣳहे मे मन्युर्व्याघ्रे मेऽन्तरामयो । वृके मे क्षुदश्वे मे घसिर्धन्वनि मे पिपासा । राजगृहे मेऽशनायाश्मनि मे तन्द्रिर्गर्दभे मेऽर्शः[२] । शल्यके[३] मे ह्रीरश्वत्थे मे वेपथुः । कूर्मे मेऽङ्गरोगो । बस्ते मेऽपमर्याप्रिये मे मृत्युर्भ्रातृव्ये मे पाप्मा । सपत्ने मे निर्ऋतिर्दुष्कीर्तौ मे व्यृद्धिः । परस्वति मेऽसमृद्धिः । खड्गे म आर्तिर्गवये म आन्ध्यं । गौरे मे बाधिर्यमृक्षे मे शोको । गोधायां मे खेदो[४] । जरायां मे हिमः । कृष्णशकुनौ मे भीरुता । कशे मे पापो गन्ध । उलूके मे स्वप्नशः[५] । क्रोके म ईर्ष्या । मर्कटे मे दुर्बुद्धिः । कुलले मे मꣳस्योलले मे प्रष्ठोष्ट्रे[६] मे तृष्णर्श्ये मे श्रमो । ऽव्यां म आव्यं । कोशे मे गन्धः । कुमार्यां मेऽलङ्कारः । सूकरे मे क्लदथुः[७] । हृदाखुनि[८]

---

[१] The construction of the text of this khaṇḍa is extremely difficult. I compared also the printed Prayogamālā of Veṅkaṭeśvara (Vol. II, fol. 36), the MS. I. O. 288, fol. 12, a very old MS., corrected, and the Gṛhyaprayoga according to the MS. of Burnell's collection. The MSS. have, of course, nowhere the avagraha.

[२] Thus only B and Pray. Mālā, मेरिमः the other MSS.

[३] Thus Bo, शल्पके IO, शल्मके H, शय्यके FT, शल्लके J, शंयके B, शंयुके Pray. M.

[४] Thus Bo, the other MSS. खेदो।

[५] Thus all except T which has स्वप्नः।

[६] प्रष्ठो॰ TB, IO, प्रोष्ठो F, प्रष्ठो Bo, प्रष्ठो H, प्रभो J. Perhaps ऽप्रष्ठा is to be read?

[७] Thus H; कदथुः IO, क्रंदथः Pray. M.; क्लदथुः the other MSS.

[८] Thus all except Pray. M.: हृदाकुनि. Probably हृदाकुर्नि is to be read.

मे स्वप्नो । ऽजगरे मे दुस्वप्नो । विद्युति मे श्मयशो[1] । लोभायां
मे क्लेदः । शलभे[2] मे पाप्मालक्ष्मी । स्त्रीषु मे ऽनृतमंजासु मे
कर्कशो । व्रात्ये म ईत्या । शूद्रे मे स्तेयं । वैश्ये मे ऽकामंकृत्यꣳ[3] ।
राजन्यबन्धुनि मे ऽज्ञानं । नैषादे मे ब्रह्महत्या । कुलिङ्गे मे
च्ववपुरुलखे[4] मे विलास । उद्रिणि मे वमनिः[5] । किंपुरुषे मे ५
रोदो । द्वीपिनि मे निष्टपद्धस्तिनि मे किलासः । शुनि मे
दुरिमꣳ । श्वावन्त्येषु[6] मे म्लेच्छो । विदेहेषु मे शौपथो[7] । महा-
वर्षेषु मे म्लौ । मूजवत्सु मे तक्मा । दुन्दुभौ मे कासिके । क्ष्वाकुषु[8] मे
पित्तं । कलिङ्गेषु मे ऽमेध्यमश्वतर्यां मे ऽप्रजस्ता । पुꣳश्चल्यां मे
दुश्चरितमाखुनि मे दन्तरोगो । मक्षिकायां मे श्वल्कशः[9] । १०
शुके मे हरिमा । मयूरे मे जल्प्या । वृषे मे जरा । चाषे मे
पापवादो । ऽप्सु मे श्रमो । ब्रह्मोज्झे मे किल्बिषमपेहि पाप्म-
न्पुनरपनाश्रितो भवा नः पाप्मन्त्सुकृतस्य लोके पाप्मन्धेह्यविहृतो[10]

---

[1] Thus Be BHT, श्मयश्रो F, श्मयसो J, श्मयशो Pray. M.

[2] Thus BJT Pray. M., Prayoga Burnell; शभे H, शरभे Be F, IO.

[3] Thus (without avagraha) Be BHJT; कामंकृत्यं F, Pray. M.

[4] Thus Be BJHT, IO, Pray.; उलुले F; कुलखे Pray. M.

[5] वमनिः Be BHFT, IO, Pray.; वमतिः J, Pray M. Is the word व्यवमतिः or a subst. connected with वमिति ?

[6] Thus Be BHFT, Pray., Pray. M.; स्वाव° J, IO.

[7] Thus Be JT; शौधथो F, शौपथुर् B, H uncertain, शिपथुः Pray., शपथो IO, पपथो Pray. M.

[8] Thus BT Pray., the other MSS. काश्यिके° ।

[9] Thus Be BJHF, सम्यशः T, स्वल्कुशः Pray. M.

[10] Without the least doubt the tradition of these verses according to the Baudhāyanius is corrupt. A comparison with Ath. Saṃh. VI. 26 proves that we ought to read अवकृतान् (comp. नः) instead of अविहृतो and जहाहि instead of जहाति ।

यो नः पाप्मन्न जहाति तमु त्वा जहिमो वयमन्यत्रास्मन्निविशताꣳ[१] सहस्राक्षो अमर्त्यो यो नो द्वेष्टि स रिष्यतु यमु द्विष्मस्तमु जहीत्यथाञ्जलिनाप उपहन्ति सुमित्रा न आप ओषधयः सन्त्विति । तां दिशमेवाप उत्सिञ्चति[२] यस्यामस्य दिशि द्वेष्यो भवति दुर्मित्रास्तस्मै भूयासुर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्य यथेतं प्रविशन्ति । ॥ ५ ॥ द्वितीयः ॥

अथेदमग्न्याधेयं । तस्य कः कर्मण उपक्रमो भवतीत्युक्तान्यृतुनक्षत्राण्युक्तमात्मनः पुरश्चरणं । कथमत्रानुपूर्व्यं[३] भवति । स्नानपवनमन्त्राचमनमन्त्रप्रोक्षणपुण्याहवाचनानि श्रद्धामाह्वयाकृत्या वेदनं कृत्वोपव्याहृत्यर्त्विजो[४] वृत्वार्हयित्वा देवयजनं याचित्वा देवयजनमादाय स्फ्यमादायान्तरेण वेद्युत्करावुद्देशेन प्रपद्य जघनेन गार्हपत्यं तिष्ठन्प्राचीनꣳ[५] स्फ्येन गार्हपत्यस्यायतनमुद्धन्त्युद्धन्यमानमस्या अमेध्यमप पाप्मानं यजमानस्य हन्तु । शिवा नः सन्तु प्रदिशश्चतस्रः शं नो माता पृथिवी तोकसातेत्यथैनदद्भिरवोक्षति शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु न इत्येवमेवान्वाहार्यपचनस्यायतनमुद्धन्त्येवमेवाहवनीयस्यैवमितरयोर्यदि करिष्यन्भवत्यथान्तरेण

---

[१] Thus Be HF, 10 ; the other MSS. ॰त्रास्मिन्नि॰ or ॰त्रास्मान्नि॰ ।

[२] Thus only B Be and partially T, cp. Pray. M. loc. cit. the other MSS. have this passage as infra IV. 7, s. f.

[३] Thus all except H, which has पूर्वं ।

[४] Thus BTJ, हृत्यार्त्विजो F, हृत्य ऋत्विजो Be H.

[५] Thus BT, the other MSS. प्राचीꣳ ।

वेद्युत्करादुद्देशेनोदङ्ङुपनिष्क्रम्य तां दिशं यन्ति यत्रास्य संभारा उपक्लृप्ता भवन्त्यपि वोत्तरेण शालायाः सर्वे संभारा उपक्लृप्ता भवन्त्यपि वान्तर्वेदि प्राचीनं तानानुपूर्व्यमेकैकꣳ संभारमेकैकेन यजुषा संभरति' वैश्वानरस्य रूपं पृथिव्यां परिस्रसा । स्योनमाविशन्तु न इति सिकताः संभृत्य निदधात्येवमेवोत्तर- ५
मुत्तरꣳ संभारमुत्तरेणोत्तरेण यजुषा संभृत्य संभृत्यैव[1] निदधात्यूषाश्च सिकताश्चाखूत्करं च वल्मीकवपां च सूदं च वराहविहतं च पुष्करपर्णं च शर्कराश्चेत्यष्टौ पार्थिवा' अथोत्तरेण यजुषा षड्भिरश्वशल्कानाहरत्यथ[2] वानस्पत्याभिर्वानस्पत्याः' शाखा आर्द्राः सपलाशाः सप्ररोहाः प्रादेशमात्रीरप्रतिशुष्काग्रा १०
आहरत्यपि वा यथालाभं' पर्णं द्वाभ्यां' चित्रियस्याश्वत्थस्य तिस्रः समिध आर्द्राः सपलाशाः सप्ररोहाः प्रादेशमात्रीरप्रतिशुष्काग्रा आहरति चित्रियादश्वत्थात्संभृता बृहत्यः शरीरमभिसꣳस्कृता स्थ । प्रजापतिना यज्ञमुखेन संमितास्तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्या इत्यथ मुञ्जकुलायमाहरति या त अग्न १५
ओजस्विनी तनूरोषधीषु प्रविष्टा । तां त इह संभरामीत्यथास्मा अरणी आहरत्याश्वत्थीꣳ शमीगर्भामप्यशमीगर्भां[3] वा

---

[1] Thus only BJ; संभृत्यसंभवत्येव Be; the other MSS. omit the second संभृत्य ।

[2] Thus B Be, शल्कन् T, शल्कानि F, शकलान् HJ.

[3] Thus Be F, Bh., Keś.; JTH both times with long vowel (शामी॰); B the first time with short, the second time with long vowel.

चतुरङ्गुलमुत्सेधां द्वादशाङ्गुलं[१] विस्तीर्णाꣳ षोडशाङ्गुलमायतामपि वा प्रादेशमात्रीꣳ सर्वतः समां चतुरङ्गुलमेवोत्सेधां[२]ˈ तस्या उत्तानाया अनुलोममधस्तात्प्रतीचीनप्रवणं प्रजननं कुर्वन्तिˈ तावतीमेवोत्तरारणिमथैने[३] आहरत्यश्वत्थाद्धव्यवाहाद्धि जातामग्नेस्तनूं यज्ञियाꣳ संभरामि । शान्तयोनिꣳ शमीगर्भमग्नये प्रजनयितवे ॥ यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा । तं ते हरामि ब्रह्मणा यज्ञियैः केतुभिः सहेत्यथैतान्सुसंभृतान्संभारान्पुनरेव संभरति यं त्वा समभरं जातवेदो यथा शरीरं भूतेषु न्यक्तम् । स संभृतः सीद शिवः प्रजाभ्य उरुं नो लोकमनुनेषि विद्वानितिˈ ॥ ६ ॥

अथ वै भवतीन्द्रो वृत्रꣳ हत्वासुरान्पराभाव्य सो ऽमावास्यां प्रत्यगच्छत्तं पितरः पूर्वेद्युरागच्छन्पितॄन्यज्ञो ऽगच्छत्तं देवाः पुनरयाचन्तˈ तत्तेभ्यो न पुनरददुस्ते ऽब्रुवन्वरं वृणामहा अथ वः पुनर्दास्यामो ऽस्मभ्यमेव पूर्वेद्युः क्रियाता इतिˈ तत्तेभ्यः पुनरददुस्तस्मात्पितृभ्यः पूर्वेद्युः क्रियतेˈ यत्पितृभ्यः पूर्वेद्युः करोति पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुत इति ब्राह्मणमथ यदि गां न लभते मेषमजं वा लभते ऽपि वा घृतमोदनं पक्त्वा तस्योपरिष्टात्प्रभूतमाज्यं पयो वानीय तस्मादेतत्सर्वं करोति यद्गवा कार्यंˈ विज्ञायते च धेन्वै वा एतद्रेतो

---

[१] MSS. द्वादशाङ्गुलविस्तो° but cp. Rudradatta on Āpast. śrs. V. 1. 2.

[२] एव om. BT.

[३] °रणीम° FJT.

यदाज्यं पयो वानडुहस्तण्डुला इति । गौरेवाङ्गसामान्यात्संप्रच्छन्ना[1] अम्बरीषं वोत्तपनीयं वाभिप्रव्रजन्त्यपि वौपासनमेवाभिप्रव्रजन्त्यर्धमौपासनं कुर्वन्ति सर्वं वा । ब्राह्मौदनिकमौपासनं कुर्वन्ति । सो ऽत्र वैव हि क्रियत इति । समानं कर्मा संभारनिर्वपनादथ तृतीयꣳ संभाराणां त्रेधा विभज्य सभ्याव- ५
सथ्ययोराहवनीये वा सभ्यावसथ्ययोः संकल्पः । समानं कर्मा समिदाधानात्पञ्चपञ्च नानावृक्षीयाः समिधो ऽभ्यज्यादधाति । कथमत्रानुपूर्व्यं भवत्यश्वत्थस्योदुम्बरस्य पर्णस्य शमी च विकङ्कतस्येत्येतदत्रानुपूर्व्यं भवति । कथम्नु खल्वैन्द्राग्नादित्ययोरन्त इत्यैन्द्राग्नादित्ययोरन्त[2] उदश्वपदिकꣳ सृजेत्ततो ऽन्यं दग्धहोमार्थ- १०
मुद्धरेदिति । तन्त्रसमास[3] एवैतदुपपद्यते नान्यत्र प्रणीतस्याग्नेर्लौकिकत्वाद्यस्मिन्होत्रा कृतꣳ [4]स्यात्सो ऽग्निः । कर्मान्तं[5] तस्य धारणमित्यपवृक्ते कर्मणि लौकिकः संपद्यते । प्रसिद्धानि तनूहवींꣳषि । प्रसिद्धा अग्न्याधेयदक्षिणा ददाति । तासेसाधिगच्छेद्यासाꣳ ह्येतावन्ति मन्थान्वौदनान्वैतावतो दद्यात्तेनो ह्येवैतं १५

---

[1] Thus HTJ; गौरेव सामान्यात् B; गौरेवांगसमान्यात् F; गौरेवांगसमासान्यात् Be.

[2] Thus only T; Be °योरंत्य (the first time); J कथमचैंद्राग्ना etc. as T; B om. इत्यै°न्त; H incomplete here; F इतींद्रा° instead of इत्यैन्द्रा° ।

[3] तंत्र or तन्त्र Be BTJ; तत्र HF.

[4] Thus HB Be; स्यात् om. T.

[5] अग्निकर्मा° FT.

कामममवाप्नोतीत्यप्येकां गां दक्षिणां दद्यादिति पैङ्गलायनिब्राह्मणं भवति । न लेवानाहिताग्निः स्याद्विज्ञायते[१] च देवानां वा एषो ऽन्यतमो य आहिताग्निरित्यथ यदस्याग्निमुद्धरति सहस्रं तेन कामदुघो ऽवरुन्द्धे । ऽथ यदग्निहोत्रं जुहोति सहस्रं तेनेत्यपरिमितमेवेदमुक्तं भवति[२] । ॥ ७ ॥ तृतीयः ॥

अथाग्न्याधेयस्योपवसथ इत्युपकल्पयते गां माꣳसलामहतं वासश्चतुर उदकुम्भाꣳस्त्रीनौदुम्बराञ्छूलानौदुम्बरीं[३] दर्वीमेकां वपाश्रपणीमविशाखामौदुम्बरीमेव सर्वानेवान्यान्स्थालीपाकात्पैतृयज्ञिकान्संभारानेरकोपबर्हणे[४] आञ्जनाभ्यञ्जने आज्यं तृणमुष्टिꣳ स्फ्यꣳ सूत्रमिति । दक्षिणत एतत्परिश्रितं भवति । तस्यैतस्मिन्परिश्रिते प्राङावृत्तस्य केशान्तं करोति तूष्णीं । त्रीणि दर्भपुञ्जीलान्युपनियत्य वपति वपे[५] प्रवपे[६] देवेन सवित्रा प्रसूतो ब्रह्मणा सꣳशितो ऽहं यानि म इत ऊर्ध्वं लोमानि तानि मे स्वस्तये सन्त्वित्यथैनमुप्तकेशश्मश्रु । [७]निकृत्तनखमुदकु-

---

[१] The words न ले° ... स्यात् are omitted by BT.

[२] Be HFJ repeat the last clause: त्यपरि° ... भवति; BT om. त्यपरिमितं।

[३] Thus Be H; °बराच्छडान् T; °बरांस्थूलान् BJ; °बराञ्छकलान् F.

[४] स्थालीपाकात् corrected acc. to Bh.; MSS. °कान्।

[५] Thus T, वपेत् the other MSS., also Keś.

[६] Thus F, प्रवपेत् the other MSS. except H, which omits the syllable पे. The yajuṣ seems to begin with वपे।

[७] Thus only Be, निकृत the other MSS.

न्नेनाभ्यवनयन्वाचयतीमा म आपः शिवाः सन्तु दुष्कृतं प्रवहन्तु मे। शुद्धाः प्रयुञ्जीमहि क्रतूनिति ˈ स्नातः प्राङुत्सृप्याहतं वासः परिधायालङ्कृत्याङ्क्ते ˈ ऽथैनमेकविꣳशत्या दर्भपुञ्जीलैस्त्रेधा विभक्तैः सप्तभिःसप्तभिस्तूष्णीं[1] पवयित्वोदपात्रमादायेमां दिशं नीत्वा चतुष्पथ एतस्मिन्नेवोदपात्रे ऽवेक्षमाणं पाप्मनो विनिधीन्वाचयति सिꣳहे मे मन्युर्व्याघ्रे मे ऽन्तरामय इत्यान्तमेतमनुवाकं निगद्य निनीयापः परास्य पात्रमनवेक्षमाणा आयन्ति ˈ हस्तपादान्प्रक्षाल्यैतेनैव यथेतमेत्य पवमानः सुवर्जन इत्येतमनुवाकं यजमानं वाचयन्नद्भिर्मार्जयत्वा ˈ[2]मात्यादित्यमादीप्यान्वाहार्यपचनवेलायाꣳ सादयित्वा शोधयित्वा बर्हिषा परिस्तीर्याज्यं विलाप्योत्पूयोत्तरत एतानुपसादयति[3] चतुर उदकुम्भाꣳस्त्रीनौदुम्बराञ्छूलानौदुम्बरीं[4] दर्वीमेकां वपाश्रपणीमविशाखामौदुम्बरीमेव दक्षिणतः सर्वानेवान्याञ्छालीपाकात्पैतृयज्ञिकान्संभारानेरकोपबर्हणे[5] आञ्जनाभ्यञ्जने आज्यं तृणमुष्टिꣳ स्फ्यꣳ सूत्रमिति ˈ दक्षिणतो ऽधिदेवनं करोति ˈ तदेकान्नपञ्चाशतो[6] ऽक्षान्निवपत्यथ[7] स्फ्यमादाय सकृदेव

---

[1] Before तूष्णीं T Be ins. चिह्।

[2] Thus Be HBT; त आमा॰ JF.

[3] ॰सादयंति BT.

[4] Thus BTH Be; स्थूलान् J; स्कलान् F.

[5] cp. page ४५, note ४.

[6] Thus Be FJ and Keś. sec. m.; एकस्मान्नपंचा॰ BT and Keś. pr. m.; एकस्मात्पंचा॰ H.

[7] Thus JFH; ॰पंत्यथ BT Be.

दक्षिणोद्धन्त्यपहता असुरा रक्षाꣳसि पिशाचा ये क्षयन्ति पृथिवीमनु । अन्यत्रेतो गच्छन्तु यत्रैषां गतं मन इत्यथैनदद्भिरवोक्षत्युदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्ते नो ऽवन्तु पितरो हवेष्विति ' ॥ ८ ॥

अथोल्मुकमादत्ते य आददानाः स्वधया नवानि पित्र्याणि रूपाण्यसुराश्चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टानस्मात्प्रणुनोतु[१] यज्ञादिति ' तेनोद्धतमभितपत्यग्निः पावकः सुदिनानि कृण्वन्नितो ऽसुरानुदताद्दूरमोकसः । पितॄणां ये वर्णं कृत्वेह भागमिच्छन्त इति ' तदत्रैव व्यन्तं करोति ' तस्मिन्नुल्मुक आज्यस्तोकं प्रश्चोतयति ' तद्दक्षिणाग्रं बर्हि स्तृणाति सकृदाच्छिन्नं बर्हिरूर्णाम्रदु स्योनं पितृभ्यस्त्वा भराम्यहम् । अस्मिन्त्सीदन्तु मे पितरः सोम्याः पितामहाः प्रपितामहाश्चानुगैः सहेत्यथ पितॄनावाहयत्युदीराणा इह सन्तु नः सोम्याः पितरः पितामहाः प्रपितामहाश्चानुगैः सह । असुंगमाः सत्ययुजो ऽवृकास आ नो हवं पितरो ऽद्यागमन्तु ॥ एह गच्छन्तु पितरो हविषे अत्तवे । अस्मिन्यज्ञे बर्हिष्यानिषद्य मा वीरः प्र मा युनगित्यथैभ्य एरकोपबर्हणे निवेदयत आसनꣳ शयनं चेमे तयोः सोम्यास आगताः । प्रिया जनाय नो भूत्वा शिवा भवत शंकरा इत्यथैभ्यः

---

[१] Corrected; प्रणुनोत्तु MSS.

पानान्याहरति[1] मधुपानं क्षीरपानꣳ सक्तुपानं यद्वा भवत्यन्यद्ब्राह्मणेभ्यो ददात्यन्यदुपनिनयत्येतद्वः पितरः पितामहाः प्रपितामहाः पानमित्येकैकेनोदकुम्भेन मार्जयति तूष्णीं । तदक्षान्यभ्युपविशन्ति चत्वारः पितापुत्राः । पिता पुरस्ताज्ज्येष्ठो दक्षिणतो ऽनुजः पश्चात्कनिष्ठ[2] उत्तरतो । द्वादशाक्षान्पिता 5
प्रच्छिनत्ति । तद्विजयते । द्वादश ज्येष्ठस्तद्विजयते । द्वादशानुजस्तद्विजयते । ऽथ ये ऽतिशिष्यन्ते तान्कनीयाꣳसमुपसमूहन्त्यथ[3] यदि द्वौ भवतो द्विरायामः पिताथ यद्येको जाया तृतीयाथ यदि नैव भवन्त्युभौ द्विरायामौ जायापती । एष एव त्रिषु न्याय । एष एव[4] द्वयोः । कृतं कृतमित्येव[5] 10
व्यपगच्छन्ति । सूता गौरित्युक्त्वोत्तिष्ठन्त्यथैभ्यो बर्हिरादाय गामुपाकरोति पितृभ्यस्त्वा पितामहेभ्यस्त्वा प्रपितामहेभ्यस्त्वा जुष्टामुपाकरोमीति । तूष्णीमित्येके । ऽथैनामद्भिः प्रोक्षति पितृभ्यस्त्वा पितामहेभ्यस्त्वा प्रपितामहेभ्यस्त्वा जुष्टां प्रोक्षामीति । तूष्णीमित्येके । तामत्रैव प्रतीचीनशिरसीं[6] दक्षिणा- 15
पदीꣳ संज्ञपयन्ति । तस्यै संज्ञप्ताया अद्भिरभिषेकं प्राणानाप्याययति तूष्णीं । तूष्णीं वपामुत्खिद्य हृदयमुद्धरति प्रज्ञा-

---

[1] Thus BF and Keś. sec. m.; न्याहारयति Be HJ, Keś. pr. m.; न्याहारानयति T.

[2] Thus B Be J and Keś.; कनिष्ठ H; कनीयान् the other MSS.

[3] Thus TBJ, the other MSS. more or less corrupt.

[4] एव only in B Be H Bh.

[5] एव B Be HF, एवं TJ.

[6] Thus all the MSS.

तानि चावदानानि प्रज्ञातौ च मतस्नू[1] तान्येतेष्वेव शूलेषूपनिष्यैतस्मिन्नेवाग्नौ[2] श्रपयन्ति । शृतायां वपायां पञ्च स्रुवाहुतीर्जुहोति ॥ ९ ॥

याः प्राचीः संभवन्त्याप उत्तरतश्च याः । अद्भिर्विश्वस्य भुवनस्य धर्त्रीभिरन्तरन्यं पितुर्दधे स्वधा नमः स्वाहा ॥ अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या । दिवा दिग्भिरनन्ताभिरूतिभिरन्तरन्यं पितामहाद्दधे स्वधा नमः स्वाहा ॥ अन्तर्दध ऋतुभिः सर्वैरहोरात्रैः सुसन्धिकैः । अर्धमासैश्च मासैश्चान्तरन्यं प्रपितामहाद्दधे स्वधा नमः स्वाहा ॥ यन्मे माता प्रलुलोभ चरत्यननुव्रता । तन्मे रेतः पिता वृङ्क्तामाभुरन्योपपद्यताꣳ स्वधा नमः स्वाहा ॥ यदः क्रव्यादङ्गमदहल्लोकान्नयन्प्रणयञ्जातवेदाः । तद्वो ऽहं पुनरावेशयाम्यरिष्टाः सर्वैरङ्गैः संभवत पितरः स्वधा नमः स्वाहेति । त्रेधा वपां विच्छिद्यौदुम्बर्या दर्व्या जुहोति सोमाय पितृमते शुष्मिणे जुहुमो हविः । वाजिन्निदं जुषस्व नः स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहा ॥ अङ्गिरस्वन्तमूतये यमं पितृमन्तमाहुवे । वैवस्वतेदमद्धि नः स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहा ॥ यदग्ने कव्यवाहन पितॄन्यक्ष्यृतावृधः । प्र देवेभ्यो वहा[3] हव्यं पितृभ्यश्च स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहेति ।

---

[1] Thus all the MSS.

[2] Thus only TJ, the other MSS. corrupt; comp. Baudh. gṛhs. I. 1.

[3] वच BF.

तूष्णीं दर्वीमभ्याधाय पिण्डानामावृतैतान्यवदानानि ददाति हृदयमेवाग्रे ऽथ सव्यं मतस्नमथ दक्षिणमेतत्ते ततासौ ये च त्वामनु याꣳश्च त्वमत्रान्वस्येषा[1] ते तत स्वधाचितिर्यावती पृथिवी तावती ते मात्रा तावतीं त एतां मात्रां भूतां ददामि पृथिव्या मितमसि तताय मा क्षेष्ठा इति । द्वितीयं ददात्येतत्ते पितामहासौ ये च त्वामनु याꣳश्च त्वमत्रान्वस्येषा ते पितामह स्वधाचितिर्यावदन्तरिक्षं तावती ते मात्रा तावतीं त एतां मात्रां भूतां ददाम्यन्तरिक्षेण मितमसि पितामहाय मा क्षेष्ठा इति । तृतीयं ददात्येतत्ते प्रपितामहासौ ये च त्वामनु याꣳश्च त्वमत्रान्वस्येषा ते प्रपितामह स्वधाचितिर्यावती द्यौस्तावती ते मात्रा तावतीं त एतां मात्रां भूतां ददामि दिवा मितमसि प्रपितामहाय मा क्षेष्ठा इत्यथ पितरो यथाभागं मन्दध्वमित्युक्त्वैकेनोदकुम्भेन मार्जयति तूष्णीमथैभ्यो गामुपपरेत्य लोहितमुपप्रवर्तयति यानि रक्षाꣳस्यसृग्भागानि ये चापि पितरो हरन्तो विहरन्तो तृप्यन्तु रुधिरस्य ते ॥ ये नः पतिता गर्भा असृग्भाज उपासते । तेभ्यः स्वजा स्वधा नमस्तृप्णुवन्तु मदन्तु च ॥ य आमा ये च[2] पक्का ये च दुष्टाः पतन्ति नः । तेभ्यः स्वजा स्वधा नमस्तृप्णुवन्तु मदन्तु च ॥ ये कुमारा या स्त्रियो

---

[1] Here and in the corresponding passages further on the MSS. have ॰न्वस्यैषा instead of ॰न्वस्येषा ।

[2] om. BT and two MSS. of the gṛhya-sūtra.

ये ऽविज्ञाताः पतन्ति नः । तेभ्यः स्वजा स्वधा नमस्तृप्णुवन्तु मदन्तु चेत्यागत्याञ्जनं ददात्यथाभ्यञ्जनं ददात्यथ वसाꣳसि ददात्यथ षड्भिर्नमस्कारैर्विपर्यासमुपतिष्ठते ऽथ वीरं याचते ऽथैनानुत्थाप्य प्रवाह्य तिसृभिर्मन आह्वयते मनो न्वाहुवामह आ न एतु मनः पुनः पुनर्नः पितरो मन इत्यथैतदहतं वास एवंविदे ब्राह्मणाय दत्त्वान्यदसनीयं[1] वासः परिधाय दक्षिणोपपरेत्याद्भिर्मार्जयते ॥ १० ॥

यासु गन्धा रसा वर्णा बलं च निहिते[2] उभे । ता म आपः शिवाः सन्तु दुष्कृतं प्रवहन्तु मे ॥ या ऊर्जमभिषिञ्चन्ति देवप्रेषिता महीम् । ता म आपः शिवाः सन्तु दुष्कृतं प्रवहन्तु मे ॥ यासां निष्क्रमणे सर्वमिदं जायते जगत् । ता म आपः शिवाः सन्तु दुष्कृतं प्रवहन्तु मे ॥ यासामिमे त्रयो लोकास्तेजसा यशसावृताः । ता म आपः शिवाः सन्तु दुष्कृतं प्रवहन्तु मे ॥ याः प्राचीर्या दक्षिणा याः प्रतीचीर्या उदीचीर्या ऊर्ध्वा रेवतीर्मधुमतीरापः स्रवन्ति शुक्राः । ता म आपः शिवाः सन्तु दुष्कृतं प्रवहन्तु म इत्यथैतदसनीयं वासो विसृज्यान्यत्परिधाय प्राजापत्ययर्चाग्निरुदेति प्रजापते न त्वदेतान्यन्य इत्यथोल्मुकमपिसृजत्यभूद्दूतो[3] हविषो जातवेदा

---

[1] Thus H Be J ; वसनीयं the other MSS.

[2] Thus Be HTF ; निचिहिते B ; निहितेतु J.

[3] Thus HBTJ Be ; F reads with Āp. Hir. Bhār. the mantra with नो ।

~~14426~~ 14434.

अवाङ्व्यानि सुरभीणि कृत्वा । प्रादाः[१] पितृभ्यः स्वधया ते अक्षन्प्रजानन्नग्ने पुनरप्येहि देवानित्यथैतान्यवदानानि ब्राह्मणेभ्यो ददाति हृदयमेवाग्रे ऽथ सव्यं मतस्नमथ दक्षिणं यथाङ्गमेवं कुरुते । गामेतामष्टम्यः कृत्वा ब्राह्मणेभ्यो वरं[२] ददाति । स[३] ये ह के चैतस्यै मांसं लभन्ते सर्वे ह वा अस्यै ते गोभाजश्रो भवन्त्यामात्ये[४] जयानभ्यातानान्राष्ट्रभृत इति हुत्वामात्यहोमाञ्जुहोत्येष ह वा उपवसथ । उप ह्यस्मिन्देवा वसन्ति प्रातर्जुह्यामो वामं वस्वित्येतद्ध वै देवानां वामं वसु यदाग्नेयो ऽष्टाकपाल । उप हैनं वामं वसु गच्छति यस्य ह वा एतामेवंविद्वानष्टकां कल्पयते[५] । सर्वं पाप्मानं तरति । तरति ब्रह्म- १० हत्यामप पुनर्मृत्युं जयतीति होवाच प्रजापतिस्तानि ह वा एतानि कूष्माण्डानीत्याचक्षते काजवानीति[६] वामात्यहोमा इति वातीमोचा[७] इति वा । स यत्किं चास्मिंल्लोके पापं

---

[१] प्रादात् Be only. [२] om. Bo H.

[३] Thus T only; F ददाति स ये हैकेचैतस्यै; B Bo H: ददात्ययेचयेके-चैतस्यै; J ददातियेचकेचैतस्यै; Bh. reads *with* स।

[४] Thus T; B: गोभाजश्रो भवंसमात्ये; FH: गोभागश्रोभव (*or* वं) त्समात्ये; J: गोभाजोनस्मिन्नेवाग्नौभवंत्याजश्रोमात्ये; Be presents the same reading as T, but चमात्ये instead of चामात्ये।

[५] Thus B Be TH, the other MSS. कल्पयति।

[६] Uncertain. The above given is the reading of T; काजपानीति J; काजपानिति F; काजयानीति HB Be; probably Maitr. S. II. 1. 4 काजवं is to be compared.

[७] Thus TJF; वातिमोचा B Be H.

कर्म करोति सर्वस्मात्तस्मान्निर्मुच्यानृणः स्वर्गं लोकमेतीति
होवाच प्रजापतिः ˈ ॥ ११ ॥ चतुर्थः ॥

अग्नीनाधास्यमानो भवति स उपकल्पयत ऊषांश्च सिकता-
ताश्चाखूत्करं च वल्मीकवपां च सूदं च वराहविहतं च
५ पुष्करपर्णं च शर्कराश्चेत्यष्टौ पार्थिवा ˈ अथ वानस्पत्या
अश्वत्थस्योदुम्बरस्य पर्णस्य शमी च विकङ्कतस्याशनिहतस्य
शमीगर्भावरणी[1] मुञ्जकुलायं चित्रियस्याश्वत्थस्य तिस्रः समिध
आर्द्राः सपलाशाः सप्रारोहाः प्रादेशमात्रीरप्रतिशुष्काग्राः
षड्ढिरण्यशल्काꣳस्त्रीन्सौवर्णाꣳस्त्रीन्राजतानश्वं पूर्ववाहꣳ रथचक्रं
१० ब्राह्मौदनिकान्व्रीहीन्सर्वौषधꣳ रोहितं चर्मानडुहं नवानि
यज्ञपात्राणीत्यथास्मा[2] अरणी आहरति यो अश्वत्थः शमीगर्भ
आरुरोह त्वे सचा । तं ते हरामि ब्रह्मणा यज्ञियैः केतुभिः
सहेत्यथातो नक्षत्राणामेव मीमाꣳसा ˈ कृत्तिकास्वग्निमा-
दधीत ˈ रोहिण्यामग्निमादधीत ˈ पुनर्वस्वोरग्निमादधीत ˈ
१५ पूर्वयोः फल्गुण्योरुत्तरयोः फल्गुण्योश्चित्रायामित्यथात ऋतूना-
मेव मीमाꣳसा ˈ वसन्ते ब्राह्मणोऽग्निमादधीत ˈ ग्रीष्मे
राजन्यः ˈ शरदि वैश्यो ˈ वर्षासु रथकार इत्यथो खलु
यदैवैनꣳ[3] श्रद्धोपनमेदथादधीत ˈ सैवास्यर्द्धिरिति ˈ तदेतदा-

---

[1] Thus B Be HF ; शामी॰ TJ.

[2] इति om. JF (H is defect here).

[3] Thus BT Keś. : यदेवैनꣳ JHF Be, but cp Sāyaṇa on T. Br. I. 1 2. 8 (page 13 of the commentary).

र्तस्यातिवेलं वा श्रद्धायुक्तस्याय[1] वै ब्राह्मणं भवति यो रोहिण्यामग्निमाधत्त[2] ऋध्नोत्येव सर्वान्रोहान्रोहतीति । सा या वैशाख्याः पौर्णमास्या उपरिष्टादमावास्या भवति सा सकृत्संवत्सरस्य रोहिण्या संपद्यते तस्यामादधीतेत्यथास्यैतत्पुरस्तादेव जुष्टे देवयजने ऽगारं वा विमितं वा कारितं भवति । तस्य द्वे द्वारौ कुर्वन्ति प्राचीं च दक्षिणां च । मध्ये गार्हपत्यस्यायतनं कुर्वन्ति । पुरस्ताद्द्वादशसु विक्रामेष्वा[3]हवनीयस्यापि वा चतुर्निमिते । दक्षिणतो विषुवत्यन्वाहार्यपचनस्यापि वा यथा द्वौ भागौ प्राक् स्यातामेकः पश्चादित्येवं । अथोद्धृत्यावोक्ष्य केशश्मश्रु वपते । नखानि निकृन्तत । एवं पत्नी केशवर्जमुभौ मानुषेणालङ्कारेणालङ्कृतौ भवतो ऽहतवाससावथाभ्यां व्रतोपायनीयं पाचयति[4] । तस्याश्नितौ भवतः सर्पिर्मिश्रस्य पयोमिश्रस्य । ॥ १२ ॥

अथाधिवृक्षसूर्ये याचति सर्वौषधमाज्यस्थालीꣳ स्रुवꣳ स्रुचं बर्हिर्वासो दीप्याङ्ककलावित्येतत्समादाय संप्रच्छन्ना अम्बरीषं वोत्तपनीयं वाभिप्रव्रजन्ति । तस्मिन्दीप्याङ्ककलावसंप्रकीर्य बर्हिषा परिस्तीर्याज्यं विलाप्योत्पूयाञ्जलिनोपस्तौ-

---

[1] Thus J (omitting एतद्) and H; T: आर्तस्यवातिवेलंवाश्रद्धायुक्तस्याय; B Be F: °तिवेलं (or लायां) श्रद्धायुक्तस्यादय।

[2] Thus HJT; आदधीत the other MSS.

[3] Thus BJT (the last विक्रामि°); विक्रमे° FH Be.

[4] Thus Be HJ; वाचयति T (grantha!) and F; पाचपति B.

र्णाभिघारितꣳ सर्वौषधं जुहोत्यग्नये सर्वौषधाय पुष्ट्यै प्रजननाय स्वाहेत्यथ जयानभ्यातानान्राष्ट्रभृत इति हुत्वामात्यहोमाञ्जुहोत्यथ स्रुचि चतुर्गृहीतं गृहीत्वा प्राजापत्यां जुहोति प्रजापते न त्वदेतान्यन्य इत्यपरं चतुर्गृहीतं गृहीत्वानुख्यां जुहोत्यन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः। अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततान स्वाहेत्यथैतानङ्गारान्सते वा शरावे वा यजमानो गृह्णात्यायुषे वो गृह्णामि तेजसे वो गृह्णामि तपसे वो गृह्णामि[१] वीर्याय वो गृह्णामि ब्रह्मवर्चसाय वो गृह्णामीत्यथैनानादायोपोत्तिष्ठत्यायुर्मामाविशतु भूतिर्मामाविशतु ब्रह्मवर्चसं मामाविशत्विति। तानध्वर्यवे संप्रदायोदायन्त्यन्वारब्धे यजमान। एतेनैव यथेतमेत्योत्तरेणागारं परीत्य[२] पूर्वया द्वारा प्रपाद्य गार्हपत्यस्यायतने न्युप्योपसमादधाति। परिस्तृणन्ति। दक्षिणत उपविशतो ब्रह्मा च यजमानश्चाथैतद्रोहितं चर्मानडुहं जघनेनाग्निं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति। तस्य वहसः काले चतुरः पात्रान्व्रीहीन्निर्वपति[३] ब्रह्मणे जुष्टं निर्वपामीति वा तूष्णीं वाथ निरुप्तानभिमृशत्याकूत्यै त्वा कामाय त्वा समृधे[४] त्वेत्यथैतान्व्रीहीङ्कूपे समुप्याद्भिरभ्युक्ष्य चर्मोदूहत्यथैतस्मिन्नेव[५]

---

[१] Before वीर्याय B ins.: ओजसे वो गृह्णामि। [२] प्रतीत्य B Be.

[३] T and Ke's, perhaps rightly, व्रीहीणां i. s. of व्रीहीन्।

[४] Thus all except T, which has समृत्यै, but cp. T. Br. II. 5. 3. 2.

[५] उद्दुहति B.

चर्मण्युलूखलमुसले निधायावहन्त्यथैतेनैव पात्रेण चतुर उदपात्रानानयति यदि वीडिता स्थाली भवति । यद्यु वा अवीडिता पञ्च वा भूयसो वा । स समोदकः संपद्यते । ॥१३॥

तं य एव कश्च[1] कुशलः परीन्खेन[2] श्रपयित्वाभिघार्योदञ्चमुद्वासयत्यथैनमायतिगव[3] ऋत्विग्भ्यः प्राञ्चमुपसंगच्छन्त एनमेत ऋत्विजो[4] । ऽथैतां पात्रीं निर्णिज्योपस्तीर्य तस्यामेनमसंघ्नन्निवोद्धरति । सर्पिरासेचनं कृत्वा प्रभूतमाज्यमानीयाथैतस्यैवौदनस्योपघातं[5] जुहोत्युपतिष्ठते वा प्र वेधसे कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे । यतो भयमभयं तन्नो अस्त्वव देवान्यजे हेड्याꣳस्वाहेत्यथैताꣳश्चतुर आर्षेयानुत्तरतो ऽनुदिशमुपवेश्यताननुपूर्वमाचमय्य[6] तेभ्य एनं भूमिꣳ स्पृशन्नुच्छिन्दन्निवोपोहति । त्रिः प्राश्य प्रशꣳसन्ति[7] राद्धस्ते ब्रह्मौदन इति । तेभ्यः साण्डं वत्सतरं ददात्यथैष उत्तरत आसीनो ब्राह्मणः चामकाषं प्राश्नाति । तस्मै यदस्योपकल्पते[8] तद्ददात्यथ

---

[1] कश्चन B Be and Keś.; कश्चित् T; कश्च the other MSS.

[2] Thus HJ Be; परीषेन B; परिखेन T; परिषेन F.

[3] Thus H Bh., Keś.; आयतिगवम् B; आयतीमव Bo J; आयतिगवे काले F; आयतिगं T.

[4] Thus Be F; एतदृत्विजो HBJ; T om. एत ।

[5] Thus H; ॰ओदन॰ the other MSS.

[6] अनुपूर्व्यम॰ J.

[7] Thus H Be T F, Keś.; प्रशꣳसति the other MSS.

[8] Thus F only; the other MSS. ॰कल्पयते ।

यदाज्यमुच्छिष्यते तेन समिधो ऽभ्यज्यादधाति समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन्हव्या जुहोतन स्वाहा॥ उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत। जुषस्व समिधो मम स्वाहा॥ तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य स्वाहेति। गायत्रीभिर्ब्राह्मणस्य त्रिष्टुब्भी राजन्यस्य जिघर्म्यग्निमा त्वा जिघर्म्यायुर्दा अग्ने हविषो जुषाण इति जगतीभिर्वैश्यस्य जनस्य गोपा अजनिष्ट जागृविस्त्वामग्ने मानुषीरीडते विशः सप्त ते अग्ने समिधः सप्त जिह्वा इति। समित्सु वत्सतरीं ददाति। ॥ १४॥

अथास्मा अरणी प्रयच्छन्नाह वाचंयमो भविष्यसि सꣳस्थाधि यत्ते सꣳस्थिष्यमिति। स आह ब्राह्मणानाशयताश्वं गोपायत संभारान्निधत्तेति। तस्य सुभिक्षमग्न्याधेयं भवति। साग्न्याधेयस्य समृद्धिस्तदाहुर्नाग्न्याधेये गां कुर्वीत घोररूपमिति। कुर्वीतैवापि[1] त्वेव न कुर्वीतापि वक्रीरपि कुर्वीतान्वेतस्य भवेत्पुण्या प्रशꣳसेति कात्यो[2]। ऽथास्मा अरणी प्रयच्छति। ते प्रतिगृह्णाति मही विश्पत्नी सदने ऋतस्यार्वाची एतं धरुणे रयीणाम्। अन्तर्वत्नी जन्यं जातवेदसमध्वराणां जनयथः पुरोगाम्॥ आरोहतं दशतꣳ शक्वरीर्ममर्तेनाग्न आयुषा वर्चसा सह। ज्योग्जीवन्त उत्तरामुत्तराꣳ समां दर्शमहं पूर्णमासं यज्ञं यथा यजा इत्यथैने उपनिगृह्णात्यृत्विय-

---

[1] Thus JFH Bc; कुर्वीतेवापि B; T totally corrupt.

[2] cp. Dvaidha I, 16.

वती स्थो अग्निरेतसौ गर्भं दधाथां ते वामहं ददे । तत्सत्यं यद्वीरं बिभृथो वीरं जनयिष्यथः । ते मत्प्रातः प्रजनिष्येथे ते मा प्रजाते प्रजनयिष्यथः । प्रजया पशुभिर्ब्रह्मवर्चसेन सुवर्गे लोक इत्यथैनमनृतात्सत्यमुपनयति मानुषाद्दैव्यमुपनयतीदमहमनृतात्सत्यमुपैमि मानुषाद्दैव्यमुपैमि दैवीं वाचं यच्छामीति । तं वाचंयमꣳ रात्रिं जागरयन्त आसते । शल्कैस्ताꣳ रात्रिमग्निमिन्धते शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम् । उभयोर्लोकयोर्ऋद्ध्वाति मृत्युं तराम्यहमित्युत्तरेण गार्हपत्यस्यायतनं कल्माषमजं बध्नाति तेनैनमाधास्यमानꣳ संख्यापयति प्रजा अग्ने संवासयाशाश्च पशुभिः सह । राष्ट्राण्यस्मा आधेहि यान्यासन्सवितुः सव इति । ॥ १५ ॥

पञ्चमः[१] ॥

अथाध्वर्युरपररात्र आहृत्यारणी निष्टपति जातवेदो भुवनस्य रेत इह सिञ्च तपसो यज्जनिष्यते । अग्निमश्वत्थादधि हव्यवाहꣳ शमीगर्भाज्जनयन्यो मयोभूः ॥ अयं ते योनिरृत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोहाथा नो वर्धया रयिमित्यथैतमग्निꣳ सते समुप्य दक्षिणतो ज्वलयन्त आसते ।

---

[१] According to Bhavasvāmin, who divides our second *praśna* in two parts (the second beginning after khaṇḍa 11), the adhyāya number is प्रथमः; the khaṇḍa number according to T, which has the same division, is 4, in B: 16, but the adhyāya number here also is प्रथमः

ऽथैतान्यग्न्यायतनानि शकृत्पिण्डेन परिलेपयत्यथ तृतीयꣳ संभाराणामादाय गार्हपत्यस्यायतने निवपति यत्पृथिव्या अनामृतꣳ संबभूव त्वे सचा। तदग्निरग्नये ऽददात्तस्मिन्नाधीयतामयमिति ' स यत्रोषानुपाधिगच्छति तज्जपति यददश्चन्द्रमसि कृष्णं तदपीहेत्यथैनानादधाति दिवस्त्वा वीर्येण पृथिव्यै महिम्ना। अन्तरिक्षस्य पोषेण सर्वपशुमादध इत्यथैनान्संप्रयौति सं वः सृजामि हृदयानि सꣳसृष्टं मनो अस्तु वः। सꣳसृष्टः प्राणो अस्तु वः॥ सं या वः प्रियास्तनुवः संप्रिया हृदयानि वः। आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो ममेत्यथैनान्कल्पयति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः। कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः॥ ये ऽग्नयः समनसो ऽन्तरा द्यावापृथिवी। वासन्तिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्त्वित्यथातिशिष्टानाꣳ संभाराणामर्धानादाय दक्षिणया द्वारोपनिर्हृत्यान्वाहार्यपचनस्यायतने निवपति यदन्तरिक्षस्यानामृतꣳ संबभूव त्वे सचा। तद्वायुरग्नये ऽददात्तस्मिन्नाधीयतामयमिति ' स यत्रोषानुपाधिगच्छति तज्जपति यददश्चन्द्रमसि कृष्णं तदपीहेति। तथादधाति ' तथा संप्रयौति ' तथा कल्पयत्यथैतेनैव यथेतमेत्यातिशिष्टान्संभारानादाय पूर्वया द्वारोपनिर्हृत्याहवनीयस्यायतने निवपति यद्दिवो ऽनामृतꣳ संबभूव त्वे सचा ' तदादित्यो ऽग्नये ऽददात्तस्मिन्नाधीयतामयमिति ' स यत्रोषानुपाधिगच्छति तज्जपति यददश्चन्द्रमसि कृष्णं तदपीहेति '

तथादधाति । तथा संप्रयौति । तथा कल्पतत्यथ गोप्तारꣳ समादिशति । स आह विहृता अग्नयो मा कश्चनान्तरेण संचारीदित्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य[1] गार्हपत्यस्यायतन उपरि संभारेषु मुञ्जकुलायं निदधाति । तस्मिन्प्रतीचीनप्रजननामरणिं[2] निधाय दक्षिणोत्तरारणिमवदधाति । स आह मन्थतेति । यजमानः प्रथमो मन्थति । यजमान उत्तमो मन्थति । जनयति । जाते वरं ददामीति वाचं विसृजते । ऽथैनमुपतिष्ठते ऽजीजनन्नमृतं मर्त्यासो ऽस्रेमाणं तरणिं वीडुजम्भम् । दश स्वसारो अग्रुवः समीचीः पुमाꣳसं जातमभिसꣳरभन्तामित्यथैनमभिप्राणिति प्रजापतेस्त्वा प्राणेनाभिप्राणिमि पूष्णः पोषेण मह्यम् । दीर्घायुत्वाय शतशारदाय शतꣳ शरद्भ्य आयुषे वर्चसे जीवात्वै पुण्याय ॥ प्राणे त्वामृतमादधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्या इत्यथोद्गातारमाह रथन्तरं ब्रूहीत्यथैनमादधाति । भूर्भुवो घर्मः शिरस्तादयमग्निः संप्रियः पशुभिर्भुवत् । छर्दिस्तोकाय तनयाय यच्छ ॥ भृगूणां त्वाङ्गिरसां व्रतपते व्रतेनादधामीति भृग्वङ्गिरसामादध्यादादित्यानां त्वा देवानां व्रतपते व्रतेनादधामीत्यन्यासां ब्राह्मणीनां प्रजानां । वरुणस्य त्वा राज्ञो व्रतपते व्रतेनादधामीति राज्ञ । इन्द्रस्य त्वेन्द्रियेण व्रतपते व्रतेनादधामीति राजन्यस्य । मनोस्त्वा ग्रामण्यो व्रतपते व्रतेना-

---

[1] After ङ्ङाद्रुत्य HFJ ins. जघनेन

[2] Instead of ऽरणिं B has ऽधरारणिं, Be ऽधरारणीं, H ऽरणीं

दधामीति वैश्यस्य । ऋभूणां त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्येति । यथर्षि यथागोत्रं । गायत्रेण छन्दसेत्युत्तरतो हिरण्यशल्कमुपास्यति स्वया तनुवा संभवेत्यथैतꣳ राजतं वृषलाय वाज्ञाताय वातिप्रयच्छत्यार्तिमेवातिप्रयच्छतीति ब्राह्मणमथैनमुपतिष्ठते अहं त्वदस्मि मदसि त्वमेतन्ममासि योनिस्तव योनिरस्मि। ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेदः॥ सुगार्हपत्यो विदहन्नरातीरुषसः श्रेयसीःश्रेयसीर्दधत्। अग्ने सपत्नाꣳ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहीति । ॥ १६ ॥

अथैतमग्निमाददते य एष सते समुप्तो भवति । तं दक्षिणया द्वारोपनिर्हृत्यान्वाहार्यपचनमादधाति भूर्भुवो वातः प्राणस्तदयमग्निः संप्रियः पशुभिर्भुवत्। स्वदितं तोकाय तनयाय पितुं पच॥ अमीषां त्वा देवानां व्रतपते व्रतेनादधामीति । यथर्षि यथागोत्रं । गायत्रेण छन्दसेत्युत्तरतो हिरण्यशल्कमुपास्यति स्वया तनुवा संभवेत्यथैतꣳ राजतं वृषलाय वाज्ञाताय वातिप्रयच्छत्यार्तिमेवातिप्रयच्छतीति ब्राह्मणमपि वा गार्हपत्यादेवान्वाहार्यपचनमादधाति । प्रजापतिरग्निमसृजत सो ऽबिभेत्प्र मा धक्ष्यतीति तस्य त्रेधा महिमानं व्यौहच्छान्त्या अप्रदाहायेत्येतस्माद्ब्राह्मणादथैनमुपतिष्ठत इमा उ मामुपतिष्ठन्तु राय आभिः प्रजाभिरिह संवसेय। इहो इडा तिष्ठतु विश्वरूपी मध्ये वसोर्दीदिहि जातवेद इत्यथैतेनैव यथेतमेत्याभ्यादधातीध्मं प्रणयनीयं । तं

तथाभ्यादधाति यथा मन्यते ऽर्धोदिते सूर्य आहवनीय[1] आधीयमानः संपत्स्यत इति | तस्य तथा संपद्यत | उपोपयमनीः कल्पयन्त्यश्व एष पूर्ववाट् पल्पूलितः पुरस्तात्तिष्ठत्यथोद्गातारमाह वामदेव्यं ब्रूहीत्यथैनमुद्यच्छत ओजसे बलाय त्वोद्यच्छे वृषणे शुष्मायायुषे वर्चसे । सपत्नतूरसि वृत्रतूः ॥ यस्ते देवेषु महिमा सुवर्गो यस्त आत्मा पशुषु प्रविष्टः । पुष्टिर्या ते मनुष्येषु पप्रथे[2] तया नो अग्ने जुषमाण एहि ॥ दिवः पृथिव्याः पर्यन्तरिक्षाद्वातात्पशुभ्यो अध्योषधीभ्यः । यत्रयत्र जातवेदः संबभूथ ततो नो अग्ने जुषमाण एहीतीयत्यग्रे हरत्यथेयत्यथेयत्यधोऽधः शिरो हरतीति ब्राह्मणमाददान एवैता मात्रा अभिसंपादयेदित्येतदपरमश्वं पूर्वं नयन्ति | तमनुमन्त्रयते प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह । विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पद इति | विषुवत्युपरमन्ति विक्रमस्व महाँ असि वेदिषन्मानुषेभ्यस्त्रिषु लोकेषु जागृहीत्यथोपातियन्त्यन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततानेत्यथैतेनाश्वेन प्राचोत्तरतः पार्श्वतः संभाराणामाक्रमयति यथाहितस्याग्नेरङ्गारा अभ्यववर्तेरन्नित्यथैनं प्रदक्षिणमावर्त्याद्भिरभ्युक्ष्योदञ्चमुत्सृजंति[3] | स एषो ऽध्वर्योर्भवत्यन्यं ब्रह्मणे ददात्यथ

---

[1] om. T. [2] पप्रथे B Bo H. [3] आवर्त्य FIIJ, आहत्य B Bo T.

प्रदक्षिणमावृत्येध्मं प्रतिष्ठापयति यदिदं दिवो यददः पृथिव्याः संविदाने रोदसी संवभूवतुः । तयोः पृष्ठे सीदतु जातवेदाः शम्भूः प्रजाभ्यस्तनुवे स्योनः ॥ प्राणं त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्या इत्यथोद्गातारमाह वृहद्वारवन्तीयꣳ श्यैतमिति[1] गायेति ' सर्वाणि संप्रेष्यति[2] ' वृहति गीयमान आहवनीयमादधाति भूर्भुवः सुवरर्कश्चक्षुस्तदसौ सूर्यस्तदयमग्निः संप्रियः पशुभिर्भुवत् । यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः शुक्रं ज्योतिरजस्रं तेन मे दीदिहि तेन त्वादधेऽग्निनाग्ने ब्रह्मणा अमीषां त्वा देवानां व्रतपते व्रतेनादधामीति ' यथर्षि यथागोत्रं ' गायत्रेण छन्दसेत्युत्तरतो हिरण्यशल्कमुपास्यति स्वया तनुवा संभवेत्यथैतꣳ राजतं वृषलाय वाऽज्ञाताय वातिप्रयच्छत्यार्तिमेवातिप्रयच्छतीति ब्राह्मणमथैनमुपतिष्ठत आनशे व्यानशे सर्वमायुर्व्यानश इत्यथैतावग्नी आदधाति सभ्यं चावसथीयं च[3] ' रथचक्रं प्रवर्तयति संततं[4] गार्हपत्यादाहवनीयात् ' ॥ १७ ॥

सर्वौषधेन व्याहृतीभिरग्नीन्क्रमयित्वा[5] पञ्चपञ्च नानावृक्षीयाः समिधोऽभ्यज्याभिदधाति समिध्यमानः प्रथमो नु धर्म इत्येताभिः पञ्चभिरायुर्दा अग्ने हविषो जुषाण इत्येता-

---

[1] B Bo ins. साम before गायेति, T : श्यैतयौतसामगायेत

[2] Thus B Bh.; the other MSS. संप्रेष्य

[3] BH चाय [4] Thus HB Be J; संततां the other MSS.

[5] Thus only J, the other MSS. व्याहृतिभि॰

मपोद्धृत्याथ प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य जघनेन गार्हपत्यं तिष्ठꣳस्तनूभिरुपतिष्ठते ये ते अग्ने शिवे तनुवौ विराट्च स्वराट्च ते मा विशतां ते मा जिन्वताम्। ये ते अग्ने शिवे तनुवौ सम्राट्चाभिभूश्च ते मा विशतां ते मा जिन्वताम्। ये ते अग्ने शिवे तनुवौ विभूश्च परिभूश्च ते मा विशतां ते मा जिन्वताम्। ये ते अग्ने शिवे तनुवौ प्रभ्वी च प्रभूतिश्च ते मा विशतां ते मा जिन्वताम्। यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वादध इति ' सर्वाभिर्गार्हपत्यꣳ ' सर्वाभिरन्वाहार्यपचनꣳ ' सर्वाभिराहवनीयमथ घोरास्तनूरनुदिशति यास्ते अग्ने घोरास्तनुवस्ताभिरमुं गच्छेत्यत्र यं यजमानो द्वेष्टि तं मनसा ध्यायत्यथाप[1] उपस्पृश्य विराजक्रमैरुपतिष्ठते ' नर्य[2] प्रजां मे गोपाय। अमृतत्वाय जीवसे। जातां जनिष्यमाणां च। अमृते सत्ये प्रतिष्ठितामिति गार्हपत्यमथर्व पितुं मे गोपाय। रसमन्नमिहायुषे। अदब्धायो ऽशीततनो। अविषन्नः पितुं कृण्वित्यन्वाहार्यपचनꣳ ' शꣳस्य पशून्मे गोपाय। द्विपादो ये चतुष्पदः। अष्टाशफाश्च य इहाग्ने। ये चैकशफा आशुगा इत्याहवनीयꣳ ' सप्रथ सभां मे गोपाय। ये च सभ्याः सभासदः। तानिन्द्रियावतः कुरु। सर्वमायुरुपासतामिति सभ्यमहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रयिविदा विदुः। ऋचः सामानि यजूꣳषि। सा हि श्रीरमृता सतामित्यव-

---

[1] ध्यायेदित्यथाप B Bo.

[2] Of these mantras J gives only the pratikas.

सथीयमथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा समिद्वत्याहवनीये पूर्णाहुतिं जुहोति सप्त ते अग्ने समिधः सप्त जिह्वा इति । पूर्णाहुतौ वरं ददात्यथैतान्यग्निहोत्रपात्राणि प्रक्षालितान्युत्तरेण गार्हपत्यमुपसादयति कूर्चे वा सूनायां वा स्थालीꣳ[1] सस्रुवाꣳ स्रुचमभिश्चोतनꣳ समिधमित्यथैतामग्निहोत्रीं दक्षिणत उदीचीꣳ स्थापयित्वा ब्राह्मणो[2] दोग्धि । पूर्वौ दुह्यादपरौ दुह्यान्न संस्पृशेद्द्वयोर्दुह्यात्पशुकामस्येत्यधिश्रित्योत्तरमानयत्यथैतदग्निहोत्रमग्रेणाहवनीयं पर्याहृत्य पूर्वया द्वारा प्रपाद्य जघनेन गार्हपत्यमुपसाद्य तस्मिन्नग्निहोत्रविधिं चेष्टित्वा समिधमुपयत्य प्राङ् हरति । जघनेनाहवनीयमुपसादयति कूर्चे । ऽथैताꣳ समिधं मध्यत आहवनीयस्याभ्यादधाति तूष्णीं । तस्यामादीप्तायां प्रतिमुखं द्विर्जुहोत्युभ[3] मार्ष्ट्येव[3] च मार्ष्ट्युभयमवाप्नोतीति ब्राह्मणं । द्विरङ्गुल्या प्राश्योदङ् पर्यावृत्य प्राचीनदण्डया स्रुचा भक्षयति । निर्णिज्य स्रुचं निष्टप्याद्भिः पूरयित्वोदगुद्दिशति । सप्तर्षीनेव[4] प्रीणातीति ब्राह्मणꣳ । हुत्वोपसमिन्द्धे ब्रह्मवर्चसस्य समिद्ध्या[5] अपो निनयत्यवभृथस्यैव रूपमकरिति[6] ब्राह्मणम् । ॥ १८ ॥

---

[1] आज्यस्थालीꣳ H.

[2] Thus BT; ब्राह्मणे F; ब्राह्मणोवा Bo; ब्रह्मणोवा J; ब्राह्मणोर्ध H.

[3] Thus JT and Venk. on Karmānta I. 17; ऊर्ध्वं मार्ष्टि Be; ऊर्ध्वमार्ष्टि IJB; उन्मार्ष्टि F.

[4] Thus B Bo HF; सप्तऋषीनेव TJ.

[5] Thus corrected; समिध्या अपो B Be HF; समिध्या आपो J; समिध्यापो T.

[6] Thus only B Be, cp. Taitt. Br. II 1 4. 9. The other MSS. have हुत्वोभिषतीति instead of अकरिति ।

अथ परिकर्मिणं बर्हिर्लावं प्रच्छिणोत्याहृतं[1] वा यजुषा करोत्यथ पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्नेयमष्टाकपालं निर्वप्स्यन्दशहोतारं व्याचक्षीत । सामिधेनीरनुवक्ष्यन्दशहोतारं व्याचक्षीत । अपथित्वासादयति । तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषो ऽग्निर्मूर्धा भुव[2] इति । त्रिष्टुभौ संयाज्ये । अन्वाहार्यमासाद्याग्न्याधेयदक्षिणा ददात्यथो द्वादशभ्यो ददाति । कामं भूयसीर्ददाति । संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा । विसृजते व्रतमथ तदानीमेव पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयैन्द्राग्नमेकादशकपालं निर्वपत्यादित्यं चरुं । घृत एष चरुर्भवति । शृते नेदीयसि[3] वाज्यमानयति । अपथित्वासादयति । तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषोरिन्द्राग्नी रोचना दिवः श्नथद्वृत्रमित्यैन्द्राग्नस्यादितिर्न उरुष्यतु महीमू षु मातरमित्यादित्यस्य । त्रिष्टुभौ संयाज्ये । अन्वाहार्यमासाद्याथैतं चरुं व्युद्धृत्य चत्वार आर्षेयाः प्राश्नन्ति । दिशामेव ज्योतिषि जुहोतीति ब्राह्मणꣳ । संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा । विसृजते व्रतम् । ॥ १९ ॥

अथैतद्द्वादशाहं व्रतं चरति । तस्यैतद्व्रतं । नानृतं वदति । न माꣳसमश्नाति । न स्त्रियमुपैति । नास्य पल्पूलनेन वासः पल्पूलयन्त्यन्यमपाय्यशूद्रोच्छिष्टी । स्वयं पादौ प्रक्षालयते ।

---

[1] त्यभ्याहृतं Be H.

[2] Instead of भुव F: अयमग्निः सहस्रिण ।

[3] Thus BJ; नेदीयसी Bo TF.

न लवणमश्नाति । न कौशीधान्यमन्यत्र तिलेभ्यः । प्राङ्स्वारः स्वयꣳ समिध आहरमाणो ऽग्नीनामन्ते संविशत्यजस्रा अस्यैते द्वादशाहमग्नयो भवन्ति । नास्य ब्राह्मणो ऽनाश्वान्गृहे वसत्यग्निहोत्रोच्छेषणमतो वा यजमानो भवति । भक्तसु[1] पत्न्या[1] आहरन्त्यथ[1] द्वादशसु व्युष्टासु पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपति । श्रपयित्वासादयति । तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषो ऽग्न आयूꣳषि पवसे ऽग्ने पवस्वेति । त्रिष्टुभौ संयाज्ये । अन्वाहार्यमासाद्य त्रिꣳशन्मानꣳ हिरण्यं ददाति । संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा । विसृजते व्रतमथ तदानीमेव पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्नये पावकाय पुरोडाशमष्टाकपालं निर्वपत्यग्नये शुचये । श्रपयित्वासादयति । तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषोरग्ने पावक स नः पावकाग्निः शुचिव्रततम उदग्ने शुचयस्तवेति । त्रिष्टुभौ संयाज्ये । अन्वाहार्यमासाद्य त्रिꣳशन्मानचत्वारिꣳशन्माने हिरण्ये ददाति । संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा । विसृजते व्रतम् ॥ २० ॥

अथातो ऽन्वारम्भस्यैव मीमाꣳसान्वारम्भं पौर्णमास्याः समानोपवसथं करोत्यथ प्रातर्हुते ऽग्निहोत्रे पुरापां प्रणयनाद्गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा

---

[1] Thus JF, cp. Rājasūya 20; भक्तसुपत्न्याहरंति B; ०पत्न्याहरंति T; भक्तसुपपत्न्याश्वाहरं(र)ति Be H.

चतुर्होतारं मनसानुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा सारस्वतौ होमौ जुहोति । पूर्णा पश्चादित्यनुद्रुत्याग्नीषोमाविति जुहोत्यपरं चतुर्गृहीतं गृहीत्वा निवेशनी संगमनी वसूनामित्यनुद्रुत्य यत्ते देवा अदधुर्भागधेयमिति जुहोत्यथ पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्नावैष्णवमेकादशकपालं निर्वपति सरस्वत्यै चरुꣳ सरस्वते द्वादशकपालमिति । श्रपयित्वासादयति । तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषामग्नाविष्णू अग्नाविष्णू प्र णो देव्या नो दिवः पीपिवाꣳसꣳ सरस्वत स्तनं ये ते सरस्व ऊर्मय इति । त्रिष्टुभौ संयाज्ये । अन्वाहार्यमासाद्य मिथुनौ गावौ ददाति । संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा । विसृजते व्रतमथ पौर्णमासवैमृधाभ्यां यजते । संतिष्ठते ऽग्न्याधेयꣳ संतिष्ठते ऽग्न्याधेयम् ॥ २१ ॥ षष्ठः ॥[1] ✓

॥ इति द्वितीयः प्रश्नः ॥

---

[1] The numbering of the khaṇḍas differs materially in the different MSS. The one accepted in this edition is found in J and, up to kh. 18, also in HF. The numbers of the last two adhyāyas have been added after the Bhāṣya, which however commences, as does also T, a new praśna after khaṇḍa 11. According to B the whole second praśna comprises 22, according to J (where the last but one, though marked, is not numbered) 20, according to F and H 19 and according to T 21 (10+11) khaṇḍas. Be numbers 22 khaṇḍas, but as one number is omitted, *viz.*, kh. 14, there are in fact only 21 khaṇḍas also in this MS.

अग्नीन्पुनराधास्यमानो भवति । तदाहुः कृतयजुः संभृतसंभारो भवति न संभृत्याः संभारा न यजुः कर्तव्यमित्यथो खलु संभृत्या एव संभाराः कर्तव्यं यजुः पुनराधेयस्य समृद्ध्या इति । स उपकल्पयते पुनर्निष्कृतꣳ रथं पुनरुत्स्यूतं वासः पुनरुत्सृष्टमनड्वाहं दर्भकुलायं तिस्रो दर्भमयीर्विस्रूर्मिकाः । प्रज्ञाता आग्न्याधेयिकाः संभाराः । सा याषाढ्याः पौर्णमास्याः पुरस्तादमावास्या भवति सा सकृत्संवत्सरस्य पुनर्वसुभ्याꣳ संपद्यते तस्यामादधीतेति । तस्या उपवसथे ऽरण्योरग्नीन्समारोह्योदवसाय मथित्वाग्नीन्विहृत्याग्नेयमष्टाकपालं निर्वपति वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन्निति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ तदानीमेवाह्निरग्नीन्समुह्य ब्रह्मौदनꣳ श्रपयित्वोपवसत्यथ प्रातराग्न्याधेयिकं कर्म तायते । एतावदेव नाना । यदमुत्र मुञ्जकुलायं तदिह दर्भकुलायं । यो ऽमुत्रेध्मः प्रणयनीयः स इह दर्भमयीर्विस्रूर्मिका । दर्भैर्गार्हपत्यमादधाति[1] दर्भैरन्वाहार्यपचनं दर्भैराहवनीयं । दर्भैर्गार्हपत्यमादधात्याधाने[2] सर्पराज्ञीर्ऋचो[3] ऽनुवर्तयति । ॥ १ ॥

भूमिर्भूम्ना द्यौर्वरिणेति चतस्रो गार्हपत्ये तिस्र आह-

---

[1] मादधाति om. Bo FJ.

[2] Thus Be H; instead of मादधात्याधाने J has मादधग्नित्याधाने and F: मादधाने ; T om. दर्भैर्गार्हपत्यम् and B is defective.

[3] Thus H; सर्पराज्ञीऋचो Be; सर्पराज्ञीऋचा F; सार्पराज्ञीऋचो J; सर्पराज्ञीयाऋचो T; B defective.

वनीये ' समानं कर्मा रथचक्रादेतावदेव नाना ' यदमुत्र तूष्णीमग्निहोत्रं[१] तदिह सप्त ते अग्ने समिधः सप्त जिह्वा इति जुहोति ' यो ऽमुत्राग्नेयो ऽष्टाकपालः स इहाग्नेयः पञ्चकपालस्तस्य प्रयाजेषु चतस्रो[२] विभक्तीर्दधात्यग्न आयाहि वीतये समिधो[३] अग्न आज्यस्य वियन्त्वग्निं दूतं वृणीमहे तनूनपादग्न आज्यस्य वेत्वग्निनाग्निः समिध्यत इडो अग्न आज्यस्य वियन्त्वग्निर्वृत्राणि जङ्घनद्बर्हिरग्न आज्यस्य वेत्विति ' स्वयꣳ संपन्न उत्तमः प्रयाजो ' ऽथात आज्यभागयोरेव मीमाꣳसा ' वार्त्रघ्नावाज्यभागौ स्यातामित्येके ' वृधन्वन्तावाज्यभागौ स्यातामित्येके ' ऽग्निꣳ स्तोमेन बोधय त्वं नः सोमेत्येतौ स्यातामित्येके ' ऽग्न आयूꣳषि पवसे ऽग्ने पवस्वेत्येतौ स्यातामित्येके ' यत्पवमान[४] तत्सोमरूपं ' पङ्क्त्यौ[५] हविषो ऽग्ने तमद्याधा ग्राम इत्यथ पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोत्यग्निं प्रति स्विष्टकृतं निराहाभिष्टे अद्य एभिर्नो अर्कैरिति संयाज्ये ' अन्वाहार्यमासाद्य ॥ २ ॥

पुनराधेयदक्षिणा[६] ददाति पुनर्निष्कृतꣳ रथं पुनरुत्स्यूतं वासः पुनरुत्सृष्टमनड्वाहं ' तस्यानूयाजेषु[७] विभक्ती[८] दधात्यग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः । भसन्नु ष प्र पूर्व्य

---

[१] BH insert जुहोति।
[२] om. TJ.
[३] समिधः समिधो Be BH.
[४] Thus BH, °मानस्य the other MSS.
[५] Thus BJ Be; पंक्त्यो T; पङ्क्तो H; F totally corrupt.
[६] दक्षिणां JF.
[७] अनुयाजेष all except T Be.
[८] Thus HB; विभक्तीर्द° the other MSS.

इषं दुरीतावसे । देवं बर्हिर्वसुवने वसुधेयस्य वेत्वग्ने स्तोमं मनामहे सिध्रमद्य दिविस्पृशः । देवस्य द्रविणस्यवो देवो नराशꣳसो वसुवने वसुधेयस्य वेत्विति ' स्वयꣳ संपन्न उत्तमो ऽनूयाजः[१] ' संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा ' विसृजते व्रतमथ तदानीमेव पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्निवारुणमेकादशकपालमनुनिर्वपति[२] ' श्रपयित्वासादयति ' तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषस्त्वं नो अग्ने स त्वं नो अग्न इति ' त्रिष्टुभौ संयाज्ये ' अन्वाहार्यमासाद्यानड्वाहं ददाति ' संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा ' विसृजते व्रतꣳ ' संतिष्ठते पुनराधेयमिति ' इष्टिपुनराधेयमथ[३] वै भवति यः पराचीनं पुनराधेयादग्निमादधीत स एतान्होमाञ्जुहुयादिति ' तृतीय[४] आधान[४] आग्नेयस्य पञ्चकपालस्य पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु स्वाहा । केतः सकेतः सुकेतस्ते न आदित्या आज्यं जुषाणा वियन्तु स्वाहा । विवस्वाꣳ अदितिर्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियन्तु स्वाहेति ' संतिष्ठते तृतीयमाधानम[५]थाप-

---

[१] With *u* Be JF.
[२] अनु om. BH.
[३] इष्टि° B Be JF; दधि° H; om. T; Bh. seems to have read (perhaps rightly) ऋद्धिं (var. 16. वृद्धिं), comp. T S. I 5. 4. 4.
[४] Thus B Bc H; तृतीयाधान T; तृतीयमादधान J; तृतीय आदधान F.
[५] Thus H Be JF; तृतीयाधेयम° T; तृतीयाधानम° B.

हुताग्नेर्नष्टारणीकस्य च[1] ब्रह्मौदनेनैव प्रतिपद्यते । सिद्धमग्न्याधेयम् । ॥ ३ ॥ प्रथमः ॥

पुरादित्यस्यास्तमयाद्गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्य[2] ज्वलन्तमाहवनीयमुद्धरति सायमाहुतये । पुरादित्यस्योदयाद्गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्य[2] ज्वलन्तमाहवनीयमुद्धरति प्रातराहुतये । वाचा त्वा होत्रा प्राणेनोद्गात्रा चक्षुषाध्वर्युणा मनसा ब्रह्मणा श्रोत्रेणाग्नीधैतैस्त्वा पञ्चभिर्दैव्यैर्ऋत्विग्भिरुद्धरामि भूर्भुवः सुवरुद्ध्रियमाण उद्धर पाप्मनो मा यदविद्वान्यच्च विद्वाꣳश्चकार । अह्ना यदेनः कृतमस्ति पापꣳ सर्वस्मान्मोद्धृतो मुञ्च तस्मादिति सायꣳ । रात्रिया[3] यदेनः कृतमस्ति पापꣳ सर्वस्मान्मोद्धृतो मुञ्च तस्मादिति प्रातर।ग्निं निदधात्यमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य जित्यै । तयानन्तं[4] काममितो जयेम प्रजापतिर्यं प्रथमो जिगायाग्निमग्नौ वैश्वानरेऽमृतं जुहोमि स्वाहेति सायꣳ । सूर्यमग्नौ वैश्वानरेऽमृतं जुहोमि स्वाहेति प्रातः । सायंप्रातरेवैषा पत्न्यन्वास्ते । सायꣳसायमित्येके । ऽथैतान्यग्निहोत्रपात्राणि प्रक्षालितान्युत्तरेण गार्हपत्यमुपसादयति कूर्चे वा सूनायां वा स्थालीं ससुवाꣳ स्रुचमभिद्योतनꣳ समिधमित्य।थैतामग्निहोत्रीं

---

[1] Thus Be T, cp. Rudradatta on Āpast. V. 29. 12. The other MSS. insert प्रणयनं before ब्रह्मौद॰ and BH om. च।

[2] उद्धृत्य F.

[3] रात्र्या T.

[4] Thus BH, तेन instead of तया the other MSS.

दक्षिणत उदीचीꣳ स्थापयित्वा ब्राह्मणो दोग्धि । पूर्वां दुह्याज्ज्येष्ठस्य ज्यैष्ठिनेयस्य यो वा गतश्रीः स्यादपरां दुह्यात्कनिष्ठस्य कानिष्ठिनेयस्य यो वा बुभूषेन्न संसृजेद्द्वयोर्दुह्यात्पशुकामस्येत्यधिश्रित्योत्तरमानयत्यथैतदग्निहोत्रमग्रेणाहवनीयं पर्याहृत्य पूर्वया द्वारा प्रपाद्य जघनेन गार्हपत्यमुपसाद्याथ[1] परिषिञ्चति । ॥ ४ ॥

ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति । सत्यं त्वर्तेन परिषिञ्चामीति प्रातरेवमेव कृत्वा परिषिञ्चत्यथ प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य जघनेन गार्हपत्यमुपविश्योदीचो ऽङ्गारान्निरूह्य व्यन्तान्कृत्वा तेष्वधिश्रित्याभिद्योतनेनाभिद्योतयत्यग्निस्ते तेजो मा प्रतिधाक्षीदिति । स्रुवेणापः प्रत्यानयत्यमृतमसीति । पुनरेवाभिद्योत्य त्रिः पर्यग्नि करोत्यन्तरितꣳ रक्षो ऽन्तरिता अरातय इति । वर्त्म कुर्वन्नुदगुद्वास्य प्रत्यूह्याङ्गारानादत्ते दक्षिणेन स्रुवꣳ समिधं च सव्येनाग्निहोत्रहवणीं देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद इति । गार्हपत्ये प्रतितपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इति त्रिरथ कूर्चे स्रुवं निधाय यजमानमामन्त्रयत ओमुन्नेष्यामीत्योमुन्नयेति[2] यजमानो ऽनुजानात्यथ चतुरः स्रुवानुन्नयति पूर्णान्वानूचो वा भूरिडा भुव इडा सुवरिडा भूर्भुवः सुवरिडेति । स्थाल्याꣳ स्रुवं प्रत्यवधायाथैने संमृशति सजूर्देवैः सायंयावभिः सायंयावानो

---

[1] अथ om JF.

[2] °मंत्रयते ओमुन्नेष्या° TF, °मंत्रयत्योमुन्नेष्या° J, °मंत्र्योमुन्नेष्या° B Bo H.

मा देवाः स्वस्ति संपारयन्तु पशुभिरिति सायꣳ। सजूर्देवैः प्रातर्यावभिः प्रातर्यावाणो मा देवाः स्वस्ति संपारयन्तु पशुभिरिति प्रातरेवैताꣳ समिधꣳ स्रुग्दण्ड[1] उपसंगृह्य जघनेन गार्हपत्यमुपसादयति कूर्चे नम ईशानाय प्रजाः पशवो मे वर्धन्तामहं यजमानो मा रिषमिति। दशहोषोद्धृत्य प्राङ् हरति भूर्भुवः सुवरुर्वन्तरिक्षमन्विह्ययं पन्था विततो देवयानो येनायन्नृषयः स्वर्गकामास्तेन गच्छामि परमं व्योम यथा न हीये सुकृताꣳ सकाशादिति। जघनेनाहवनीयमुपसादयति कूर्चे नम[2] ईशानाय प्रजा मे वर्धतामहं यजमानो मा रिषमित्येवैताꣳ समिधं मध्यत आहवनीयस्याभ्यादधाति ॥ ५ ॥

रजतां त्वाग्निज्योतिषं वायुमतीꣳ स्वर्ग्याꣳ स्वर्गाय लोकाय रात्रिमच्चितिमिष्टकामुपदधे ऽमृतं प्राणे दधामि प्रजापतिस्त्वा सादयत्विति। तयादेवतं करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इति सायमथ प्रातर्हरिणीं त्वा सूर्यज्योतिषं वायुमतीꣳ स्वर्ग्याꣳ स्वर्गाय लोकायाहश्चितिमिष्टकामुपदधे ऽमृतमपाने दधामि प्रजापतिस्त्वा सादयत्विति। तयादेवतं कृत्वा सूददोहसं करोति। तस्यामादीप्तायां प्रतिमुख[3] जुहोत्यग्निर्ज्योतिर्ज्योतिः

---

[1] Thus BT; स्रुवदंड the other MSS.

[2] The yajuṣ नम...मा रिषमिति is found only in BT.

[3] Be JF ins. ह्विर।

सूर्यः स्वाहेति सायꣳ सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातरिति तु सꣳसृष्टमथासꣳसृष्टमग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायꣳ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरथ[1] सकृदतिवाद्य कूर्चे स्रुचं निधाय दक्षिणाद्गार्हपत्यं प्रतीचत उपप्रेत संगच्छध्वं मा भागिनां भागधेयं प्रमायि[2] । सप्तर्षीणाꣳ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धत्तेत्यतिहाय पूर्वामाहुतिमुत्तरां भूयः समिध्येव[3] जुहोति प्रजापतये स्वाहेति मनसाथ त्रिरतिवाद्य कूर्चे स्रुचं निधायावाचीनमवमृज्य प्रतीचा नीचा पाणिनौषधीषु लेपं निमार्ष्ट्योषधीभ्यस्त्वौषधीर्जिन्वेत्येवमेव द्वितीयमवमृज्यौषधीष्वेव निमार्ष्टि दक्षिणतः प्राचीनावीती पितृभ्यस्त्वा पितॄञ्जिन्वेति सायमथ प्रातरूर्ध्वमुन्मृज्य प्राचोत्तानेन पाणिनौषधीषु [4]लेपमुन्मार्ष्ट्योषधीभ्यस्त्वौषधी-

---

[1] The textus receptus is read in T; traces of this reading, which I believe to be the original one, are found in the confusion of the agnihotrayajus. Thus Be HFJB read: अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायꣳ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति तु (om. F) न (om. Be) सꣳसृष्टमथासꣳ (or यसꣳ) सृष्टमग्निर्ज्योतिर्ज्योतिरग्निः (JB Be H सूर्यः) स्वाहेति सायꣳ सूर्यो ज्योतिर्ज्योतिः सूर्यः (HJ B Be अग्निः) स्वाहेति प्रातर् ।

[2] Thus all except B, which has प्रयामि ।

[3] भूयसीं समिध्य एव J.

[4] From लेपम् on, T differs from the other Mss. It has: लेपं निमार्ष्ट्यथ दक्षिणतः प्राचीनावीति पितृभ्यस्त्वा पितॄञ्जिन्वेति एवमेव द्वितीयमवमृज्यौषधीष्वेवमेव निमार्ष्ट्यथाप उपस्पृश्य etc., as the others, only प्रज्ञा ज्योतिर् twice.

जिन्वेत्येवमेव द्वितीयमवमृज्यौषधीष्वेव[1] निमार्ष्टि[2] दक्षिणतः प्राचीनावीती पितृभ्यस्त्वा पितॄञ्जिन्वेत्यथाप उपस्पृश्य द्विरङ्गुल्या प्राश्नाति प्रजा ज्योतिरित्यथोदङ् पर्यावृत्य प्राचीनदण्डया स्रुचा भक्षयति ॥ ६ ॥

इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये। आत्मसनि प्रजासनि पशुसन्यभयसनि लोकसनि वृष्टिसनि ॥ अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त। रायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहेति सायꣳ । सूर्यः प्रजां बहुलां मे करोत्विति प्रातर्निर्णिज्य स्रुचं निष्टप्याद्भिः पूरयित्वोदगुद्दिशति सप्तर्षीन्प्रीणीहि सप्तर्षीञ्जिन्व[3] सप्तर्षिभ्यः स्वाहेति । सप्तर्षीनेव प्रीणातीति ब्राह्मणमथ जघनेन गार्हपत्यमपो निनयतीदमहमग्नौ वैश्वानरेऽमृतं जुहोमि स्वाहेत्यचित्यामचिताकूतिं जुहोमि स्वाहेत्यन्तर्वेदि निनयति । कृत्वोपसमिन्द्धे ब्रह्मवर्चसस्य समिद्ध्या अपो[4] निनयत्यवभृथस्यैव रूपमकरिति ब्राह्मणम् । ॥ ७ ॥ द्वितीयः ॥

अथ सायꣳ हुते ऽग्निहोत्रे यज्ञोपवीत्यप आचम्य[5] यजमानायतने तिष्ठन्नाहवनीयमुपतिष्ठत उपप्रयन्तो अध्वरमिति षड्भिरनुच्छन्दसꣳ । षड्भिरेवोत्तराभिराग्निपावमानीभिराह-

---

[1] उन्मृज्य (rightly?) JF Be.

[2] उन्मार्ष्टि Be J.

[3] सप्तऋष॰ everywhere instead of सप्तर्ष॰ B Be JF.

[4] ॰ध्या अपो BBe HJ ; समिद्ध्यापो T.

[5] Be TF ins. अग्रेणाहवनीयं परीत्य ।

वनीयमेवोपतिष्ठते[1] ऽग्न आयूꣳषि पवसे ऽग्ने पवस्वाग्ने पावक स नः पावकाग्निः शुचिव्रततम उदग्ने शुचयस्तवेत्यथाहवनीयमेवोपतिष्ठत आयुर्दा अग्ने ऽस्यायुर्मे देहि वर्चोदा अग्ने ऽसि वर्चो मे देहि तनूपा अग्ने ऽसि तनुवं मे पाह्यग्ने यन्मे तनुवा ऊनं तन्म आपृणेत्यथ रात्रिमुपतिष्ठते चित्रावसो स्वस्ति ते पारमशीयेत्यथाहवनीये समिधमादधातीन्धानास्त्वा शतꣳ हिमा द्युमन्तः समिधीमहि वयस्वन्तो वयस्कृतं यशस्वन्तो यशस्कृतꣳ सुवीरासो अदाभ्यम् । अग्ने सपत्नदम्भनं वर्षिष्ठे अधि नाके स्वाहेत्यथाहवनीयमेवोपतिष्ठते[2] सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणाꣳ स्तुतेन सं प्रियेण धाम्ना ॥ त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा प्रजया सृजेत्यथ वै भवति यथा वै पुरुषो ऽश्वो गौर्जीर्यत्येवमग्निराहितो जीर्यति संवत्सरस्य परस्तादाग्निपावमानीभिरुपतिष्ठत इति स[3] संवत्सरस्य परस्तादाग्निपावमानीभिर्गार्हपत्यमुपतिष्ठते पुनर्नवमेवैनमजरं करोतीति ब्राह्मणमथ गृहाꣳश्च पशूꣳश्चोपतिष्ठते संपश्यामि प्रजा अहमिडप्रजसो मानवीः । सर्वा भवन्तु नो गृहे ॥ अम्भ स्थाम्भो वो भक्षीय मह स्थ महो वो भक्षीय सह स्थ सहो वो भक्षीयोर्ज स्थोर्जं वो भक्षीय । रेवती रमध्वमस्मिन्लोके ऽस्मिन्गोष्ठे ऽस्मिन् क्षये ऽस्मिन्योनाविहैव स्तेतो मापगात बह्वीर्मे

---

[1] एव (after आहवनीयं) only Be/B JH.

[2] एव om JF Be.

[3] स only in Be.

भूयास्तेत्यथाग्निहोत्रियै[१] वत्समभिमृशति संहितासि विश्वरूपीरा मोर्जा विशा गौपत्येना रायस्पोषेण। सहस्रपोषं वः पुष्यासं मयि वो रायः श्रयन्तामित्यथ द्विपदत्रिपदाभिर्गार्हपत्यमुपतिष्ठत[२] उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥ राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानꣳ स्वे दमे॥ स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये॥ अग्ने त्वं नो अन्तम उत त्राता शिवो भव वरूथ्यः॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः॥ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दा इत्यथ गृहाꣳश्चैव[३] पशूꣳश्चैवोपतिष्ठते॥ ८॥

ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यतेडा स्थ मधुकृतः स्योना माविशतेरा मदः। सहस्रपोषं वः पुष्यासं मयि वो रायः श्रयन्तामित्यथाहवनीयमुपतिष्ठते[४] तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयादित्याहवनीयमेवोपतिष्ठते सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजमित्यथ रात्रिमुपतिष्ठते कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे। उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यत इत्यथ गार्हपत्यमुपतिष्ठते परि

---

[१] Thus BHJ; ०होत्र्यै T Be.

[२] द्विपदा० T.

[३] एव om T.

[४] अथादित्यमु० BH.

त्वाग्ने पुरं वयं विप्रꣳ सहस्य धीमहि। धृषद्वर्णं दिवेदिवे
भेत्तारं भङ्गुरावत इत्यथ गार्हपत्यमेवोपतिष्ठते ऽग्ने गृहपते
सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया त्वं
गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमाशासे मह्यममुष्मै
५ ज्योतिष्मतीं तामाशिषमाशासे ऽमुष्मा अमुष्मा इति। यावन्तो
ऽस्य पुत्रा जाता भवन्ति तन्तव[१] इत्यन्ततो। ऽथ वै भवति यो
वा अग्निं प्रत्यङ्ङुपतिष्ठते प्रत्येनमोषति यः पराङ् विष्वङ् प्रजया
पशुभिरेति कवातिर्यङ्ङिवोपतिष्ठेतेति। स कवातिर्यङ्ङिवोप-
तिष्ठते नैव प्रत्यङ् न पराङ्। ॥ ९॥ तृतीयः॥

१० पिण्डपितृयज्ञं करिष्यन्नुपकल्पयते सकृदाच्छिन्नं बर्हिर्द-
र्भाꣳश्च परिस्तरणीयान्व्रीहीꣳश्च शूर्पं च प्रक्षालिते चोलूखल-
मुसले स्थालीꣳ सस्रुवाꣳ समेक्षणामेरकोपबर्हणे आञ्जनाभ्यञ्जने
दर्भाꣳ स्फ्यमुदकुम्भं यज्ञायुधानीत्यथान्वाहार्यपचनं परिस्तृ-
णाति। तमुत्तरेणैकैकꣳ सꣳसादयत्येरकोपबर्हणे आञ्जना-
१५ भ्यञ्जने दर्भाꣳ स्फ्यमुदकुम्भं यज्ञायुधानीत्यथ प्राचीनावीतं
कृत्वा जघनेनान्वाहार्यपचनमुपविश्य पवित्रवत्याꣳ स्थाल्यां
व्रीहीन्निर्वपति पितृभ्यो वो जुष्टं निर्वपामीति वा तूष्णीं
वापर्यर्धाꣳ स्थालीं कृत्वैतस्मिन्नेव चर्मण्युलूखलमुसले निधाया-
वहन्ति सकृदेव दक्षिणामुखो। ऽथैनानविविच्याथैतस्यामेव[२]

---

[१] Thus Be HFJ; तावन्त T; B omits the passage.

[२] Uncertain; thus BH; •खोथैनान्विविच्या• Be; •खोथैनान्वि त्या• F; •खोननिवे (or चे) विचा• JT; for the reading of BH (अविविच्य) cp. Āp. I. 7.10: अविवेकम्।

स्थाल्यां तिरः पवित्रमप आनीयाधिश्रित्य तिरः पवित्रं तण्डुलानावपत्यथाज्यं निर्वपत्यथाज्यमधिश्रयत्युभयं पर्यग्नि कृत्वा मेक्षणꣳ स्रुवं च संमार्ष्ट्यथैतं चरुꣳ श्रपयित्वाभिघार्योदञ्चमुद्वासयत्यथ यज्ञोपवीतं कृत्वान्वाहार्यपचनमुपसमाधाय मेक्षणेनोपघातं तिस्र आहुतीर्जुहोति सोमाय पितृपीताय स्वधा नमः स्वाहा यमायाङ्गिरस्वते पितृमते स्वधा नमः स्वाहाग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः स्वाहेति दक्षिणार्धपूर्वार्धे तूष्णीं मेक्षणमभ्याधाय प्राचीनावीतं कृत्वा दक्षिणेनान्वाहार्यपचनꣳ स्फ्येनोद्धत्यावोक्ष्य दक्षिणाग्रं बर्हि स्तीर्त्वाद्भिर्मार्जयति मार्जयन्तां पितरो मार्जयन्तां पितामहा मार्ययन्तां प्रपितामहा इत्यथ स्रुवेणोपस्तीर्णाभिघारिताꣳस्त्रीन्पिण्डान्ददात्येतत्ते ततासौ ये च त्वामन्वेतत्ते पितामहासौ ये च त्वामन्वेतत्ते प्रपितामहासौ ये च त्वामन्वित्यत्र पितरो यथाभागं मन्दध्वमित्युक्त्वोदङ् पर्यावृत्योष्मणो व्यावृत उपास्ते व्यावृत्त ऊष्मेति प्राङ्ङथाभिपर्यावृत्यैतं चरुमवजिघ्रति ॥ १० ॥

ये समानाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ ये सजाताः समनसो जीवा जीवेषु मामकाः। तेषाꣳ श्रीर्मयि कल्पतामस्मिꣳ लोके शतꣳ समा इत्यथ तथैवाद्भिर्मार्जयति मार्जयन्तां पितरो मार्जयन्तां पितामहा मार्जयन्तां प्रपितामहा इत्यथाञ्जनं ददात्याञ्जतां पितर आञ्जतां पितामहा आञ्जतां प्रपितामहा इत्यथाभ्यञ्जनं ददात्यभ्यञ्जतां पितरोऽभ्यञ्जतां पितामहा अभ्यञ्जतां प्रपिता-

महा इत्यथ वासाꣳसि ददात्येतानि वः पितरो वासाꣳस्येतानि वः पितामहा वासाꣳस्येतानि वः प्रपितामहा वासाꣳसीत्युत्तर आयुषि लोम छिन्दीतेति ब्राह्मणमथ षड्भिर्नमस्कारैर्विपर्यासमुपतिष्ठते नमो वः पितरो रसाय नमो वः पितरः शुष्माय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिꣳ लोके स्थ युष्माꣳस्ते ऽनु ये ऽस्मिꣳ लोके मां ते ऽनु य एतस्मिꣳ लोके स्थ यूयं तेषां वसिष्ठा भूयास्त ये ऽस्मिꣳ लोके ऽहं तेषां वसिष्ठो भूयासमित्यथ वीरं याचते[1] वीरं मे पितरो दत्त वीरं मे पितामहा दत्त वीरं मे प्रपितामहा दत्त पितृमानहं युष्माभिर्भूयासꣳ सुप्रजसो मया यूयं भूयास्तेत्यथैनानुत्थापयत्युत्तिष्ठत पितरः प्रेत शूरा यमस्य पन्थामनुयाता पुराणम्। धत्तादस्मासु द्रविणं यच्च भद्रं प्र णो ब्रूताद्भागधान्देवतास्वित्यथैनान्सꣳसाधयति[2] यन्तु पितरो यथालोकं मनसा जवेन परेत पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः। अथा पितॄन्सुविदत्राꣳ अपीत यमेन ये सधमादं मदन्तीत्यथ तिसृभिर्मन आह्वयते मनो न्वाहुवामहे आ न एतु मनः पुनः पुनर्नः पितरो मन इत्यथैतान्पिण्डान्सह वर्हिषाग्नावनुप्रहरत्यथैतेषाꣳ अस्त्राणां देहे उदाहरन्त्यथ यज्ञो-

---

[1] J has the following passage thus: वीरं मे दत्त पितरः पितृमानहं॰ भूयास्तेत्यथ वीरं मे पितामहा दत्त पितृमानहं॰ भूयास्तेत्यथ वीरं मे प्रपितामहा दत्त पितृमानहं॰ भूयास्तेत्य॰।

[2] Thus B; ॰सायति Be; ॰सादयति the other MSS.

पवीतं कृत्वा प्राजापत्यर्चा गार्हपत्यमुपतिष्ठते प्रजापते न त्वदेतान्यन्य इत्यथैतां द्वितीयां जपति यदन्तरिक्षं पृथिवीमुत द्यामिति' संतिष्ठते पिण्डपितृयज्ञः' ॥ ११ ॥ चतुर्थः ॥

वर्षासु श्यामाकानामाग्रयणं करिष्यन्भवति' तस्य प्रज्ञात उपवसथो' ऽथ प्रातर्हुते ऽग्निहोत्रे पृष्ठ्याꣳ स्तीर्त्वापः प्रणीय सौम्यꣳ श्यामाकं चरुं निर्वपति' हविष्कृता वाचं विसृज्य गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये ऽज्यानीर्जुहोति शतायुधाय शतवीर्यायेति पञ्च' अपयित्वासादयति' तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविष आप्यायस्व सं त इति' त्रिष्टुभौ सयाज्ये' अन्वाहार्यमासाद्य वासो ददात्यथ यजमानभागं प्राश्नात्यग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः। शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिरिति' संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा' विसृजते व्रतमथ शरदि व्रीहीणामाग्रयणं करिष्यन्भवति' तस्य प्रज्ञात उपवसथो' ऽथ प्रातर्हुते ऽग्निहोत्रे पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयैन्द्राग्नं द्वादशकपालं निर्वपति वैश्वदेवं चरुं द्यावापृथिव्यमेककपालमिति' हविष्कृता वाचं विसृज्य गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये ऽज्यानीर्जुहोति शतायुधाय शतवीर्यायेति पञ्च' अपयित्वासादयति' तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषामिन्द्राग्नी रोचना दिवः श्नथद्वृत्रमित्यैन्द्राग्नस्य' विश्वे देवा विश्वे देवा इति वैश्वदेवस्य'

प्रजया भूयासं मा परासेचि मत्पय इत्यथोपोत्थाय दक्षिणेन पदा विष्णुक्रमान्क्रमते ॥ २० ॥

विष्णोः क्रमो ऽस्यभिमातिहा गायत्रेण छन्दसा पृथिवीमनु विक्रमे निर्भक्तः स यं द्विष्म इति चतुर्भिरनुच्छन्दसं । तृतीये चतुर्थमनुवर्तयति । न चतुर्थाय प्रक्रामति । नाहवनीयमुपात्येत्यथात्रैव तिष्ठन्नाहवनीयमुपतिष्ठते ऽगन्म सुवः सुवरगन्म संदृशस्ते मा छित्सि यत्ते तपस्तस्मै ते मावृक्षीत्यथादित्यमुपतिष्ठते सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहि वर्चोधा असि वर्चो मयि धेहीत्यथैभ्यो लोकेभ्यो भ्रातृव्यं निर्भजतीदमहममुं भ्रातृव्यमाभ्यो दिग्भ्यो ऽस्यै दिवो ऽस्मादन्तरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजामि निर्भक्तः स यं द्विष्म इत्यथाप उपस्पृश्य । सं ज्योतिषाभुवमित्युरः प्रत्यात्मानं प्रत्यभिमृशते । ऽथ दक्षिणमꣳसमभि पर्यावर्तत ऐन्द्रीमावृतमन्वावर्त इत्यथोदङ् पर्यावर्तते समहं प्रजया सं मया प्रजा समहꣳ रायस्पोषेण सं मया रायस्पोष इत्यथाहवनीये समिधमादधाति समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासꣳ स्वाहेत्यथाहवनीयमुपतिष्ठते वसुमान्यज्ञो वसीयान्भूयासमित्यथाग्निपावमानीभ्यां गार्हपत्यमुपतिष्ठते ऽग्न आयूꣳषि पवसे ऽग्ने पवस्वेत्यथ गार्हपत्यमेवोपतिष्ठते ऽग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमाशासे मह्यममुष्मै ज्योतिष्मतीं तामाशिषमाशासे ऽमुष्मा

अमुष्मा[1] इति' यावन्तो ऽस्य पुत्रा जाता भवन्ति तन्तव इत्यन्ततः' ॥ २१ ॥

अथ वै भवति यो वै यज्ञं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवति' कस्त्वा युनक्ति स त्वा विमुञ्चत्विति' काले कपालानि विमुञ्चति यानि घर्मे कपालान्युपचिन्वन्ति वेधसः। पूष्णस्तान्यपि व्रत इन्द्रवायू विमुञ्चतामित्यथैतेनैव यथेतमेत्य यजमानायतन उपविश्य तथैव[2] तिरः पवित्रमप आचामति पयस्वतीरोषधयः पयस्वद्वीरुधां पयः। अपां पयसो यत्पयस्तेन मामिन्द्र सꣳसृजेत्यथाहवनीये समिध आदधात्यग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे ऽराधि स्वाहा वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते व्रतमचारिषं तदशकं तन्मे ऽराधि स्वाहेत्यथोपोत्थाय[3] यज्ञस्य पुनरालम्भं जपति यज्ञो बभूव स आबभूव स प्रजज्ञे स वावृधे। स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन्करोतु वयꣳ स्याम पतयो रयीणामित्यथ प्राङुत्क्रम्य जपति गोमाꣳ अग्ने ऽविमाꣳ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः। इडावाꣳ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावानित्यथ ब्राह्मणाꣳस्तर्पयितवा इति संप्रेष्यति' ॥ २२ ॥ अष्टमः ॥

---

[1] F अमुष्मा once. T has this passage thus : तन्तवे मह्यममुष्मै ज्योतिष्मतीं तामाशिषमाशासे सुष्मा अमुष्मा इति etc., as above, but at the end : भवन्ति तावन्त इत्यन्ततो ; J is corrupt towards the end of the khaṇḍa.

[2] Om. TJFBe.

[3] उपोत्थाय *om.* JT.

सप्रथ सभां मे गोपायेति सभ्यमहे बुध्निय मन्त्रं मे गोपायेत्यावसथीयं ˈ सो ऽपरिमितं प्रवसति ˈ पुनरायन्प्रपथे समिधः कुरुते ˈ ऽग्नीन्पराख्याय वाचं यच्छत्यागत्यैतेनैवोपतिष्ठते[1] ˈ समानी प्रायश्चित्तिः ˈ ॥ १४ ॥ षष्ठः ॥

अथोपवसथीये ऽहन्यज्ञोपवीत्यप आदायाग्रेणाहवनीयं परीत्य[2] यजमानायतन उपविश्य त्रिः पवित्रमप आचामति पयस्वतीरोषधयः पयस्वद्वीरुधां पयः । अपां पयसो यत्पयस्तेन मामिन्द्र सꣳसृजेत्यथाहवनीये समिध आदधात्यग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताꣳ स्वाहा वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताꣳ स्वाहेत्यथ[3] श्वो भूते हविर्निरुप्यमाणमभिमन्त्रयते ऽग्निꣳ होतारमिह तꣳ हुवे देवान्यज्ञियानिह यान्हवामहे । आयन्तु देवाः सुमनस्यमाना वियन्तु देवा हविषो मे अस्येति ˈ तदुदित्वा वाचं यच्छत्या हविष्कृतो ˈ हविष्कृता वाचं विसृज्य यज्ञं योगेन युनक्ति कस्त्वा युनक्ति स त्वा युनक्त्विति ˈ काले कपालानि युनक्ति यानि घर्मे कपालान्युपचिन्वन्ति वेधसः । पूष्णस्तान्यपि व्रत इन्द्रवायू युञ्जामिति ˈ तेषां यजुष्कृतानां यद्भिद्यते तदुत्कर उदस्यत्यभिन्नो घर्मो जीरदानुर्यत आत्त-

---

[1] Thus Be BH ; T: त्यागन्तेतेनैवोप॰ ; J : त्यागत्याहवनीयमेवोप॰ ; F: त्यागत्य आहवनीयमुप॰

[2] Be JF om. these three words.

[3] अथ om. JF.

स्तदग्न पुनरित्यथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये संतनीं[1] जुहोतीमो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनुसंचरन्ति । त्रयस्त्रिꣳशत्तन्तवो ये वितत्निरे य इमं यज्ञꣳ स्वधया ददन्ते तेषां छिन्नं प्रत्येतद्दधामि स्वाहेत्यथान्यदपिसृजति घर्मो देवाꣳ अप्येत्वित्यथ वै भवति यदि नश्येदाश्विनं द्विकपालं निर्वपेद्द्यावापृथिव्यमेककपालमिति सा प्रसिद्धेष्टिः संतिष्ठते ऽथ तथैव गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये संतनीं[1] जुहोतीमो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनुसंचरन्ति। त्रयस्त्रिꣳशत्तन्तवो ये वितत्निरे य इमं यज्ञꣳ स्वधया ददन्ते तेषां छिन्नं प्रत्येतद्दधामि स्वाहेत्यथान्यदपिसृजति घर्मो देवाꣳ अप्येत्वित्यथ यद्याज्यस्य वा सांनाय्यस्य वान्यत्र बर्हिषः पुरोत्तमात्प्रयाजात्स्कन्दति तस्य स्वधाꣳ संभरति ॥ १५ ॥

सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च । बृहस्पतिप्रसूतो यजमान इह मा रिषदिति स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्यथ यावत्परिशिष्टेन प्रचरत्यथ यजमानमाज्यमवेक्षयत्याज्यमसि सत्यमसि सत्यस्याध्यक्षमसि हविरसि वैश्वानरं वैश्वदेवमुत्पूतशुष्मꣳ सत्यौजाः सहो ऽसि सहमानमसि सहस्वारातीः सहस्वारातीयतः सहस्व

---

[1] संतनीं BFHJ (॰निं the second time) ; संततिं Be ; संततं T ; संतनीयं F (the sec. time).

पृतनाः सहस्व पृतन्यतः सहस्रवीर्यमसि तन्मा जिन्वाज्यस्याज्यमसि सत्यस्य सत्यमसि सत्यायुरसि सत्यशुष्ममसि सत्येन त्वाभिघारयामि तस्य ते भक्षीयेत्यथाज्यग्रहाणां[१] । गृहीतंगृहीतमनुमन्त्रयते पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वर्तूनां यन्त्राय धर्त्राय गृह्णामि पञ्चनां त्वा दिशां यन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वा पञ्चजनानां यन्त्राय धर्त्राय गृह्णामीति चतुर्भिर्जुह्वमष्टाभिरुपभृतं[२] चरोस्त्वा पञ्चबिलस्य यन्त्राय धर्त्राय गृह्णामि ब्रह्मणस्त्वा तेजसे यन्त्राय धर्त्राय गृह्णामि क्षत्रस्य त्वौजसे यन्त्रय धर्त्राय गृह्णामि विशे त्वा यन्त्राय धर्त्राय गृह्णामि सुवीर्याय त्वा गृह्णामि सुप्रजास्त्वाय त्वा गृह्णामि रायस्पोषाय त्वा गृह्णामि ब्रह्मवर्चसाय त्वा गृह्णामीति । चतुर्भिर्ध्रुवां[२] भूरस्माकꣳ हविर्देवानामाशिषो यजमानस्य देवानां त्वा देवताभ्यो गृह्णामीत्यभिपूर्यमाणामनुमन्त्रयते[३] कामाय त्वा गृह्णामीति । परिधीन्परिधीयमानाननुमन्त्रयते ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुविदिति मध्यममुग्रोऽस्युग्रोऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुविदिति दक्षिणमभिभूरस्यभिभूरहꣳ सजातेषु भूयासमभि-

---

[१] Thus B; •ग्रहणं TF; ग्रहणां J; ग्रहणांतं H, Mādh.; ग्रहनान् Be; अथ not found in B Be HF.

[२] Thus (accusatives) all MSS., except F, which has ध्रुवायां. Mādh. cites every time with locatives. Rigthly?

[३] •पूर्यमाणामनु• Be F.

भूखेत्ता वसुविदित्युत्तरमथाग्निं योगेन युनक्ति युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेद इति ˈ समिधोरभ्याधीयमानयोर्जपतीन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं त इत्यथान्तर्वेदि हवीꣳष्यासन्नान्यभिमन्त्रयते यन्मे अग्ने अस्य यज्ञस्य रिष्याद्यद्वा स्कन्दादाज्यस्योत विष्णो । तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थ इति ॥ १६ ॥

अथ भूर्भुवः सुवरित्यग्निहोत्रमेताभिर्व्याहृतीभिरुपसादयेद्यज्ञमुखं वा अग्निहोत्रं ब्रह्मैता व्याहृतयो ˈ यज्ञमुख एव ब्रह्म कुरुते ˈ संवत्सरे पर्यागत एताभिरेवोपसादयेद्ब्रह्मणैवोभयतः संवत्सरं परिगृह्णातीति ब्राह्मणमथ वै भवति दर्शपूर्णमासावालभमान एताभिर्व्याहृतीभिर्हवीꣳष्यासादयेद्यज्ञमुखं वै दर्शपूर्णमासौ ब्रह्मैता व्याहृतयो ˈ यज्ञमुख एव ब्रह्म कुरुते ˈ संवत्सरे पर्यागत एताभिरेवासादयेद्ब्रह्मणैवोभयतः संवत्सरं परिगृह्णातीति ब्राह्मणमथ वै भवति चातुर्मास्यान्यालभमान एताभिर्व्याहृतीभिर्हवीꣳष्यासादयेद्यज्ञमुखं वै चातुर्मास्यानि ब्रह्मैता व्याहृतयो ˈ यज्ञमुख एव ब्रह्म कुरुते ˈ संवत्सरे पर्यागत एताभिरेवासादयेद्ब्रह्मणैवोभयतः संवत्सरं परिगृह्णातीति ब्राह्मणमथ वै भवति यद्वै यज्ञस्य साम्ना क्रियते राष्ट्रं यज्ञस्याशीर्गच्छति यदृचा विशं यज्ञस्याशीर्गच्छत्यथ ब्राह्मणोऽनाशीर्केण यज्ञेन यजते ˈ सामिधेनीरनुवक्ष्यन्नेता व्याहृतीः पुरस्ताद्व्याद्ब्रह्मैव प्रतिपदं कुरुते ˈ तथा ब्राह्मणः साशीर्केण यज्ञेन

यजत इति ब्राह्मणम'थ वै भवति यं कामयेत यजमानं भ्रातृव्यमस्य यज्ञस्याशीर्गच्छेदिति तस्यैता व्याहृतीः पुरोनुवाक्यायां दध्याद्भ्रातृव्यदेवत्या वै पुरोनुवाक्या' भ्रातृव्यमेवास्य यज्ञस्याशीर्गच्छतीति ब्राह्मणम'थ वै भवति यान्कामयेत यजमानान्समावत्येनान्यज्ञस्याशीर्गच्छेदिति तेषामेता व्याहृतीः पुरोनुवाक्याया अर्धर्च एकां दध्याद्याज्यायै पुरस्तादेकां याज्याया अर्धर्च एकां' तथैनान्समावती यज्ञस्याशीर्गच्छतीति ब्राह्मणम'थ वै भवति यथा वै पर्जन्यः सुवृष्टं वर्षत्येवं यज्ञो यजमानाय वर्षति' स्थलयोदकं परिगृह्णन्त्या'शिषा यज्ञं यजमानः परिगृह्णातीति ब्राह्मणं' व्याहृतीभिर्ब्राह्मणस्य प्रतिपद्यते हिङ्कारेण राजन्यस्यर्चा वैश्यस्य सर्वमेवैतत्त्रयं कुर्यादित्येतदपरमि'ध्ममभ्याधीयमानमनुमन्त्रयते ॥ १७ ॥

उच्छुष्मो अग्ने यजमानायैधि निशुष्मो अभिदासते । अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्वेति' प्रवरं प्रव्रियमाणमनुमन्त्रयते[१] ऽमर्त्यस्य ते होतर्मूर्धन्नाजिघर्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेति' स्रुवेणाघारमाघार्यमाणमनुमन्त्रयते[२] मनो ऽसि प्राजापत्यं मनसा मा भूतेनाविशेति' स्रुच्यमाघारमाघार्यमाणमनुमन्त्रयते वागस्यैन्द्री सपत्नक्षयणी वाचा मेन्द्रियेणाविशेति' प्रयाजानामिष्टमिष्टमनुमन्त्रयते[३] वसन्तमृतूनां प्रीणामि स मा

---

[१] Thus Be; प्रव्रीयमाणम° BJ, Bhav.; प्रहृयमाणं F; प्रहृणीयमाणं T; प्रवीयमाणं H.

[२] Thus all MSS.; स्रौवमाघारम° Mādh.

[३] इष्टं twice Be HT, once the other MSS. and Mādh.

प्रीतः प्रीणातु ग्रीष्ममृतूनां प्रीणामि स मा प्रीतः प्रीणातु वर्षा ऋतूनां प्रीणामि ता मा प्रीताः प्रीणन्तु शरदमृतूनां प्रीणामि सा मा प्रीता प्रीणातु हेमन्तशिशिरावृतूनां प्रीणामि तौ मा प्रीतौ प्रीणीतामित्या।ज्यभागाविष्टावनुमन्त्रयते ऽग्नीषोमयोरहं देवयज्यया चक्षुष्मान्भूयासमित्य।ग्निमिष्टमनुमन्त्रयते ऽग्नेरहं देवयज्ययान्नादो भूयासमित्यु।पांꣳशुयाजमिष्टमनुमन्त्रयते दब्धिरस्यदब्धो भूयासममुं दभेयमित्य।च यं यजमानो द्वेष्टि तं मनसा ध्यायत्य।थाप[1] उपस्पृश्या।ग्नीषोमाविष्टावनुमन्त्रयते ऽग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमिती।न्द्राग्नी इष्टावनुमन्त्रयत इन्द्राग्नियोरहं देवयज्ययेन्द्रियाव्यन्नादो भूयासमिती।न्द्रमिष्टमनुमन्त्रयत इन्द्रस्याहं देवयज्ययेन्द्रियावी भूयासमिति। महेन्द्रमिष्टमनुमन्त्रयते महेन्द्रस्याहं देवयज्यया जेमानं महिमानं गमेयमिति। स्विष्टकृतमिष्टमनुमन्त्रयते ऽग्नेः स्विष्टकृतो ऽहं देवयज्ययायुष्मान्यज्ञेन प्रतिष्ठां गमेयमिति। प्राशित्रे ऽवदीयमाने जपत्यग्निर्मा दुरिष्टात्पातु सविताघशꣳसादिति। यजमानभागे यो मे ऽन्ति दूरे ऽरातीयति तमेतेन जेषमिती।डामाह्रियमाणामनुमन्त्रयते सुरूपवर्षवर्ण[2] एहीति[2] प्रतिपद्य मघोनीत्यातो। ऽवान्तरेडां प्राश्यमानामनुमन्त्रयते जुष्टिरसि जुषस्व नो जुष्टा नो ऽसि जुष्टिं ते गमेयमित्य।थान्तर्वेद्यग्नि-

---

[1] अथाप उपस्पृश्य om. TJ.

[2] Thus Be HT; °वर्णेति J; वर्णमिति B; वर्ण एहीमानिति F.

मार्जयते[1] मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु । बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयन्तामिति । बर्हिषदं पुरोडाशमभिमन्त्रयते अश्व पिन्वस्व ददतो मे मा क्षायि कुर्वतो मे मोपदसदित्यथान्वाहार्यं याचति । तमन्तर्वेद्यासन्नमभिमन्त्रयते प्रजापतेर्भागो ऽस्यूर्जस्वान्पयस्वानित्यान्तादनुवाकस्य । ॥ १८ ॥ सप्तमः ॥

अनूयाजानामिष्टमिष्टमनुमन्त्रयते[2] बर्हिषो ऽहं देवयज्यया प्रजावान्भूयासं नराशꣳसस्याहं देवयज्यया पशुमान्भूयासमग्नेः स्विष्टकृतो ऽहं देवयज्ययायुष्मान्यज्ञेन प्रतिष्ठां गमेयमित्यथ यत्र होतुरभिजानात्यग्निरिदं हविरजुषतेति तद्यजमानमुज्जितिं[3] वाचयत्यग्नेरहमुज्जितिमनूज्जेषमिति यथेष्टमुक्तं वाजवत्योर्व्यूहनमथ यत्र होतुरभिजानात्याशास्ते ऽयं यजमानो ऽसाविति तद्यजमानं यज्ञस्य दोहं वाचयत्येमा अग्मन्नाशिषो दोहकामा इन्द्रवन्तो वनामहे धुक्षीमहि प्रजामिषमिति । प्रस्तरं प्रह्रियमाणमनुमन्त्रयते रोहितेन त्वाग्निर्देवतां गमयतु हरिभ्यां त्वेन्द्रो देवतां गमयत्वेतशेन त्वा सूर्यो देवतां गमयत्विति । परिधीन्विमुच्यमानाननुमन्त्रयते वि ते मुञ्चामि रशना वि रश्मीन्वि योक्त्रा यानि परिचर्तनानि । धत्तादस्मासु द्रविणं यच्च भद्रं प्र णो ब्रूताद्भागधान्देवतास्विति । शंयुवाकमुक्तमनुमन्त्रयते विष्णोः

---

[1] Thus BHT; मार्जयति Be FJ.

[2] इष्टं twice T Be, once the other MSS.

[3] Thus TF Mādh.; उज्जितीर् or उज्जती the other MSS.

शंयोरहं देवयज्यया यज्ञेन प्रतिष्ठां गमेयमिति' पत्नीसंयाजानामिष्टमिष्टमनुमन्त्रयते[1] ॥ १९ ॥

सोमस्याहं देवयज्यया सुरेताः रेतो धिषीय त्वष्टुरहं देवयज्यया पशूनाꣳ रूपं पुषेयमित्यथेतरावुपसमस्यति देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्रभूयासमिति' वेदे यजमानं वाचयति वेदो ऽसि वित्तिरसि विदेयेत्यान्तादनुवाकस्य[2] 'ध्रुवामाप्याय्यमानामनुमन्त्रयत आप्यायतां ध्रुवा घृतेन यज्ञंयज्ञं प्रति देवयद्भ्यः। सूर्याया ऊधो ऽदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन्नित्यथ यजमानभागं प्राश्नाति प्रजापतेर्विभान्नाम लोकस्तस्मिꣳस्त्वा दधामि सह यजमानेनेति सं यज्ञपतिराशिषेति वाचैतत्पूर्णपात्रं याचति' तमन्तर्वेदि निधाय पूर्णपात्रे यजमानं वाचयति सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः पूर्णमसि पूर्णं मे भूया अक्षितमसि मा मे क्षेष्ठा इत्यथ दिशो व्युन्नयति प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तां दक्षिणायां दिशि मासाः पितरो मार्जयन्तां प्रतीच्यां दिशि गृहाः पशवो मार्जयन्तामुदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्तामूर्ध्वायां दिशि यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्तामित्यथैना निनयति समुद्रं वः प्रहिणोम्यक्षिताः स्वां योनिमपिगच्छत। अच्छिद्रः

---

[1] इदं twice Be T, once the other MSS.

[2] Thus Be J, Mādh.; the citation ends with वित्तिरसि in BH, with विदेय कर्मासि in FT.

द्यावा नः पृथिवी प्र पूर्वजे पितरेति द्यावापृथिव्यस्य' त्रिष्टुभौ संयाज्ये' अन्वाहार्यमासाद्य प्रथमजं वत्सं ददात्यथ यजमानभागं प्राश्नाति भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा । स नो मयोभूः पितो आ विशस्व शं तोकाय तनुवे स्योन इति' संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा' विसृजते व्रतमथ वसन्ते यवानामाग्रयणं करिष्यन्भवति' तस्य प्रज्ञात उपवसथः' समानं कर्म यथा व्रीह्याग्रयणस्यैतावदेव नानाथ यजमानभागं प्राश्नात्येतमु त्यं मधुना संयुतं यवꣳ सरस्वत्या अधि मनावचर्कृषुः । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति' संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा' विसृजते व्रतम्' ॥ १२ ॥ पञ्चमः ॥

अग्निभ्यः प्रवत्स्यन्यज्ञोपवीत्यप आचम्याग्रेणाहवनीयं परीत्य[1] यजमानायतने तिष्ठन्नाहवनीयमुपतिष्ठते मम नाम प्रथमं जातवेदः पिता माता च दधतुर्यदग्रे । तत्त्वं बिभृहि पुनरा मदैतोस्तवाहं नाम बिभराण्यग्न इत्यथ वाचंयमो ऽभिप्रव्रजत्यग्नीनामसकाशे[2] वाचं विसृजते' सो ऽधःसंवेश्यमाꣳसाश्यस्त्र्युपायी प्रवसति' न द्वादशीमतिप्रवसति' नोपवसथमुपात्येत्यायन्प्रपथे समिधः कुरुते' ऽग्नीन्पराख्याय वाचं यच्छत्याहवनीयमेवोपतिष्ठते मम नाम तव च जातवेदो वाससी इव विवसानौ ये चरावः । आयुषे त्वं जीवसे वयं यथायथं विपरि-

---

[1] JF om. these three words.

[2] Thus BH Bh (Grantha Ms.), Keś.; ॰नामसंकाशे Be F.

दधावहै पुनस्त्व इत्यथ गार्हपत्यमुपतिष्ठते नमो ऽग्नये ऽप्रतिविद्धाय नमो ऽनाधृष्टाय नमः सम्राजे । अषाढो अग्निर्बृहद्वया विश्वजित्सहन्त्यः श्रेष्ठो गन्धर्व इत्यथान्वाहार्यपचनमुपतिष्ठते त्वत्पितारो अग्ने देवास्त्वामाहुतयस्त्वद्विवाचनाः । सं मामायुषा सं गौपत्येन सुहिते मा धा इत्यथाहवनीयमुपतिष्ठते ॥ १३ ॥

अयमग्निः श्रेष्ठतमो ऽयं भगवत्तमो ऽयꣳ सहस्रसातमः । अस्मा अस्तु सुवीर्यमिति ˈ स[१] यद्यस्मै यज्ञभ्रेषमाचक्षते न ते ऽहौषीदिति तद्गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये संतनीं[२] जुहोति मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु । या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहेत्यथाग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपति ˈ शरावं दक्षिणां ददाति ˈ सा प्रसिद्धेष्टिः संतिष्ठते ˈ ऽथातिपन्नाः प्रतिजुहोत्येतेन ह स्म वै पूर्वे श्रोत्रिया व्रतायवस्तेजस्कामा यशस्कामा ब्रह्मवर्चसकामा उपतिष्ठन्ते ˈ[३] तदेतदुत्सन्नं व्रतस्यैव गरिम्णाथातो वैराजमेवोपस्थानं ˈ नर्य प्रजां मे गोपायेति गार्हपत्यमथर्व[४] पितुं मे गोपायेत्यन्वाहार्यपचनꣳ ˈ शꣳस्य पशून्मे गोपायेत्याहवनीयꣳ ˈ

---

[१] om. BH.

[२] संततिं H; संततीं B; संततीर् Be; संतनि J; संतनीयं F; इमतं T; संतनिं Keś.

[३] Before तदेतदु॰ Be J ins. च, F चा ।

[४] After गार्हपत्यम् JF ins. उपतिष्ठते ।

ब्रह्मत्वं करिष्यन्यज्ञोपवीत्यप आचम्याग्रेणाहवनीयं परीत्य दक्षिणत उदङ्मुखस्तिष्ठन्ब्रह्मसदनमुपतिष्ठते नमो ब्रह्मणे नमो ब्रह्मसदनायेत्यथासनात्तृणं निरस्यत्यहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद यो ऽस्मत्पाकतर इत्युपविशत्युन्निवत उदुद्वतश्च गेषमित्यथेमे समीक्षते पातं मा द्यावापृथिवी अद्याह्न इत्युपविश्य जपति भूर्भुवः सुवः क इदं ब्रह्मा भविष्यति स इदं ब्रह्मा भविष्यति प्राणः प्रजापतियुक्तो ऽहं युञ्जे ब्रह्मणार्वेव वाजी सुधुर इव वह्निर्बलीवर्द इव युक्तो हव्यं वक्ष्याम्यहं देवताभ्यो भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः सुवः प्रपद्ये वायुं प्रपद्ये ब्रह्म प्रपद्ये क्षत्रं प्रपद्ये ऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं प्रपद्ये ऽनार्तां देवतां वाचं पप्रद्य ओं प्रपद्य इति । तं यजमानो ब्रह्माणं वृणीते भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमहे वीतहव्ये पुरोहितं येनायन्नुत्तमꣳ सुवर्देवा अङ्गिरसो दिवमिति । वृतो ब्रह्मा जपत्यहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि ब्रह्माणं मावृथा वीतहव्ये पुरोहितं येनायन्नुत्तमꣳ सुवर्देवा अङ्गिरसो दिवं देव सवितरेतं त्वा वृणते बृहस्पतिं दैव्यं ब्रह्माणं तदहं मनसे प्रब्रवीमि मनो गायत्रियै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे ऽनुष्टुप्पङ्क्त्यै पङ्क्तिः प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो विश्वे देवा बृहस्पतये बृहस्पतिर्ब्रह्मणे ब्रह्म भूर्भुवः सुवर्बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणां बृहस्पते यज्ञं गोपायेति । स यत्राह ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेति तद्ब्रह्मा प्रसौति ॥२३॥

देव सवितः प्रणय यज्ञं देवता वर्धयिता नाकस्य पृष्ठे सुवर्गे लोके यजमानो अस्तु । सप्तर्षीणाꣳ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्यों प्रणयेति । स वाचंयमो भवति प्रणीतासु प्रणीयमानास्वा हविष्कृतः । सांनाय्ये दोह्यमान आ ततो यदाह बहु दुग्धीन्द्राय देवेभ्यो हव्यमिति महेन्द्रायेति वा यदि महेन्द्रयाजी भवत्यधिवपने वाचं यच्छत्या कपालोपधानात्संवपने वाचं यच्छत्या [1]समभिवासनात्स्तम्बयजुष्याह्रियमाण[2] आ प्रोक्षणीनामासादनात्स यत्राह ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामीति तद्ब्रह्मा प्रसौति बृहस्पते परिगृहाण वेदिं ब्रह्मणा यज्ञं परिगृहीहीमम् । सप्तर्षीणाꣳ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्यों परिगृहाणेत्याज्येषु गृह्यमाणेषु वाचं यच्छत्या [3]ध्रुवासादनात्सामिधेनीष्वनूच्यमानास्वा प्रवरादनूक्तायां पुरोनुवाक्यायामा वषट्कारात्प्राशित्रे ऽवदीयमान आ प्रसवात्परिहरन्त्यस्मा एतत्प्राशित्रमग्रेणाहवनीयं तदाह्रियमाणं प्रतिपश्यति ॥ २४ ॥

सूर्यस्य त्वा चक्षुषा प्रतिपश्यामीत्यथैनदुभाभ्याꣳ हस्ताभ्यां प्रतिगृह्णाति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो

---

[1] भस्माभिवासनात् Be T.

[2] Thus Be H; ॰यजुꣳष्याह्रि॰ F, the other MSS. more or less corrupt.

[3] स्रुवासादनात् Be H, स्रुवादानात् B; समासादनात् T; JF totally corrupt. Bh. has in some copies ध्रुवा॰, in others स्रुवा॰ ।

हस्ताभ्यां प्रतिगृह्णामीत्यथैनत्सादयति पृथिव्यास्त्वा नाभौ सादयामीत्यथैनदवेक्षते सुपर्णस्य त्वा गरुत्मतश्चक्षुषावेक्ष इत्यथैनदङ्गुष्ठेन च महानाम्न्या चोपसंगृह्यातिहाय दतः पूर्वं जिह्वाग्रे निदधात्यग्नेस्त्वास्येन[१] प्राश्नामीति । प्राश्याप आचम्य महाद्भिरवगिरति ब्राह्मणस्योदरेण बृहस्पतेर्ब्रह्मणेत्यथाद्भिर्मार्जयित्वा प्राणान्संमृशते वाङ्म आसन्नसोः प्राणो ऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वोरोजो ऽरिष्टा विश्वान्यङ्गानि तनूस्तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसीरिति । मयि प्राणा मयि प्राणा इति वाहृतं ब्रह्मभागं प्राशित्रहरणे निदधात्यथान्वाहार्यं याचति । तमन्तर्वेद्यासन्नमभिमन्त्रयते ॥ २५ ॥

ब्रह्मन्ब्रह्मासि नमस्ते ब्रह्मन्ब्रह्मणे पाहि मामकृताद्य सर्वो मह्यं कृतो भवेत्यथास्य यावन्मात्रमवदाय प्राशित्रहरणे निदधाति क्षीरस्येहि मामभ्यन्नवानन्नादो भूयासमित्यथैनमग्रेण स्रुच उदञ्चं नीयमानमनुमन्त्रयते यज्ञो दिवꣳ रोहतु यज्ञो दिवं गच्छतु यो देवयानः पन्थास्तेन यज्ञो देवाꣳ अप्येत्विति । स यत्राह ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीति तद्ब्रह्मा प्रसौति देव सवितरेतत्ते प्राह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाह्योंं प्रतिष्ठेति । प्रचरतेति प्रवर्ग्ये । सो ऽत्रैवास्त आ समिष्टयजुषो होमाद्धुते समिष्टयजुष्युपोत्थायाहवनीयमुपतिष्ठते ऽयाड्यज्ञꣳ हविषो जातवेदा अदब्धो अन्ततः पूर्वो अस्मि-

---

[१] निधाय instead of निदधाति Be F, निधायति J

न्निषद्य । सन्वन्सनिꣳ सुविमुचा नो विमुञ्च धेह्यस्मासु द्रविणं जातवेदो यच्च भद्रमिति । स एतेनैव[1] ब्रह्मा भवति दर्शपूर्णमासयोरिष्टीनां चातुर्मास्यानां पशुबन्धस्य सौत्रामण्या इति । ॥ २६ ॥ नवमः ॥

हवीꣳष्यासाद्य होतारमामन्त्रयते । स यज्ञोपवीत्यप आचम्य हस्तौ संमृशते कर्मणे वां देवेभ्यः शकेयꣳ शक्त्यै वाꣳ सुकृताय वामित्यथ द्वाभ्यामात्मन्यग्निं[2] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरित्यथान्तरेण वेद्युत्करौ प्रपद्यते सत्यं प्रपद्य ऋतं प्रपद्ये ऽमृतं प्रपद्ये प्रजापतेः प्रियां तनुवमनार्तां प्रपद्य इदमहं पञ्चदशेन वज्रेण द्विषन्तं भ्रातृव्यमवक्रामामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो भूर्भुवः सुवर्विष्णो स्थाने तिष्ठामीति । दक्षिणेन प्रपदेनोत्तरं वेद्यन्तमवक्रम्य तिष्ठति । यदा जानात्यग्नये समिध्यमानायानुब्रूहीति तदेदꣳ[3]होत्रं[3] जपति कं प्रपद्ये तं प्रपद्ये यत्ते प्रजापते शरणं छन्दस्तत्प्रपद्ये यावत्ते विष्णो वेद तावत्ते करिष्यामि देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि नमो ऽग्नय उपद्रष्ट्रे नमो वायव उपश्रोत्रे नम आदित्यायानुख्यात्रे जुष्टामद्य[4] देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यः स्वधावतीं पितृभ्यः प्रतिष्ठां विश्वस्मै भूताय भूर्भुवः

---

[1] एव om Be JF.

[2] °मात्मन्° only B Be.

[3] Thus B H; तदेतं TBe; तदेतंतु J; यदेतंतु F, the last three omitting होत्रं।

[4] Thus J; °द्यं F, the other MSS. omit अद्य ।

सुवः प्रशास्त आत्मना प्रजया पशुभिः प्रजापतिं प्रपद्ये ऽभयं मे अस्तु प्राजापत्यमनुवक्ष्यामि वाचं प्रपद्ये वागार्त्विज्यं करिष्यति[1] यशसे त्वा द्युम्नाय त्वेन्द्रियाय त्वा भूत्यै त्वा यज्ञो यज्ञाय महि शर्म यच्छतामित्यत्र त्रिरभिहिङ्कृत्यानवानमभि हिङ्कारादृचमुपसंदधाति[2] । प्र वो वाजा अभिद्यव इति त्रिः प्रथमामन्वाह । त्रिरुत्तमाꣳ । सर्वा अर्धर्चशो ऽपानित्यनूक्तासु[3] सामिधेनीषु देवता आवाह्य भूमौ प्रादेशं कृत्वोपविशतीदमहं गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना वषट्कारेण वज्रेण द्विषन्तं भ्रातृव्यमवबाधे ऽवबाढो द्विषन्निति । स आहवनीयं प्रेक्षमाण आस्ते । प्रणीता वोभयं वान्तरेण वा वीक्षते । ऽनप्रगल्भो हास्माज्जायते[4] । यदा जानात्यग्निर्देवो होतेत्येतज्जपति देव सवितरेतं त्वा वृणते ऽग्निहोत्राय सह पित्रा वैश्वानरेणेत्यथोपोत्थाय[5] दक्षिणेन हस्तेन दक्षिणे ऽꣳसे ऽध्वर्यु-

---

[1] JBe ins. मन आर्त्विज्यं करिष्यति ।

[2] Thus JFT ; अभिसंद॰ the other MSS.

[3] Thus (अपानिति) only F; ॰यानित्य॰ Be; the other MSS. more or less corrupt.

[4] As I am not sure about the original reading of this passage, I give the var. lect. of all my MSS.; प्रणीतां वोभयं वांतरेण वा वीक्षते नप्रगल्भो ह्यस्मा॰ B; thus also H, but वांतरेणववी and हास्मा; प्रणीतां वोभयं वांतरेणेति वेतिद्वीक्षते नप्रगल्भोहस्मा॰ Be; प्रणीतां वोभयान्तरेणेति वेतिवावीक्षते प्रगल्भोह्यस्मा॰ T; प्रणीता वोभयं वांतरेण नेति वेति वोक्ष्यतनप्रगल्भहस्मांजायते J; प्रणीता वोभंयं वांतरेणेति वेति वेक्षेतेनप्रल्लहस्मांज॰ F.

[5] अथ om. B Be H.

मन्वारभते सव्येन दक्षिणे ऽꣳस आग्नीध्रं' यद्यु वै स्वयं प्रत्यावर्येन्नीविदेश एनं दक्षिणस्याꣳ श्रोण्यामन्वारभेताग्निमन्वारभामहे होतृवूर्यं पुरोहितम्। येनायन्नुत्तमꣳ स्वर्देवा अङ्गिरसो दिवम् ॥ देवा देवेषु पराक्रमध्वं प्रथमा द्वितीयेषु द्वितीयास्तृतीयेषु त्रिरेकादशा अनुसꣳरभध्वमित्यथाध्वर्यवे नाम प्रब्रूते' ५
ऽथ दक्षिणमꣳसमभि पर्यावर्तत ऐन्द्रीमावृतमन्वावर्त इत्यथ होतृषदनमभिव्रजञ्जपति[1] ॥ २७ ॥

षण्मोर्वीरꣳहसस्पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च ता मा रक्षन्तु ता मा गोपायन्तु ताभ्यो नम
इत्यथासनात्तृणं निरस्यति शुष्कं वा प्रतिच्छिन्नाग्रं वा दक्षि- १०
णार्थे च सन्धिमनु प्रतीच्यै च निरस्तः परावसुरित्यथाप उपस्पृश्योपस्तीर्योपविशतीदमहमर्वावसोः[2] सदने सीदामीति दक्षिणोत्तर्यथ दक्षिणाद्गार्हपत्यं प्रतीक्षते विश्वकर्मꣳस्तनूपा[3] असि तनुवं मे पाहीत्युभौ समीक्षत आहवनीयं चाग्नाविष्णू
मा वामवक्रमिषमोजो ऽशिष्टं[4] विजिहाथां मा मा संताप्तं १५
लोकं मे लोककृतौ कृणुतमित्येष वां लोक इति मनागिवोदङ् सर्पत्यथ तिस्र[5] ऋचो[5] जपति विश्वे देवाः शास्तन मा

---

[1] Thus BTH; अभिप्रव्रजञ्जपति Be; अभिप्रव्रजति the other MSS.

[2] संस्तीर्यैव instead of उपस्तीर्य B Be H.

[3] Uncertain reading. °कर्मंस्वतनूनपा B; °कर्मंस्वतनूपा H; °कर्मंस्वतमूनपा Be; °कर्मंतनूनपा TF; °कर्मंतनूपा J; comp. S'āṅkh. śrs. I. 6. 11.

[4] Thus BTJ; शिष्टं F; शिष्टा Be; शिष्ठा H.

[5] Thus Be FT; तिस्रचो J; चतस्रऋचो H; B om. the number.

यथेह होता वृतो मनवै यन्निषद्य। प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥[१] तदद्य वाचः प्रथमं मसीय येनासुराꣳ अभि देवा असाम। ऊर्जाद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम् ॥ नमो महद्भ्यो नमो
५ अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम देवान्यदि शक्नवाम मा ज्यायसः शꣳसमा वृक्षि देवा इत्यथ स्रुगादापनेन स्रुचावादाप्य यथादेवतꣳ हविषो यजत्यथ वषट्काराणामनुमन्त्रणो[२] वषट्कार मा मे प्रवृक्षो अहं त्वां[३] बृहता मन उपह्वये मातरिश्वना प्राणान्न मे वाचꣳ[४] हव्यं देवेभ्योऽभिवहा-
१० स्योजः सहः सह ओजो वागिति' यद्यु[५] वा[५] अभ्यया[५] वषट्काराः[५] स्युरेतावतैवानुमन्त्रयत ओजः सह ओजो वागित्यथ होतुर्द्विरङ्गुलावनक्ति' यत्पूर्वाक्तं[६] तदुत्तरोष्ठे प्रोहति वाचस्पतये त्वा ऋतं प्राश्नामीषे प्राणायेति' सदसस्पतये त्वा ऋतं प्राश्ना-

---

[१] After वहानि B Be HT have one ṛc more, *viz.* ṚV. X. 53. 2. Is the number (तिस्र or चतस्र, P. 100, l. 17) an interpolation?

[२] अनुमंत्रो Be FJ.

[३] मामेप्रष्टक्षो अर्हंत्वां BH (but त्वा H); कामेप्रष्टक्षो अर्हंत्वा Be; मप्रष्टक्षोतदहंत्वा J; F totally corrupt; comp. Āp. XXIV. 14 12.

[४] Uncertain reading, comp. Āp. l.c., Ait. BV. III. 8; Ath. S. V. 10. 8 प्राणान्नमेवाचꣳ H Be and B pr. m.; B sec. m नमोनमो; प्राणान्मेवाचं J; प्राणान्मवाच F; प्राणान्नमोवाचं T.

[५] Uncertain reading. यद्युवा अप्यया वषट्कारा T; यद्युद्वाभ्येयावषट्का J; यद्युद्वात्यभिवषट्कारा F; यद्युवा अभ्यवषट्काराः B Be H.

[६] Thus BJ; पूर्वोक्तं H Be; पूर्वेक्तं (*i. e.* पूर्वोक्तं ?) F; पूर्वार्धं T.

म्यूर्जे ऽपानायेत्यधरोष्ठे ऽपोहत्यथाप उपस्पृश्य चतुरवान्तरेडामवदापयते ऽप्रसृतेन पाणिनासमस्तेनेडां मुखसंमितामुपह्वयते[1] ॥ २८ ॥

उपहूतꣳ[1] रथन्तरꣳ सह पृथिव्या सहाग्निना सहान्नाद्येन सह वाचोप मा रथन्तरꣳ सह पृथिव्या सहाग्निना सहान्नाद्येन सह वाचा ह्वयतामुपहूतं वामदेव्यꣳ सहान्तरिक्षेण सह वायुना सह प्राणेन सह पशुभिरुप मा वामदेव्यꣳ सहान्तरिक्षेण सह वायुना सह प्राणेन सह पशुभिर्ह्वयतामुपहूतं बृहत्सह दिवा सहादित्येन सह चक्षुषोप मा बृहत्सह दिवा सहादित्येन सह चक्षुषा ह्वयतामुपहूतꣳ स्थास्नु भुवनमुप मा स्थास्नु भुवनꣳ ह्वयतामुपहूतं चरिष्णु भुवनमुप मा चरिष्णु भुवनं ह्वयतामुपहूताः सप्त होत्रा उप मा सप्त होत्रा ह्वयन्तामुपहूता गावः सहाशिरोप मा गावः सहाशिरा ह्वयन्तामुपहूता धेनुः सहर्षभोप मा धेनुः सहर्षभा ह्वयतामुपहूतेडा वृष्टिरुप[2] मामिडा वृष्टिर्ह्वयतामुपहूतो भक्षः सखोप मा भक्षः

---

[1] Be: ॰दापयत एतेन प्रसृतेन पाणिनोडामुपह्वयते मुखसंमितमुपहूतꣳ; B: ॰दापयत एतेन प्रसृतेन पाणिनेडामुपह्वयते मुखसंमितमुपहूतꣳ; J: ॰दाययत्तेप्रसृतेन पाणिना समग्रेण चांमुखसंमितामुपह्वयत उपहूतꣳ; H: ॰दापयत एतेन प्रसृतेन पाणिनेडामुपह्वयते मुखसंमितामुपहूतꣳ; F: ॰दाययते प्रसृतेन पाणिना समग्रेणानडामुखसंमितामुपह्वयते । उपहूतꣳ; T: ॰दापयते पसृतोपाणिना समस्तेन तां मुखसंमितामुपह्वयत उपहूतं ।

[2] Instead of वृष्टिर् JFT have चतुरिर् comp. S'āṅkh. śrs. I. 11. 1: चतुरिः ।

सखा [1]ह्वयतामुपहूताꣳ हो इडोपहूता हे सासि जुषस्व मेड इत्युपाꣳशूच्चैर्निरुक्तामुपह्वयते । स यदि सर्वां प्राशिष्यन्स्यात्पाणौ कृतानि प्राश्य चमसादेव प्राश्नीयादथ यदि दित्सेद्वा[2] निधित्सेत[3] वा पुरोडाशशकलमवच्छिद्यैव प्राश्नीयादिडासि
५ स्योनासि स्योनकृत्सा नो रायस्पोषे सुप्रजास्त्वे धा सुखस्य त्वा द्युम्नाय सुरभ्यास्यत्वाय[4] प्राश्नामीति । प्राश्याप आचम्य प्राचीं वोदीचीं वोदकराजिं निनयति तूष्णीमिति श्वेवाज्यस्य[5] वचो[6] । ऽथाप्येतं जपं जपति मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु । बृहस्पतिस्तनुतामिमं नो विश्वे देवा
१० इह मादयन्तामित्यनूयाजानिष्ट्वा शंयुवाकमुक्त्वा[7] बर्हिष्यञ्जलिं

---

[1] The following passage runs thus in the MSS.: ह्वयतामुपहूतास्हो उपहूतां । हो इडेडासिजुषस्वमे उमत्युपांशू॰ Be; ह्वयतामुपहूताꣳ हो इडोपहूतोपहूतेडातं जुषस्वमेडा इत्युपांशु॰ B; ह्वयतामुपहूतꣳ होपहूताहेसासिजुषस्वमेडावुपाꣳशू॰ J; ह्वयतामुपहूतꣳ होइडोपहूताहसासिजुषस्व इत्युपाꣳशू॰ F; ह्वयतामुपहूतंहोइडोपहूताहेसासिजुषस्व मेडा इत्यपांशू॰ T; ह्वयतामुपहूताꣳ हो उपहूताहोइडेडासिजुषस्व मे २ मे २ इत्युपाꣳशू॰ H.

[2] Thus T; दिघेद्वा Be J H F; दित्सोद्वा B.

[3] सिनित्सेत B; तिनित्सेत H; दिधीत्सेत T; निनिष्विलेत Be; निमिधिश्येत J; निनिधिषत F.

[4] Corrected acc. to Śāṅkh. śrs. I. 12. 5; B: सुरभ्यस्यत्वाय, the other MSS more or less corrupt, some omit the word.

[5] Thus Be T; ॰वाघ्यस्य B; ॰वाजस्य HF; ॰वाज्य J; Bh. seems to read name of the ṛṣi: श्वाद्य ।

[6] Thus T; वचायथा F; वाचोया॰ H B Be; वाचाया॰ J.

[7] Be om. these two words; इष्ट्वा instead of उक्त्वा BHF.

त्वा निह्नुते यज्ञ शं च म उप च मे प्रजापते यज्ञ यत्ते न्यूनं यदु तेऽतिरिक्तं कर्म प्रजापतौ[1] यज्ञ तदित्यथ दक्षिणार्धे[2] वेद्यै वेदं[3] निधाय[3] यजमानं वाचयति ॥ २९ ॥

येन त्वं देव वेद[4] देवेभ्यो वेदोऽभवस्तेनास्मभ्यं वेद एधि। वेदोऽसि वित्तिरसि विदेयाहं प्रजां पशून्स्वर्गं लोकम्। कर्मासि करुणमसि क्रियासमहं पुण्यं कर्म। सनिरसि सनितासि सनेयमहममदो घृतवन्तं कुलायिनꣳ रायस्पोषꣳ सहस्रिणं वेदो ददातु वाजिनमिति' पत्नीसंयाजानिष्ट्वा फलीकरहोमे कृते वेदे पत्नीं वाचयति वेदोऽसि वित्तिरसि विदेयाहममदः। कर्मासि करुणमसि क्रियासमहममदः सनिरसि सनितासि सनेयमहममदो घृतवन्तं कुलायिनꣳ रायस्पोषꣳ सहस्रिणं वेदो ददातु वाजिनमिति' विस्रस्य वेदतृणानि पत्न्यै प्रयच्छति' तानि पत्न्यन्तरोरू वा न्यस्यति[5] दक्षिणेन

---

[1] Thus BT (only with यदतिरिक्तं instead of यदुतेतिरिक्तं T); मउपचत प्रजापते यज्ञपते नूनं यदतिरिक्तं कर्मप्रजापतौ Be; मउपचते प्रजापते यज्ञयन्ते न्यूनं यदतिरिक्तं कर्मप्रजापतौ H; उपचतउपचत प्रजापते यज्ञयत्ते नूनं यदतिरिक्तं कर्मप्रजापती J; मउपचप्रजापतेयज्ञं यत्ते नूनं यदरिक्तं कर्मप्रजापते F.

[2] Thus BTJ; दक्षिणाख्ये F; दक्षिणा H; दक्षिणाविधे B (which omits वेद्यै)।

[3] Thus BTHF; वेदं om. J Be; वेदे ins. after निधाय TB; वेदं ins. after निधाय Be.

[4] Thus (देववेद) Be H; BJ om. वेद; F om. देव।

[5] Conjectural reading. ष्यंतरोरुपन्यस्य J; ष्यंतरोरुपन्यस्य Be; ष्यंतरोरुपन्यस्य H; ष्यंतरोरुप न्यस्यति B; ष्यन्तरोर्वोरुपपास्यति T; नवमोरुपल्यास्य F.

वोरुणोपनिग्रथ्नीते' ऽथेतराणि प्राङावृत स्तृणन्नेति तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृताननुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनमित्यथ यान्यतिशिष्यन्ते तानि बर्हिषि संन्यस्यत्यापृणो ऽसि संपृण प्रजया मा पशुभिरापृणेत्यथ यथाप्रपन्नं निष्क्रम्याग्रेणाहवनीयं परीत्य दक्षिणत उदङ्मुखस्तिष्ठन्नाहवनीयमुपतिष्ठते ऽयाड्यज्ञꣳ हविषो जातवेदा अदब्धो अन्ततः पूर्वो अस्मिन्निषद्य । सन्वन्सनिꣳ सुविमुचा नो विमुञ्च धेह्यस्मासु द्रविणं जातवेदो यच्च भद्रम् ॥ एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा । उत प्रणेष्यभि वस्यो अस्मान्सं नः सृज सुमत्या वाजवत्या ॥ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अग्निरिन्द्रो बृहस्पतिर्विश्वे[1] मुञ्चन्तु मरुतः स्वर्का इत्येतयैव जपा दर्शपूर्णमासयोरिष्टीनां चातुर्मास्यानां पशुबन्धस्य सौत्रामण्या इति' ॥ ३० ॥

अथ पशावुपधीयन्ते' यदा जानात्यग्नये मथ्यमानायानुब्रूहीति तदेते ऋचौ जपति यद्वो वयं प्रमिनाम व्रतानि ॥ यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः । अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाꣳ ऋतुशो यजातीति' मैत्रावरुणदण्डे ऽध्वर्युर्यजमानं वाचयति त्वां गावो ऽवृणत राज्याय

---

[1] विश्वेदेवा B Be H, but comp. Kauś. sū. 97. 8, Kāty. śrs. XXV. I. 11.

त्वाँ हवन्त मरुतः स्वर्काः । वर्षिष्ठक्षत्र ककुभि शिश्रियाणस्ततो न उग्रो विभजा वसूनीति ' तमग्रे गृहीत्वा मैत्रावरुणाय प्रयच्छति मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा प्रयच्छामीति ' तँ स सूरतः प्रतिगृह्णाति मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा प्रतिगृह्णामीति दक्षिणोत्तरयैनमूर्ध्वमुन्मार्ष्ट्यवक्रो ऽविधुरो भूयासमिति ' समादाय संप्रेष्यति होता यक्षदग्निँ समिधा सुषमिधा समिद्धमित्यान्तं पशोः ' ॥ ३१ ॥ दशमः ॥

इति तृतीयः प्रश्नः ॥

पशुना यक्ष्यमाणो भवति । स उपकल्पयते पौतुद्रवान्परिधीन्गुल्गुलु[1] सुगन्धितेजनꣳ शुक्लामूर्णास्तुकां या पेलस्यान्तरा शृङ्गे द्वे रशने द्विगुणां च त्रिगुणां च द्वे वपाश्रपणी विशाखां चाविशाखां च हृदयशूलं कार्ष्मर्यमयान्परिधीनौदुम्बरं मैत्रावरुणदण्डं मुखेन संमितमिध्माबर्हिरिध्मं प्रणयनीयं प्लक्षशाखामिक्षुसूनं यवान्यवमतीभ्यः सक्तून्सक्तुहोमाय पृषदाज्याय दधि हिरण्यमित्यथामावास्येन वा हविषेष्ट्वा नक्षत्रे वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा षड्ढोतारं मनसानुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा यूपाहुतिं जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नः कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाथ याचत्याज्यस्थालीꣳ स्रुवां बर्हिर्हिरण्यमुदपात्रꣳ । ह्वयन्ति तक्षाणꣳ सपरशुमाच्छैहि[2] यजमानेति पूर्वया द्वारोपनिष्क्रम्य तां दिशं यन्ति यत्रास्य यूप स्पष्टो भवति यत्र वा वेत्स्यन्मन्यते । स यः समे भूम्यै स्वाद्योने रूढो बहुपर्णो बहुशाखोऽप्रतिशुष्काग्रः प्रत्यङ्ङुपनतस्तमुपतिष्ठते ऽत्यन्यानगां नान्यानुपागामर्वाक्त्वा परैरविदं परो ऽवरैस्तं त्वा जुषे वैष्णवं देवयज्याया इत्यथैनमाज्येनानक्ति देवस्त्वा सविता मध्वानक्त्वित्युर्ध्वाग्रं बर्हिरनूच्छ्रयत्योषधे त्रायस्वैनमिति । स्वधि-

---

[1] Thus Keś; गुगुलु B; गम्गुलु Be H; गुल्गुलु T; बल्गुलु F.

[2] Thus only Be H; the other MSS. om. चाह ।

तिना तिर्यञ्चं प्रहरति स्वधिते मैनꣳ हिꣳसीरिति । यः प्रथमः शकलः परापतति तं प्रज्ञातं निदधाति । तमपरिभिन्दन्ननक्षसङ्गं वृश्चति । प्राञ्चं वोदञ्चं वा प्रयान्तमनुमन्त्रयते दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिꣳसीः पृथिव्या संभवेत्यस्यामाव्रश्चे हिरण्यं निधाय संपरिस्तीर्याभिजुहोति वनस्पते शतवल्शो विरोह स्वाहेति । सहस्रवल्शा वि वयꣳ रुहेमेत्यात्मानं प्रत्यभिमृशते । ऽथैनꣳ शाखाः प्रसूदयति यं त्वायꣳ स्वधितिस्तेतिजानः प्रणिनाय महते सौभगायेति । पञ्चारत्निं तस्मै वृश्चेदित्येष ब्राह्मणवतामवमस्तं परिव्यङ्गपरमं[1] प्रादेशावमं चषालस्य काले परिवासयत्यच्छिन्नो रायः सुवीर इति । यत्परं भवति तस्य चतुरङ्गुलं चषालाय प्रच्छेदयति । तं चतुरश्रिं वाष्टाश्रिं वा कृत्वा वा हृत्वा[2] वा हारयत्योक्ष्य निस्तक्षत्येवं तक्षणानामेव स्वरुं कुरुते । ऽथास्यैषा पूर्वेद्युरेव पाशुबन्धिकी वेदिर्विमिता भवति दशपदा पश्चात्तिरश्ची द्वादशपदा प्राच्यष्टापदा पुरस्तात्तिरश्ची । तां परिस्तीर्य स्तम्बयजुर्हरति । ॥ १ ॥

इदमेव प्रसिद्धं पौरोडाशिकं । त्रिर्यजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं जपत्युद्धन्त्युद्धतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथ याचति स्फ्यमुदपात्रं बर्हिः

---

[1] Thus H Be T; परिव्यंगमपर॰ B; परिव्यंगंपर॰ F.

[2] Thus Be H and the Aptoryāma-Sūtra; कृत्वावाहृत्यवाहारयत्यूक्ष्य T; कृत्वावाहृत्यावाहारयत्योक्ष्य B; कृत्वावहरत्यावाहारयेत्वोक्ष्य F.

शम्यामित्येतत्समादायाहेहि यजमानेत्युत्तरेण वेदिं द्वयोर्वा त्रिषु वा प्रक्रमेषु स्फ्येनोद्धत्यावोक्ष्य शम्यया चात्वालं परिमिमीते । वित्तायनी मे ऽसीति पुरस्तादुदीचीनकुम्बयान्तरत स्फ्येनालिखति । तिक्तायनी मे ऽसीति दक्षिणतः प्राचीनकुम्बयान्तरत स्फ्येनालिखत्यवतान्मा नाथितमिति पश्चादुदीचीनकुम्बयान्तरत स्फ्येनालिखत्यवतान्मा व्यथितमित्युत्तरतः प्राचीनकुम्बयान्तरत स्फ्येनालिखत्यथ चात्वाले बर्हिर्निधाय तस्मिन्स्फ्येन प्रहरति विदेरग्निर्नभो नामाग्ने अङ्गिरो यो ऽस्यां पृथिव्यामसीत्यायुषा नाम्नेहीति । तदुत्तरवेद्यां निवपति यत्ते ऽनाधृष्टं नाम यज्ञियं तेन त्वादध इति । द्वितीयं प्रहरति विदेरग्निर्नभो नामाग्ने अङ्गिरो यो द्वितीयस्यां पृथिव्यामसीत्यायुषा नाम्नेहीति । तदुत्तरवेद्यां निवपति यत्ते ऽनाधृष्टं नाम यज्ञियं तेन त्वादध इति । तृतीयं प्रहरति विदेरग्निर्नभो नामाग्ने अङ्गिरो यस्तृतीयस्यां पृथिव्यामसीत्यायुषा नाम्नेहीति । तदुत्तरवेद्यां निवपति यत्ते ऽनाधृष्टं नाम यज्ञियं तेन त्वादध इति । तूष्णीं चतुर्थꣳ हरति सह बर्हिषाथाध्वर्युँ स्फ्येन चात्वालात्पुरीषमुद्धन्त्यथाग्नीध्रमाहाग्नीदितस्त्रिर्हरेति । ततस्त्रिराग्नीध्रो हरति । यदाग्नीध्रस्त्रिर्हरत्यथाध्वर्युरुत्तरवेद्यै पुरीषꣳ सम्प्रयौति सिꣳहीरसि महिषीरसीति । प्रथयत्युरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति । स्फ्येन सꣳहन्ति ध्रुवासीत्यथैनामद्भिरवोक्षति देवेभ्यः शुन्धस्वेति । देवेभ्यः शुम्भस्वेति सिकताभिरनुप्रकिरति । तां प्रादेशमात्रीं

चतुरश्रां[१] निधाय शम्यया परिमिमीत । उत्तरनाभिमुत्खायाथैनां प्रतिच्छाद्याभ्रिमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्यादायाभिमन्त्रयते ऽभ्रिरसि नारिरसीति । तया यूपावटं परिलिखति यथान्तर्वेद्यर्धꣳ स्याद्बहिर्वेद्यर्धं परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामीत्यथाग्नीध्रमाहाग्नीदेषीमं यूपावटं खनोपरसंमितं प्राक् पुरीषमुद्वपताच्चतुरङ्गुलेनोपरमतिखनतादिति । तꣳ स खनति वा खानयति वा । यावदेवात्राध्वर्युस्तिष्ठति तावदेव प्रतिप्रस्थाताभ्यादधातीध्मं प्रणयनीयमुपोपयमनीः कल्पयन्ति[२] चात्वालादात्मनेन्द्रघोषवतीः प्रोक्षणीरध्वर्युरादत्ते । परिकर्मिणे पञ्चगृहीतमाज्यं प्रयच्छति । अत्रापि संभारा भवन्त्यथ संप्रैषमाहाग्नये प्रणीयमानायानुब्रूह्यग्नीदेकस्फ्ययानुसंधेहीति । विस्तायामुपचक्रन्ते । होतुर्वंशं यद्युत्तरेण वेदिं प्रतिपद्यन्ते । धारयन्त्येतमग्निमथाध्वर्युरिन्द्रघोषवतीभिः प्रोक्षणीभिरुत्तरवेदिं प्रोक्षति । ॥ २ ॥

इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्विति पुरस्तान्मनोजवास्त्वा पितृभिर्दक्षिणतः पात्विति दक्षिणतः । प्रचेतास्त्वा रुद्रैः पश्चात्पात्विति पश्चाद्विश्वकर्मा त्वादित्यैरुत्तरतः पात्वित्युत्तरतो । ऽथ यत्प्रोक्षणीनामुच्छिष्यते तद्दक्षिणत उत्तरवेद्यै निनयति । यदेव

---

[१] Thus B T; चतुरस्रां the other MSS.

[२] Thus B Be T F; कल्पयति H.

तच्च क्रूरं तत्तेन शमयतीति ब्राह्मणमˈथैनाꣳ हिरण्यमन्तर्धायाज्ज्णधा पञ्चगृहीतेन व्याघारयति ˈ सिꣳहीरसि सपत्नसाही स्वाहेति दक्षिणे ऽꣳसे ˈ सिꣳहीरसि सुप्रजावनिः स्वाहेत्युत्तरस्याꣳ श्रोण्याꣳ ˈ सिꣳहीरसि रायस्पोषवनिः स्वाहेति दक्षिणस्याꣳ श्रोण्याꣳ ˈ सिꣳहीरस्यादित्यवनिः स्वाहेत्युत्तरे ऽꣳसे ˈ सिꣳहीरस्यावह देवान्देवयते यजमानाय स्वाहेति मध्ये ˈ ऽथ भूतेभ्यस्त्वेति स्रुचमुद्गृह्णात्यˈथ पौतुद्रवान्परिधीन्परिदधाति ˈ विश्वायुरसि पृथिवीं दृꣳहेति मध्यमं ˈ ध्रुवक्षिदस्यन्तरिक्षं दृꣳहेति दक्षिणमˈच्युतक्षिदसि दिवं दृꣳहेत्युत्तरमˈथातिशिष्टान्संभारान्निवपति गुग्गुलु[1] सुगन्धितेजनꣳ शुक्लामूर्णास्तुकामग्नेर्भस्मास्यग्नेः पुरीषमसीत्यˈथैनाꣳ स्रुवेणाभिघारयत्यˈथ[2] प्रदक्षिणमावृत्येमां प्रतिष्ठापयति यज्ञ प्रतितिष्ठ सुमतौ सुशेवा आ त्वा वसूनि पुरुधा विशन्तु । दीर्घमायुर्यजमानाय कृण्वन्नथामृतेन जरितारमङ्ग्धीत्यˈथैनं विश्वस्याहुतिषाहं कृत्वाध्वराहुतिभिरभिजुहोत्यग्निर्यज्ञं नयतु प्रजानन्मैनं यज्ञहनो विदन् । देवेभ्यः प्रब्रूताद्यज्ञं प्र प्र यज्ञपतिं तिर स्वाहा ॥ वायुर्यज्ञं नयतु प्रजानन्मैनं यज्ञहनो विदन् । देवेभ्यः प्रब्रूताद्यज्ञं प्र प्र यज्ञपतिं तिर स्वाहा ॥ सूर्यो यज्ञं नयतु प्रजानन्मैनं यज्ञहनो विदन् । देवेभ्यः प्रब्रूताद्यज्ञं प्र प्र यज्ञपतिं तिर स्वाहा ॥ यज्ञो यज्ञं

---

[1] Thus F; गुग्गुल B Be H; गुल्गुलु T (Grantha!).

[2] ०भिजुहोत्यथ Be F.

नयतु प्रजानन्मैनं यज्ञहनो विदन्। देवेभ्यः प्रभूताद्यज्ञं प्रभ यज्ञपतिं तिर स्वाहेत्यथैता यजमान एव स्वयं जुहोत्यग्निरन्नादो ऽन्नपतिरन्नस्येशे स मे ऽन्नं ददातु स्वाहा । वायुः प्राणदाः प्राणस्येशे स मे प्राणं ददातु स्वाहा। आदित्यो भूरिदा भूयिष्ठानां पशूनामीशे स मे भूयिष्ठान्पशून्ददातु स्वाहेत्यग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवꣳ स्वधितिꣳ स्रुचश्च[1] संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च दध्ना चोदेहीत्यावृतास्तु प्रोक्षणीषूदस्य स्फ्यं मार्जयित्वेध्माबर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य स्रुवꣳ स्वधितिꣳ[2] स्रुचश्च संमार्ष्टि तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च दध्ना चोदेत्याज्यं च प्रोक्षणीश्चोत्पूय प्रसिद्धमाज्यानि गृहीत्वा पृषदाज्यग्रहण्यामुपस्तृणीते महीनां पयो ऽसीति विश्वेषां देवानां तनूरिति द्वितीयं बर्हिषी अन्तर्धाय दध्यानयत्यृध्यासमद्य पृषतीनां ग्रहं पृषतीनां ग्रहो ऽसीत्यपोद्धृत्य बर्हिषी अथाभिघारयति विष्णोर्हृदयमसीत्येकमिष विष्णुस्त्वानुविचक्रम इति द्वितीयम् ॥ ३ ॥

अथ प्रोक्षणीभिरुपोत्तिष्ठतीध्मं प्रोक्षति वेदिं प्रोक्षति बर्हिः प्रोक्षति बर्हिरासन्नं प्रत्योपनिनीय पुरस्तात्प्रस्तरं

---

[1] Thus B Be T; स्रुवेण instead of स्रुवꣳ H; स्रुवं च स्वधितिं च F and S'rautapad. p. 161.

[2] स्रुवं च स्वधितिं च F.

गृह्णाति । पञ्चविधं बर्हिः स्तीर्त्वा[1] प्रस्तरपाणिः प्राङ्ङभिसृप्य कार्ष्मर्यमयान्परिधीन्परिदधात्यूर्ध्वे समिधावादधाति । विधृती तिरश्ची सादयति । विधृत्योः प्रस्तरं । प्रस्तरे जुहूं । बर्हिषीतराः । एता असदन्निति समभिमृश्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य याचति यवमतीः प्रोक्षणीर्बर्हिर्हस्तमाज्यस्थालीꣳ सस्रुवाꣳ स्वरुरशनं मैत्रावरुणदण्डं यूपशकलꣳ हिरण्यमुदपात्रमित्येतत्संनिधाय यूपं प्रक्षालयति यत्ते शिक्वः परावधीत्तक्षा हस्तेन वास्या । आपस्ते तद्वनस्पते ऽपनुदन्तु[2] शुन्धनीरिति । यूप एष प्रक्षालितः प्रपन्नः संपन्नचषालः प्रागवटादुपशेते । तमुत्तरेणाहवनीयं तिष्ठन्पराञ्चं प्रोक्षति पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वेत्यवटे ऽपो ऽवनयति शुन्धतां लोकः पितृषदन इति । यवान्प्रस्कन्दयति यवो ऽसि यवयास्मद्द्वेषो यवयारातीरिति । बर्हिर्हस्तं व्यतिषज्यावस्तृणाति पितृणाꣳ सदनमसीत्यथैनद्धिरण्यमन्तर्धाय[3] स्रुवाहुत्याभिजुहोति पितृभ्यः स्वाहेति । यूपशकलमवास्यति स्वावेशो ऽस्यग्रेगा नेतॄणां वनस्पतिरधि त्वा स्थास्यति तस्य वित्तादित्यथादत्त आज्यस्थालीꣳ सस्रुवाꣳ स्वरुरशनं मैत्रावरुणदण्डमुदपात्रमित्येतत्समादायाहैहि यजमानेत्यन्वग्यजमानो ऽनूची पत्न्यग्रेण यूपं परीत्य दक्षिणत उदङ्मु-

---

[1] अथ ins. H Be (sec. m.)

[2] Thus B; वनस्पतेरपनु° the other MSS.

[3] Thus (एनत्) all, see Bh.

स्वास्तिष्ठन्ति पूर्व एवाध्वर्युरपरो यजमानोऽपरा पत्न्यथ प्रवृह्य चषालं यूपस्याग्रमनक्ति देवस्त्वा सविता मध्वानक्त्वित्यन्तरतस्य बाह्यतस्य' स्वभ्यक्तं कृत्वा चषालं प्रतिमुञ्चति सुपिप्पलाभ्यस्त्वौषधीभ्य इत्यथ स्रुवेणाग्निष्ठामश्रिमभिघारयन्नाह यूपायाज्यमानायानुब्रूहीत्यान्तमनक्त्यान्तमेव यजमानं तेजसानक्ति' नोपरमनक्ति' पत्न्युपरमनक्ति' सर्वतः परिमृशत्यपरिवर्गमेवास्मिन्तेजो दधातीति ब्राह्मणमुच्छ्रयन्नाहोच्छ्रीयमाणायानुब्रूहीत्युच्छ्रयत्युद्दिवꣳ स्तभानान्तरिक्षं पृण पृथिवीमुपरेण दृꣳहेत्यथैनं वैष्णवीभ्यामृग्भ्यां कल्पयति ते ते धामानि विष्णोः कर्माणि पश्यतेति द्वाभ्याꣳ' स यत्राग्निष्ठामश्रिमाहवनीयेन संपादयति तद्भुवस्य चषालं परेक्षयति तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमित्यथैनं प्रदक्षिणं पुरीषेण पर्यूहति ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिꣳ रायस्पोषवनिं पर्यूहामीति' मैत्रावरुणदण्डेन सꣳहन्ति ब्रह्म दृꣳह क्षत्रं दृꣳह प्रजां दृꣳह रायस्पोषं दृꣳहेत्यन्यूनमनतिरिक्तं परिन्यस्योदपात्रमुपनिनीयाथैतां त्रिगुणाꣳ रशनां त्रिः संभुज्य मध्यमेन गुणेन नाभिदघ्ने परिव्ययन्नाह परिवीयमाणायानुब्रूहीति' त्रिः प्रदक्षिणं परिव्ययति परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमꣳ रायस्पोषो यजमानं मनुष्या इत्युपान्ते व्यतिषजत्यान्तं प्रवेष्टयत्यणिमति स्वविमप्रवयत्यथोत्तरेणाग्निष्ठामश्रिं मध्यमे गुणे स्वरुमवगूहत्यन्तरिक्षस्य त्वा सानाववगूहामीति' स्वर्वन्तं यूपमुत्सृजति' ॥ ४ ॥ प्रथमः ॥

अथैतं पशुं पल्पूलितमन्तरेण चात्वालोत्करौ प्रपाद्याग्रेण यूपं पुरस्तात्प्रत्यङ्मुखमुपस्थापयति । तमिषे त्वेति बर्हिषी आदायोपाकरोत्युपवीरस्युपो देवान्दैवीर्विशः प्रागुर्वह्नीरुशिजो बृहस्पते धारया वसूनि हव्या ते स्वदन्तां देव त्वष्टर्वसु रण्व रेवती रमध्वं प्रजापतेर्जायमाना[1] इमं पशुं पशुपते ते अद्येन्द्राग्निभ्यां त्वा जुष्टमुपाकरोमीति । यद्देवत्यो वा भवति । प्रज्ञाते बर्हिषी निधायाधिमन्थनꣳ शकलं[2] निदधात्यग्नेर्जनित्रमसीति । वृषणावन्वस्तौ वृषणौ स्थ इत्यथारणी आदत्त उर्वश्यस्यायुरसि पुरूरवा इत्यथैने आज्यस्थाल्याꣳ समनक्ति घृतेनाक्ते वृषणं दधाथामित्यथ प्रजातीर्वाचयति गायत्रं छन्दो ऽनु प्रजायस्व त्रैष्टुभं छन्दो ऽनु प्रजायस्व जागतं छन्दो ऽनु प्रजायस्वेत्यथाहाग्नये मथ्यमानायानुब्रूहीति । जात आह जातायानुब्रूहीति । प्रहरन्नाह प्रह्रियमाणायानुब्रूहीति । प्रहरति भवतं नः समनसाविति । प्रहृत्याभिजुहोत्यग्नावग्निश्चरति प्रविष्ट इत्यथ रशनामादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति । तयाक्ष्णया पशुमभिदधाति दक्षिणमर्धशीर्षमृतस्य त्वा देवहविः पाशेनारभ इति । द्विगुणायै च त्रिगुणायै चान्तौ संदधाति धर्षा मानुषानिति । नियुनक्त्यथैनमद्भिः प्रोक्षत्यद्भ्यस्त्वौषधीभ्य इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामीति । यद्देवत्यो वा भवति । पाययत्यपां पेरुरसीति ।

---

[1] These mantras are given sakalapāṭhena only in H Be.

[2] Thus BT Keś. अधिमंथनशकलं H F Be.

स्वात्तं चिद्देवꣳ हव्यमापो देवीः स्वदतैनमित्युपरिष्टात्प्रोक्ष्याधस्तादुपोक्षति । सर्वत एवैनं मेध्यं करोतीति ब्राह्मणमुदूह्य प्रोक्षणीधानम् ॥ ५ ॥

अथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूहीत्यभ्यादधातीध्मं । परि समिधꣳ शिनष्टि । वेदेनोपवाजयत्यनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति । संमृष्टे स्रुग्भ्यामुत्तरमंघारꣳ स्पर्शयन्स्रुचावुदङ्ङत्याक्रम्य जुह्वा पशुꣳ समनक्ति । सं ते प्राणो वायुना गच्छतामिति ललाटे । सं यजत्रैरङ्गानीति ककुदि । सं यज्ञपतिराशिषेति दक्षिणस्याꣳ श्रोण्यामथ यथायतनꣳ स्रुचौ सादयित्वा प्रवरं प्रवृणीते । प्रसिद्धꣳ होतारं वृणीतेऽथाश्रावयत्यो श्रावयास्तु श्रौषडग्निर्मित्रावरुणौ प्रशास्तारौ प्रशास्तादित्यसौ[1] मानुष इति मैत्रावरुणस्य नाम गृह्णात्यथाश्रावयति । यद्यचात्याश्रावयत्यो[2] श्रावयास्तु श्रौषडग्निर्ह दैवीनां विशां पुरएतायं यजमानो मनुष्याणां तयोरस्थूरि गार्हपत्यं दीदयच्छतꣳ हिमा द्वा यू राधाꣳसीत्संपृञ्चानावसंपृञ्चानौ तन्व इति । सीदति होता । प्रसवमाकाङ्क्षति । प्रसूतः स्रुचावादायात्याक्रम्याश्राव्याह समिद्भ्यः प्रेष्येति । वषट्कृते जुहोति प्रेष्य प्रेष्येति । चतुर्थाष्टमयोः समानयमानोऽष्टमे सर्वꣳ समानयते । परि स्वाहाकृतीभ्यः सꣳस्रावꣳ शिनष्टि । दश प्रयाजानिष्ट्वो-

---

[1] Thus all MSS. and Keś. except Be, which has प्रशास्तादि° ।

[2] Thus B ; the words °श्रावयति यद्यचात्य om. TF ; H Be om. चति, but comp. Bh.

दङ्ङत्याक्रम्य स्वरुं च शासं च याचति । तौ जुह्वामङ्क्त्वा[1] ताभ्यां पशुꣳ समनक्ति घृतेनाक्तौ पशुं त्रायेथामिति । प्रयच्छति शासम।वगूहति स्वरुम।थ यथायतनꣳ स्रुचौ सादयित्वाह पर्यग्नये क्रियमाणायानुब्रूहीत्य।थैष आग्नीध्र आहवनीयादुल्मुकमादायान्तरेण चात्वालोत्करावुत्तरेण शामित्रदेशमग्रेण पशुं जघनेन स्रुच इत्येवं त्रिः प्रदक्षिणं पर्येत्य।थानुपरिसरणमपाव्यानि जुहोति प्रजानन्तः प्रतिगृह्णन्ति पूर्वे येषामीशे पशुपतिः पशूनां ये बध्यमानमनु बध्यमाना य आरण्याः पशवो विश्वरूपाः प्रमुञ्चमाना भुवनस्य रेत इति । निधायाग्नीध्र उल्मुकं यथेतं त्रिः पुनः प्रतिपर्येत्य।थोल्मुकप्रथमाः[2] प्रतिपद्यन्ते । ऽन्वक्क्रमिता[3] पशुना । पशुमध्वर्युर्वपाश्रपणीभ्यामन्वारभते । वपाश्रपणी यजमानो । ऽथाश्राव्य संप्रेष्यत्युपप्रेष्य होतर्हव्या देवेभ्य इत्यथैतं[4] पशुमन्तरेण चात्वालोत्करावुदञ्चं नीयमानमनुमन्त्रयते नाना प्राणो यजमानस्य पशुना रेवतीर्यज्ञपतिं प्रियधाविशतेति द्वाभ्याꣳ । स[5] यत्रैतदाग्नीध्र उल्मुकं निदधाति तदग्रेण वोत्तरेण वा पशवे निहन्यमानाय बर्हिरुपास्यति पृथिव्याः संपृचः पाहीति । तदेतं पशुं प्रतीचीनशिरसमुदीचीनपादं निघ्नन्त्य।कृण्वन्तं मायुꣳ संज्ञपयतेत्युक्त्वैतेनैव यथेतमेत्य पृषदाज्यावकाश आसत इह

---

[1] Thus all (F. अनक्त्वा) ।

[2] FH om प्रति॰ ।

[3] Thus Be ; न्वक्प्रमिता B ; न्वक्शमिता the other MSS.

[4] Thus T Be ; अथैनं the other MSS.

[5] om. BF.

प्रजा विश्वरूपा रमन्तामस्मिन्यज्ञे विश्वविदो घृताचीः । अग्निं कुलायमभिसंवसाना अस्माꣳ अवन्तु पयसा घृतेनेति । संज्ञप्तं प्राक्जुहोति संज्ञप्ताहुतिं यत्पशुर्मायुमकृतेत्यथाभ्यैति[1] शमितार उपेतनेति । पाशात्पशुं प्रमुच्यमानमनुमन्त्रयतेऽदितिः पाशं[2] प्रमुमोक्त्वेतमित्यविशाखयोपसज्येमां दिशं निरस्यत्यरातीयन्त- ५
मधरं कृणोमि यं द्विष्मस्तस्मिन्प्रतिमुञ्चामि पाशमित्यथ प्रतिप्रस्थाता पत्नीमुदानयत्युदकमण्डलुमुत्थाप्याथैनामादित्यमुदीक्षयति नमस्त आतानेत्यथैनामन्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य[3] प्राचीमुदानयन्वाचयत्यनवा प्रेहि घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेणेत्यागतामध्वर्युरप्सु वाचयत्यापो १०
देवीः शुद्धायुवः शुद्धा यूयं देवाꣳ ऊढ्वꣳ शुद्धा वयं परिविष्टाः परिवेष्टारो वो भूयास्मेति । सानुपूर्वं[4] पशोः प्राणानाप्याययति । वाक्त आप्यायतामिति वाचं । प्राणस्त आप्यायतामिति प्राणं । चक्षुस्त आप्यायतामिति चक्षुः । श्रोत्रं त आप्यायतामिति श्रोत्रमेतानेव पुनः संमृशति या ते प्राणाञ्छुग्जगाम १५
या चक्षुर्या श्रोत्रं यत्ते क्रूरं यदास्थितं तत्त आप्यायतां तत्त एतेन शुन्धतामिति । नाभिस्त आप्यायतामिति नाभिं । पायुस्त आप्यायतामिति पायुꣳ । संमृश्य पदः प्रक्षालयति शुद्धा-

---

[1] Thus TH Be; चभ्येति BF.

[2] T gives the first two pādas of this stanza (TS. III. 1. 4. 1), perhaps rightly.

[3] Thus B Keś.; ॰निष्क्रमय्य Be TH; ॰निष्क्रम्ये F.

[4] ॰पूर्व्यं THF Keś.

स्वरित्राः शमद्भ्यः शमोषधीभ्यः शं पृथिव्या इति। शमहोभ्यामित्यतिशिष्टा दक्षिणतो ऽनुपृष्ठं निनयति। नयन्ति पत्नीमुत्तानं पशुं पर्यस्यन्ति[1]। तस्य दक्षिणस्य पार्श्वस्य विवृत्तमनु प्राचीनाग्रं बर्हिर्निदधात्योषधे त्रायस्वैनमिति। स्वधितिं तिर्यञ्चं निदधाति
५ स्वधिते मैनꣳ हिꣳसीरिति। छिनत्ति बर्हिर्वि त्वचं कृणत्त्यथैतस्यैव बर्हिषो ऽणिमत्सचते। स्थविमदुभयतो लोहितेनाक्त्वेमां दिशं निरस्यति रक्षसां भागो ऽसीदमहꣳ रक्षो ऽधमं तमो नयामि यो ऽस्माद्वेष्टि यं च वयं द्विष्म इदमेनमधमं तमो नयामीत्यथाप उपस्पृश्य वरीय आच्छायेषे त्वेति वपामुत्खि-
१० दति। तया वपाश्रपणी प्रोर्णोति घृतेन द्यावापृथिवी प्रोर्णुवाथामित्यविशाखयोपक्षयाधस्तात्परिवासयत्यच्छिन्नो रायः सुवीर इत्यथैनां प्रदक्षिणमावृत्याग्निरभ्युक्ष्य[2] शामित्रे प्रतितपत्यथोल्मुकप्रथमाः प्रतिपद्यन्ते ॥ ६ ॥

अन्वगध्वर्युर्वपयाच वपाश्रपणी पुनरन्वारभते यजमान।
१५ ऐत्युर्वन्तरिक्षमन्विहीत्येत्याहवनीयस्यान्तमेष्वङ्गारेषु वपायै प्रतितप्यमानायै बर्हिषो ऽग्रमुपास्यति वायो वीहि स्तोकानामित्यथैनामन्तरेण यूपं चाहवनीयं चोपातिहृत्य तां दक्षिणत उदङ्मुखः प्रतिप्रस्थाता श्रपयत्यथैनाꣳ स्रुवाहुत्याभिजुहोति त्वामु ते दधिरे हव्यवाहमित्यथाह स्तोकेभ्यो ऽनुब्रूहीति। परिहितासु स्तोकीयासु शृतायां वपायां जुहूपभृतावादाया-

---

[1] °स्यति Bo F.

[2] Thus all, except Be which has °माहत्या°; are we to correct प्रदक्षिणमावर्त्य ?

त्याक्रम्याश्राव्याह स्वाहाकृतीभ्यः प्रेष्येति' वषट्कृते जुहोत्य'थोदङ्ङत्याक्रम्य सꣳस्रावेण पृषदाज्यमभिघार्य वपामभिघारयत्य'थोपस्तीर्य[1] द्विः स्रुवेण वपाꣳ समवलुम्पन्नाहेन्द्राग्निभ्यां छागस्य वपाया मेदसो ऽवदीयमानस्यानुब्रूहीति' द्विरभिघारयत्य'त्याक्रम्याश्राव्याहेन्द्राग्निभ्यां छागस्य वपां मेदः प्रस्थितं प्रेष्येत्य'थ पुरस्तात्स्वाहाकृतिꣳ स्रुवाहुतिं जुहोति स्वाहा देवेभ्य इति' वषट्कृते वपां जुहोति जातवेदो वपया गच्छ देवान्त्वꣳ हि होता प्रथमो बभूथ। घृतेन त्वं तनुवो वर्धयस्व स्वाहाकृतꣳ हविरदन्तु देवाः स्वाहेत्य'थोपरिष्टात्स्वाहाकृतिꣳ स्रुवाहुतिं जुहोति देवेभ्यः स्वाहेत्य'त्र वपाश्रपणी अनुप्रहरति प्राचीं विशाखां प्रतीचीमविशाखाꣳ स्वाहोर्ध्वनभसं मारुतं गच्छतमित्य'थैने सꣳस्रावेणाभिजुहोत्य'थोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा समुत्क्रम्य चात्वाले मार्जयन्ते' ह्वयन्ति पत्नीꣳ ह्वयन्ति होतारꣳ ह्वयन्ति ब्रह्माणꣳ ह्वयन्ति प्रतिप्रस्थातारꣳ ह्वयन्ति प्रशास्तारꣳ ह्वयन्त्याग्नीध्रमेहि यजमानेतीदमापः[2] प्रवहतावद्यं च मलं च यत्। यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम्॥ निर्मा मुञ्चामि शपथान्निर्मा वरुणादुत। निर्मा यमस्य पड्बीशात्सर्वस्माद्देवकिल्बिषादथो मनुष्यकिल्बिषादित्य'थाञ्जलिनाप उपहन्ति सुमित्रा न आप ओषधयः सन्त्विति' तां दिशं निरुक्षति यस्यामस्य दिशि

---

[1] After अभिघारयति Be H F ins. अथाग्नये सोमायेत्याज्यभागाभ्यां चरति।

[2] The words एहि यजमानेति only in B.

द्वेष्यो भवति दुर्मित्रास्तस्मै भूयासुर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्य यथायतनमुपविशन्ति । ॥ ७ ॥ **द्वितीयः** ॥

अथ संप्रेषमाहाग्नीत्पशुपुरोडाशं निर्वप प्रतिप्रस्थातः पशुं विशाधीति । निर्वपत्येष आग्नीध्र ऐन्द्राग्नमेकादशकपालमथ प्रतिप्रस्थाता पशुं विशास्ति शमितर्हृदयं जिह्वां वक्षस्तानि साधँ कुरुतात्तनिम मतस्नौ[1] तानि साधꣳ सव्यं दोरेकचरं कुरुतान्नाना पार्श्वे अवधत्ताद्दक्षिणाꣳ श्रोणिमध्युद्धिं कुरुताद्दक्षिणं दोः सव्याꣳ श्रोणिमणिमद्गुदस्य तानि त्र्यङ्गानि कुरुताद्वनिष्ठुं च जाघनीं चावधत्ताद्वङ्क्ष यूः कुरुतात्त्रिः पशुं प्रच्यावयतात्त्रिः प्रच्युतस्य पशोर्हृदयमुत्तमं कुरुतादिति । शृते पशौ पशुपुरोडाशं याचति । तमुपस्तीर्णाभिघारितमुद्वास्यान्तर्वेद्यासादयत्यथ जुहूपभृतोरुपस्तृणान आहेन्द्राग्निभ्यां पुरोडाशस्यावदीयमानस्यानुब्रूहीति । पूर्वार्धादवदायापरार्धादवद्यत्यभिघारयति । प्रत्यनक्त्यथोपभृति स्विष्टकृते सकृदुत्तरार्धादवद्यति । द्विरभिघारयति । न प्रत्यनक्त्यत्याक्रम्याश्राव्याहेन्द्राग्निभ्यां पुरोडाशं प्रस्थितं प्रेष्येति । वषट्कृते जुहोत्यथ समावपमान आहाग्नये ऽनुब्रूहीत्याश्राव्याहाग्नये प्रेष्येति । वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोत्यथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा प्राशित्रमवदायेडामवद्यत्युपहूतायामिडायामग्नीध आदधाति षडवत्तं । प्राश्नन्ति । मार्ज-

---

[1] Thus Be HF, the Prayoga cited by Schwab, das altind. Thieropfer, page 131, S'rautapadārtha page 175 and Mantramālā; **मतस्न** B; **मतस्नु** T.

यन्ते ऽथ संप्रैषमाहाग्नीदुत्तरबर्हिरुपसादय प्रतिप्रस्थातः पशौ संवदस्वेत्यथैष आग्नीध्रः प्लक्षशाखायामिडसूनमुपगूहति तदुत्तरबर्हिर्भवत्यथ प्रतिप्रस्थाता पृषदाज्यं विहृत्य जुह्वाꣳ समानीयान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य पृच्छति शृतꣳ हवीः[1] शमितरिति शमितैष उत्तरतो हृदयशूलं धारयꣳस्तिष्ठति स शृतमिति प्रत्याह तं तथैव द्वितीयमुत्क्रम्य पृच्छति तं तथैवेतरः प्रत्याह तं तथैव तृतीयमुत्क्रम्य पृच्छति तं तथैवेतरः प्रत्याहाथ शमितुर्हृदयशूलमादाय तेन हृदयमुपहत्य तꣳ शमित्रे संप्रदाय पृषदाज्येन हृदयमभिघारयति सं ते मनसा मनः सं प्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवत्स्वाहेति विधूः कृत्वा हरतेत्युक्त्वैतेनैव यथेतमेत्य चतसृषूपस्तृणीते जुह्वुपभृतोरिडाधाने यस्मिꣳश्च वसाहोमं ग्रहीष्यन्भवत्याहरन्ति तं पशुमन्तरेण चात्वालोत्करावन्तरेण यूपं चाहवनीयं चोपातिहृत्य तं[2] दक्षिणतः पश्चाद्धोत्रासादयत्येतेनैव यूराहरन्त्येतेनैवेडसूनमथ प्लक्षशाखायाꣳ हृदयं निधाय स्वधितिना तस्याग्रे ऽवद्यन्नाह ॥ ८ ॥

मनोतायै हविषो ऽवदीयमानस्यानुब्रूहीति हृदयस्यैवाग्रे व्यवद्यत्यथ जिह्वाया अथ वक्षसो ऽथ तनिम्नो ऽथ वृक्कयोरथ सव्यस्य दोष्णो ऽथ दक्षिणस्य पार्श्वस्याथ सव्यस्याथ दक्षिणायै श्रोणेरध्युद्धी त्रैधं गुदं कृत्वाणिमत्स्विष्टकृते निदधाति

---

[1] With pluti sign only Be.

[2] H om.; Be sec. m. del.

स्थविमदुपयड्भ्यो मध्यं[1] द्वैधं कृत्वा जुह्वामवदधात्य'थ वृक्कमेदो यूषन्नवधाय तेन जुहूं प्रोर्णोति ' यूष्णोपसिञ्चत्य'भिघारयत्य'थोपभृति स्विष्टकृते सर्वेषां त्र्यङ्गाणाᳫं सकृत्सकृत्समवद्यति ' सकृद्दक्षिणस्य दोष्णः पिशितं प्रच्छिद्यावदधाति सकृत्सक्थ्यै श्रोणेरणिमद्गुदस्या'थ वृक्कमेदो यूषन्नवधाय तेनोपभृतं प्रोर्णोति ' यूष्णोपसिञ्चति[2] ' द्विरभिघारयत्य'थ हृदयं जिह्वां वक्षस्तनिम मतस्नौ[3] वनिष्ठुमितीडापात्र्याᳫं[4] समवधाय यूष्णोपसिञ्चत्य'भिघारयत्य'थ[5] कᳫंसे वा चमसे वा वसाहोमं गृह्णाति ' यूष्णोपसिञ्चत्य'भिघारयत्य'थ पशोरवदानानि संमृशत्यैन्द्रः प्राणो अङ्गेअङ्गे निदेध्यदैन्द्रो ऽपानो अङ्गेअङ्गे विबोभुवद्देव त्वष्टर्भूरि ते सᳫंसमेतु विषुरूपा यत्सलक्ष्माणो भवथ । देवत्रा यन्तमवसे सखायो ऽनु त्वा माता पितरो मदन्त्वित्य'थ दक्षिणेन पार्श्वेन वसाहोमं प्रयौति कुम्बतः श्रीरस्यग्निस्त्वा श्रीणात्वापः समरिणन्वातस्य त्वा ध्रज्यै पूष्णो रᳫंह्या अपामोषधीनाᳫं रोहिष्या इति ' संमृष्टस्य पशोः प्रतीचीं जाघनीᳫं हरन्ति ' प्रतिपरिहरन्ति पशुम'थ जुहूपभृतावाददान आहैन्द्राग्निभ्यां छागस्य हविषो ऽनुब्रूहीत्य'त्याक्रम्याश्राव्याहैन्द्राग्निभ्यां छागस्य हविः प्रस्थितं प्रेष्येति ' प्रतिप्रस्थातैष उत्तरतो

---

[1] Thus Be H T Keś. ; मध्यमं BF.

[2] अथ ins. Be FH.

[3] Thus Be H F Keś. (sec. m.) ; मतस्नु BT.

[4] BH Be ; इति पात्र्याᳫं ; F इडिपात्र्यांᳫ ; T totally corrupt.

[5] अथ after °सिञ्चति ins. Be F.

वसाहोमं धारयꣳस्तिष्ठति[1] । सो ऽर्धर्चे याज्यायै वसाहोमं जुहोति घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा त्वान्तरिक्षाय स्वाहेति । वषट्कृते हविर्जुहोत्येतस्य होममनु प्रतिप्रस्थाता वसाहोमोद्रेकेण दिशो जुहोति दिशः प्रदिश आदिशो विदिश उद्दिशः स्वाहा दिग्भ्यो नमो दिग्भ्यः स्वाहेत्यथ प्रदक्षिणमावृत्य पृषदाज्यात् स्रुवेणोपघ्नन्नाह वनस्पतये ऽनुब्रूहीत्याश्राव्याह वनस्पतये प्रेष्येति । वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोत्यथ समावपमान आहाग्नये स्विष्टकृते ऽनुब्रूहीत्याश्राव्याहाग्नये स्विष्टकृते प्रेष्येति । वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोत्यथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा होत्र इडामुपोद्यच्छन्ति मेदश्च । उपहूतायामिडायामग्नीध आदधाति षडवत्तमर्धवनिष्ठुमथार्धवनिष्ठुं । मेदस्वत्प्राश्नन्ति । मार्जयन्ते । ऽथाह ब्रह्मणे वचः परिहरेति । तद्ब्रह्मा प्रतिगृह्णाति ॥ ९ ॥

वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तो अशीमहीत्यथ संप्रैषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्याहरन्त्येताञ्छामित्रादौपयजानङ्गाराꣳस्तानग्रेण होतारं निवपत्युपसीदत्युपयष्टा गुदतृतीयेनाथाध्वर्युः पृषदाज्यं विहत्य[2] जुह्वाꣳ

---

[1] Thus B Be; धारयं तिष्ठति H; the other MSS. corrupt.

[2] Thus H T; विहृत्य B Be; विहरत्य F.

समानीयात्याक्रम्याश्राव्याह देवेभ्यः प्रेष्येति । वषट्कृते जुहोति प्रेष्य प्रेष्येत्येवमेवोपयष्टोपयजति गुदस्य प्रच्छेदꣳ समुद्रं गच्छ स्वाहेत्येतैरेकादशभिर।ग्निं वैश्वानरं गच्छ स्वाहेति सर्वमन्ततोऽनुप्रहरत्य।थ बर्हिषि हस्तौ निमार्ष्ट्यद्भ्यस्त्वौषधीभ्यो मनो मे हार्दि यच्छेत्य।थास्य धूममन्वीक्षते तनूं त्वचं पुत्रं नप्तारमशीयेत्य।ेकादशानूयाजानिष्ट्वोदङ्ङत्याक्रम्य जुह्वाꣳ स्रुवमवधाय पुरस्तात्प्रत्यङ् तिष्ठञ्जुहोति दिवं ते धूमो गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्मना पृणस्व स्वाहेत्य।थ यथायतनꣳ स्रुचौ सादयित्वा वाजवतीभ्याꣳ स्रुचौ व्यूहति । शंयुना प्रस्तरपरिधि संप्रकीर्य संप्रस्राव्य स्रुचौ[1] विमुच्य जाघन्या पत्नीः संयाजयन्त्या।ज्यस्यैव सोमं च त्वष्टारं च यजत्यु।त्तानायै जाघन्यै देवानां पत्नीर्यजति । नीच्या[2] अग्निं[2] गृहपतिमु।त्तानायै जाघन्यै होत्र इडामवद्यति । नीच्या[2] अग्नीधे[2] षडवत्तं । प्राश्नीतो । मार्जयेते । अथ स्रुचि चतुर्गृहीतं गृहीत्वापसलैः पर्यावृत्यान्वाहार्यपचने प्रायश्चित्तं कृत्वा[3] न फलीकरणहोमेन चरत्य।थ प्राङेत्य ध्रुवामाप्याय्य त्रीणि समिष्टयजूꣳषि[4] जुहोति यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहेति । स्रुवेणैव द्वितीयमेष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीरः स्वाहेति । स्रुचा

---

[1] स्रुचो Be H.

[2] Thus only Be ; the other MSS. have नीचाग्निं and नीचाग्नीधे ।

[3] जुहोति B Be.

[4] T ins. पञ्चसन्धिकानि।

तृतीयं देवा गातुविदो गातुं वित्त्वा गातुमित । मनसस्पत इमं नो देव देवेषु यज्ञꣳ स्वाहा वाचि स्वाहा वाते धाः स्वाहेत्युदूहति स्रुचमथ याचति स्फ्यमुदपात्रꣳ हृदयशूलमित्येतत्समादायाहेहि यजमानेत्यन्वग्यजमानो ऽनूची पत्न्यन्तरेण चात्वालोत्करावुदङुपनिष्क्रम्याग्रेण यूपꣳ स्फ्येनोद्धृत्यावोक्ष्य शुष्कस्य चार्द्रस्य च सन्धौ हृदयशूलमुद्वासयति ॥ १० ॥

शुगसि तमभिशोच यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाद्भिर्मार्जयन्ते धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च यदापो अघ्निया वरुणेति शपामहे ततो वरुण नो मुञ्चेत्यथाप्रतीक्षमायन्ति वरुणस्यान्तर्हित्यै । अपथे समिधः कुर्वत एधो ऽस्येधिषीमहीत्येत्याहवनीये ऽभ्यादधाति समिदसि तेजो ऽसि तेजो मयि धेहीत्यथाहवनीयमुपतिष्ठन्ते ऽपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसेत्यथौपयजिके[1] ऽग्नौ बर्हिरुपोषति यत्कुसीदमप्रतीत्तं मयि येन यमस्य बलिना चरामि । इहैव सन्निरवदये तदेतत्तदग्ने अनृणो भवामीत्यथाञ्जलिनोपस्तीर्णाभिघारितान्सक्तून्प्रदाव्ये जुहोति विश्वलोप विश्वदावस्य त्वासञ्जुहोमि स्वाहेति । हस्तौ प्रध्वꣳसयते ऽग्धादेको ऽहुतादेकः समनसादेकस्ते नः कृण्वन्तु भेषजꣳ सदः सहो वरेण्यमिति । द्वितीयं जुहोति यान्यपामित्यान्यप्रतीत्तान्यस्मि यमस्य बलिना चरामि । इहैव सन्तः प्रति तद्यातयामो जीवा जीवेभ्यो निहराम एनत्स्वाहेति ।

---

[1] Corrected acc. to Bh.; °योपयजिके MSS.

हस्तौ प्रध्वꣳसयते ऽघादेको ऽहुतादेकः समनसादेकस्ते नः कृण्वन्तु भेषजꣳ सदः सहो वरेण्यमिति। तृतीयं जुहोत्यनृणा अस्मिन्ननृणाः परस्मिꣳस्तृतीये लोके अनृणाः स्याम। ये देवयाना उत पितृयाणाः सर्वान्पथो अनृणा आक्षीयेम स्वाहेति। हस्तौ प्रध्वꣳसयते ऽघादेको ऽहुतादेकः समनसादेकस्ते नः कृण्वन्तु भेषजꣳ सदः सहो वरेण्यमित्यथ देवता उपतिष्ठते। ऽयं नो नभसा पुर इत्यग्निꣳ। स त्वं नो नभसस्पत इति वायुं। देव सꣳस्फानेत्यादित्यमथ यूपमुपतिष्ठत आशासानः सुवीर्यꣳ रायस्पोषꣳ स्वश्वियम्। बृहस्पतिना राया स्वगाकृतो मह्यं यजमानाय तिष्ठेत्यथ पूर्वाग्निꣳ शकले समारोपयत्ययं ते योनिर्ऋत्विय इति। तं मध्यमे ऽग्नावपिसृजत्याजुह्वान उद्बुध्यस्वाग्न इति द्वाभ्यामथ[1]मध्यममग्निमुपसमाधाय मध्यमे ऽग्नौ पूर्णाहुतिं जुहोति सप्त ते अग्ने समिधः सप्त जिह्वा इति। पूर्णाहुतौ वरं ददाति। धेनुवरं[2] वानडुद्वरं[3] वा दद्यादिति ह स्माह बौधायनः। संतिष्ठते पशुबन्धः संतिष्ठते पशुबन्धः ॥ ११ ॥ तृतीयः ॥

॥ इति चतुर्थः प्रश्नः ॥

---

[1] अथ om B.

[2] Thus BF; धेनू॰ H Be; धेनूं T.

[3] Thus HTF; वानडुद्वंवरं B; वानडुद्वद्वरं Be; comp. VII. 4 s. f.

वैश्वदेवहविर्भिर्यक्ष्यमाणो भवति फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यां । नक्षत्रप्रयोग इत्येक आहुरुदगयन आपूर्यमाणपक्षस्य पुण्याह्ने प्रयुञ्जीतेति । स उपकल्पयते त्रेणीꣳ शलली लोहितायसस्य च क्षुरं चतुष्टयानि पुरोडाशकपालानि चतस्रश्चरुस्थालीस्तावन्ति मेक्षणानि द्वयं पयः पृषदाज्याय च[1] दधि हविरातञ्चनाय च त्रेधा बर्हिः संनद्धं तदेकधा पुनः संनद्धं[2] प्रसूमयं प्रस्तरमित्यथोपवसथीये [3]ऽहन्द्विहविषमारम्भणीयामिष्टिं निर्वपति वैश्वानरं द्वादशकपालं पार्जन्यं चरुꣳ । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथास्यैतदहर्विश्वेभ्यो देवेभ्यो वत्सा अपाकृता भवन्ति । वैश्वदेवं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातर्हुते ऽग्निहोत्रे पुरापां प्रणयनाद्गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा पञ्चहोतारं मनसानुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यथ पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुं मारुतꣳ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमिति । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादध्युप्य दक्षिणार्धे गार्हपत्यस्याष्टौ कपालान्युपदधात्यथोत्तरतस्तिरः पवित्रमप आनीय सौम्याय चरवे ऽधिश्रयत्यथोत्तरतः सावित्राय द्वादशकपाला-

---

[1] T F om.

[2] J recommences with द्धं प्रसूमयं ।

[3] हनि Be J F H.

न्युपदधात्यथोत्तरतस्तिरः पवित्रमप आनीय सारस्वतपौष्णाभ्यामधिश्रयत्यथोत्तरतो मारुताय सप्त कपालान्युपदधात्यथोत्तरतस्तिरः पवित्रं पय[1] आनीयामिक्षाया अधिश्रयत्यथोत्तरतो द्यावापृथिव्यमेककपालमुपदधात्यभीन्धते कपालान्युपेन्धते चरुस्थालीः । कृतानि पृष्टानि समुप्य संयुत्याथाधिवृणक्त्याग्नेयमष्टाकपालं । तिरः पवित्रꣳ सौम्ये[2] चरव्यानावपत्यथाधिवृणक्ति सावित्रं द्वादशकपालं । तिरः पवित्रꣳ सारस्वतपौष्णयोश्चरव्यानावपत्यथाधिवृणक्ति मारुतꣳ सप्तकपालं । तिरः पवित्रं तप्ते पयसि दध्यानयति । सामिक्षा भवति । तां य एव कश्च[3] कुशलः परीन्धेन श्रपयित्वा विवाजिनां कृत्वाप्रतापे निदधात्यथाधिवृणक्ति द्यावापृथिव्यमेककपालमिति । त्वचं पुरोडाशानां ग्राहयित्वा श्रपयित्वाभिवास्य प्राङेत्याग्येभ्यो निनीय स्तम्बयजुर्हरति । ॥ १ ॥

इदमेव प्रसिद्धं पौरोडाशिकं । त्रियजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं जपत्युद्धन्त्युद्धतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथोत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च[4] दध्ना चोदेहीत्याहृतासु प्रोक्षणीषूदस्य स्फ्यं

---

[1] Thus Be Keś. पवित्रमप the other MSS.

[2] Thus J F Keś., सौम्यस्य B Be H, सौम्येयश्चरव्यान् T.

[3] कश्चन Be, कश्चित् F.

[4] B H om.

मार्जयित्वेध्माबर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य स्रुवं च स्रुचश्च संमार्ष्टि तूष्णीं पृषदाज्यग्रहणीं । पत्नीꣳ संनह्याज्येन च दध्ना चोदेत्याज्यं च प्रोक्षणीश्चोत्पूय प्रसिद्धं पृषदाज्यवन्त्याज्यानि गृहीत्वा प्रोक्षणीभिरुपोत्तिष्ठती।ध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तात्प्रसूमयं प्रस्तरं गृह्णाति । त्रिविधं बर्हि स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य कार्ष्मर्यमयान्परिधीन्परिदधात्यू।र्ध्वे समिधावादधाति । विधृती तिरश्ची सादयति । विधृत्योः प्रसूमयं प्रस्तरं । प्रस्तरे जुहूं । बर्हिषीतरा । एता असदन्निति समभिमृश्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्यानुपूर्वꣳ[1] हवीꣳष्युद्वासयत्युपस्तीर्णाभिघारितान्पुरोडाशानभिघार्य चरून्।प्रसिद्धमामाहृता।दय कꣳसे वा चमसे वामिक्षां व्युद्धृत्य वाजिनमानीयाथाभिघारयत्य।थैककपालमुद्वास्य बक्कानीयाविःपृष्ठं करोत्य।थैतानि संपरिगृह्यान्तर्वेद्यासादयति भूर्भुवः सुवरित्येताभिर्व्याहृतीभि।रुत्करे वा विशये वा वाजिनम।थ निर्मन्थ्यस्यावृता निर्मन्थ्येन चरति[2] । प्रसृत्याभिक्रत्य । ॥ २ ॥

अथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूहीत्य।भ्यादधातीध्मं । परि समिधꣳ शिनष्टि । वेदेनोपवाजयत्य।नूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति । संमृष्टे स्रुग्भ्यामुत्तरम।थासꣳस्पर्शयन्स्रुचावुदङ्ङत्याक्रम्य जुह्वा ध्रुवाꣳ समज्य

---

[1] °पूर्वं Be H F.

[2] प्रचरति Be B; in the following khaṇḍa B has consequently प्रचं ।

सादयित्वा स्रुचौ प्रवरं प्रवृणीते । प्रसिद्धꣳ होतारं वृणीते । सीदति होता । प्रसवमाकाङ्क्षति । प्रसूतः स्रुचावादायात्याक्रम्याश्राव्याह समिधो यजेति । वषट्कृते जुहोति यज यजेति चतुर्थाष्टमयोः समानयमानो । ऽष्टमे सर्वꣳ समानयते । नव प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य सꣳस्रावेणानुपूर्वꣳ[1] हवीꣳष्यभिघारयत्य।थाग्नये सोमायेत्याज्यभागाभ्यां चरत्य।थानुपूर्वꣳ[1] हविर्भिश्चरति । प्रसिद्धमा मारुता।द्विश्वेभ्यो देवेभ्यो ऽनुब्रूहि विश्वान्देवान्यजेत्यामिक्षया चरत्युपाꣳश्वेककपालेन चरति द्यावापृथिवीभ्यामनुब्रूहि द्यावापृथिवी यजेत्य।थ स्विष्टकृता चरत्य।थैतानि मेक्षणान्याहवनीये ऽनुप्रहरत्य।थैनानि सꣳस्रावेणाभिजुहोत्य।थोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा प्राशित्रमवदायेडामवद्यति । ॥ ३ ॥

उपहूतायामिडायामग्नीध आदधाति षडवत्तं । प्राश्नन्ति । मार्जयन्ते । ऽथाह ब्रह्मणे प्राशित्रं परिहरेति । परि प्राशित्रꣳ हरन्त्य।न्वपो ऽनु वेदेन ब्रह्मभागम।थान्वाहार्यं याचति । तस्मिन्प्रथमजं वत्सं ददात्युद्वासयन्त्येतद्धविरुच्छिष्टमा।सादयन्ति वाजिनम।थ संप्रैषमाह ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्य।थाध्वर्युः पृषदाज्यं विहृत्य[2] जुह्वाꣳ समानीयात्याक्रम्याश्राव्याह देवान्यजेति । वषट्कृते जुहोति यज यजेति नवानूयाजानिष्ट्वोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ साद-

---

[1] Thus Keś.; ०पूर्व्यꣳ the MSS.

[2] Thus T Be H F Keś.; विह्वृत्य B.

यित्वा वाजवतीभ्याꣳ स्रुचौ व्यूहति। शंयुना प्रस्तरपरिधि संप्रकीर्य संप्रस्राव्य स्रुचौ विमुच्याथ कꣳसं वा चमसं वानाज्यलिप्तं याचति। तमन्तर्वेदि निधाय तस्मिन्बर्हिषि विषिञ्चन्वाजिनमानयन्नाह वाजिभ्यो ऽनुब्रूहीत्यत्याक्रम्याश्राव्याह वाजिनो यजेति। वषट्कृते जुहोति वाजिभ्यः स्वाहेत्यनुवषट्कृते कृत्वा हरति भक्षꣳ। स यावन्त ऋत्विजस्तेषूपहवमिष्ट्वा यजमान एव प्रत्यक्षं भक्षयति यन्मे रेतः प्रसिच्यते यन्म आप्यायते यद्वा जायते पुनः। यद्वा मे प्रतितिष्ठति तेन मा वाजिनं कुरु तेन मा रेतस्विनं कुरु तेन मा शिवमाविश तस्य ते वाजिपीतस्य वाजिभिः पीतस्येति वा मधुमत उपहूतस्योपहूतो भक्षयामीति। निर्णिज्य पात्रं प्रयच्छत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य त्रीणि पाशुबन्धिकानि[1] समिष्टयजूꣳषि जुहोति यज्ञ यज्ञं गच्छैष ते यज्ञो यज्ञपते देवा गातुविद इत्यथ पूर्णपात्रविष्णुक्रमैश्चरित्वा विसृजते व्रतमथ पौर्णमासवैमृधाभ्यामिष्ट्वा यजमानायतन उपविश्य त्रेण्या शलल्या लोहितायसस्य च क्षुरेण शीर्षन्वि च वर्तयते परि च वपत ऋतमेव परमेष्ठ्यृतं नात्येति किं चन। ऋते समुद्र आहित ऋते भूमिरियꣳ श्रिता॥ अग्निस्तिग्मेन शोचिषा तप आक्रान्तमुष्णिहा। शिरस्तपस्याहितं वैश्वानरस्य तेजसा॥ ऋतेनास्य निवर्तये

---

[1] Thus H B Be T J; पाशुकानि F.

सत्येन परिवर्तये। तपसास्यानुवर्तये शिवेनास्योपवर्तये शग्मेनास्याभिवर्तये ॥ शीर्ष्णस्तदृतं तत्सत्यं तद्व्रतं तच्छकेयं तेन शकेयं तेन राध्यासमिति पुरस्तादेवाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽथोपरिष्टात्संतिष्ठन्ते वैश्वदेवहवीꣳषि' संवत्सरीणाꣳ स्वस्तिमाशास्त इत्याशास्ते' ॥ ४ ॥ प्रथमः ॥

अथातश्चतुर्षु मासेषु वरुणप्रघासहविर्भिर्यक्ष्यमाणो भवति' स उपकल्पयते वेणीꣳ शललीं लोहितायसस्य च क्षुरं चतुष्टयानि पुरोडाशकपालानि पञ्च चरुस्थालीस्तावन्ति मेक्षणानि द्वयं पयः पृषदाज्याय च[1] दधि हविरातञ्चनाय च[1] शमीपर्णकरीरसक्तूनैषीकꣳ शूर्पं मनागुपतप्तानां यवानामवाञ्जनपिष्टानां प्रतिपूरुषं[2] करम्भपात्राण्येकातिरिक्तानि भवन्ति' तेषामेव मेषीं च मेषं च कुर्वन्ति' शृङ्गवान्मेषो भवत्यशृङ्गा मेषी' तौ शुक्लाभिरूर्णाभिः संप्रक्तौ भवतो' द्वावध्वर्यू' द्वयानि यज्ञपात्राणि' द्वयमिध्माबर्हिर्द्वे वेदी' तयोः पाशुबन्धिकीवोत्तरा दार्शपौर्णमासिकीव दक्षिणा' ते पश्चात्समे पुरस्ताद्विषमे पृथमात्राद्वेदी असंभिन्ने भवतो' ऽथास्यैतदहर्द्वया वत्सा अपाकृता भवन्ति मरुद्भ्यो वरुणायेति' द्वयं पयो दोहयित्वोपवसति सांनाय्यस्य वाहृता तूष्णीं वाथ प्रातर्हुते ऽग्निहोत्रे पृष्ठ्याꣳ स्तीर्त्वापः प्रणीय निर्वपत्याग्नेयमष्टाकपाल-

---

[1] Thus (च ... च) Be H T (दधिच the last); the first च om. JF, the last B.

[2] Thus (with ऊ) BTH, comp. T Br. I. 6. 4. 5; with उ the other MSS.

मिति पञ्च संचराण्यैन्द्राग्नमेकादशकपालं[1] मारुतीमामिक्षां वारुणीमामिक्षां कायमेककपालमिति । हविष्कृता वाचं विसृजते । समानं कर्मा पर्यग्निकरणाद्।थैतानि करम्भपात्राण्यभिपर्यग्निकुर्वन्ति मेषीं च मेषं च शमीपर्णकरीरसक्तूनैषीकꣳ शूर्पमिति । त्वचं पुरोडाशानां ग्राहयित्वा श्रपयित्वाभिवास्य ५
प्राङेत्याप्येभ्यो निनीय स्तम्बयजुषी हरतो । ऽध्वर्युरेवोत्तरस्यां वेद्याꣳ हरति प्रतिप्रस्थाता दक्षिणस्यां । तयोर्हरतोरध्वर्युः पूर्व एति पुनरायतोः प्रतिप्रस्थाता पूर्व एती।दमेव प्रसिद्धं पौरोडाशिकं । त्रिर्यजुषा तूष्णीं चतुर्थं । पूर्वौ परिग्राह्यौ परिगृह्णीतो । ऽध्वर्युरेव करणं जपत्युद्धत । उद्धताभ्यामाग्नीध्रस्त्रि- १०
र्हरति[2] । यदाग्नीध्रस्त्रिर्हरत्यध्वर्युरेव चात्वालस्यावृता चात्वालं परिलिखत्यु।त्तरवेदेरावृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्साद्याग्नेरावृता द्वावग्नी[3] प्रणयतो । ऽध्वर्युरेवोत्तरस्यां वेद्यामग्निं निधायाध्वराहुतिभिरभिजुहोति । प्रतिप्रस्थाता दक्षिणस्यामग्निं निधायाभिजुहोति तूष्णी।मग्निवत्युत्तरौ परिग्राह्यौ परिगृह्य १५
योयुपित्वा तिर्यञ्चौ स्फ्यौ स्तब्ध्वाध्वर्युरेव संप्रैषमाह प्रोक्षणीरासादयतमिध्माबर्हिषी उपसादयतꣳ स्रुवौ च स्रुचश्च संमृष्टं तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्याभ्यां च दध्ना चोदेतमित्या।हृतासु प्रोक्षणीषूदस्य स्फ्यौ मार्जयित्वेध्माबर्हिषी उपसाद्य

---

[1] Thus, with ञ्च Be JHF, Bh., Keś.; संचाराणि B T.

[2] Thus Be J; उद्धत्योद्धताभ्याम° T; उद्धत om. B H; उद्धन्त्युद्धताद° F.

[3] Thus J H; द्वावग्नि Be; T om. ग्नी; B om. द्वाव°।

प्रदक्षिणमावृत्य प्रत्यञ्चावाद्रुत्य स्रुवौ च स्रुचश्च संमृष्टस्रुष्णौ[1] पृषदाज्यग्रहणौ। पत्नीꣳ संनह्याज्याभ्यां च दध्ना चोदेत। आज्ये च प्रोक्षणीश्चोत्पूय प्रसिद्धं पृषदाज्यवन्त्येवाज्यान्यध्वर्युरुत्तरस्यां वेद्यां गृह्णीते। दार्शपौर्णमासिकानि प्रतिप्रस्थाता दक्षिणस्याम्। ॥ ५ ॥

अथ प्रोक्षणीभिरुपोत्तिष्ठत[2]। इध्मौ प्रोक्षतो। वेदी प्रोक्षतो। बर्हिषी प्रोक्षतो। बर्हिषी आसन्ने प्रोक्ष्योपनिनीय पुरस्तात्प्रस्तरौ गृह्णीतः। पञ्चविधमेवाध्वर्युरुत्तरस्यां वेद्यां बर्हिः स्तृणाति। त्रिविधं प्रतिप्रस्थाता दक्षिणस्यामथ प्रस्तरपाणी प्राञ्चावभिसृप्य कार्ष्मर्यमयान्परिधीन्परिधत्त। ऊर्ध्वाः समिध आधत्तो। विधृतीस्तिरश्चीः[3] सादयतो। विधृतीषु प्रस्तरौ। प्रस्तरयोर्जुह्वौ। बर्हिषोरितरा[4]। एता असदन्निति समभिमृश्य प्रदक्षिणमावृत्य प्रत्यञ्चावाद्रवतो [5]दक्षिणत एवाध्वर्युरुत्तरतः प्रतिप्रस्थातानुपूर्वꣳ[6] हवीꣳष्युद्वासयत। आग्नेयप्रभृतीन्येवाध्वर्युरुद्वासयति प्रसिद्धमैन्द्राग्नान्मारुतीं प्रतिप्रस्थाता कꣳसे वा चमसे

---

[1] Thus J only; the other MSS. mostly ०स्रष्टं।

[2] उपोत्तिष्ठात F.

[3] Corrected. विधृतीस्तिरश्चः T; विधृत्यस्तिरश्च्यः B; विधृत्यतिरश्च्यः Be; विधृत्यस्तिरश्चः H; विधृत्यातिरश्च्यः F; विधृत्यस्तिरः J.

[4] Thus B Be F T; इतरे H J.

[5] The following words: दक्षिणत .... प्रतिप्रस्थाता are found only in B, but comp. S'rautapadārtha page 118.

[6] ष्वानुपूर्व्यꣳ H Be; ष्वानुपूर्वैꣳ J; ष्वनुपूर्व्यꣳ F, ०नुपूर्वैꣳ B.

समानयते । परि प्रतिप्रस्थाता सꣳस्रावꣳ शिनष्ट्यनूयाजेभ्यो । नव प्रयाजानिष्ट्वोदङ्ङावत्याक्रम्य सꣳस्रावाभ्यामानुपूर्वꣳ[1] हवीꣳष्यभिघारयत । आग्नेयप्रभृतीत्येवाध्वर्युरभिघारयति प्रसिद्धमैन्द्राग्नान्मारुतीं प्रतिप्रस्थाता । वारुणीमध्वर्युः कायं चैककपालमथाग्नये सोमायेत्याज्यभागाभ्यां चरतो ऽथ प्रतिप्रस्थातोपरमत्यथाध्वर्युरानुपूर्वꣳ[2] हविर्भिश्चरति प्रसिद्धमैन्द्राग्नादथाध्वर्युरुपरमत्यथ प्रतिप्रस्थाता मारुत्या अवद्यन्नाह मरुद्भ्यो ऽनुब्रूहीति । प्रथमेनावदानेन शमीपर्णकरीरसक्तूनामिचाया[3] इत्यवद्यति । द्वितीयेनावदानेन शमीपर्णकरीरसक्तूनामिचां मेषीमित्यवदधात्यभिघारयति । प्रत्यनक्त्यत्याक्रम्याश्राव्याह मरुतो यजेति । वषट्कृते जुहोत्यथ प्रतिप्रस्थातोपरमत्यथाध्वर्युर्वारुण्या अवद्यन्नाह वरुणायानुब्रूहीति । प्रथमेनावदानेन शमीपर्णकरीरसक्तूनामिचाया[3] इत्यवद्यति । द्वितीयेनावदानेन शमीपर्णकरीरसक्तूनामिचां मेषमित्यवदधात्यभिघारयति । प्रत्यनक्त्यत्याक्रम्याश्राव्याह वरुणं यजेति । वषट्कृते जुहोत्युपाꣳश्वेककपालेन चरति कायानुब्रूहि[4] कं यजेत्यथ[5] स्विष्टकृता चरत । आग्नेयप्रभृतीनामेवाध्वर्युरवद्यति प्रसिद्धमैन्द्राग्नान्मारुत्यै प्रतिप्रस्थाता ।

---

[1] ॰पूर्व्येꣳ BJTF.

[2] ॰पूर्व्यꣳ all.

[3] Bo F ins. अर्धम् । Are we to correct ॰सक्तूनामामिचाया ?

[4] Thus BH. The other MSS. have इति after ॰ब्रूहि but see page 131, 9.

[5] After कं यजेति Bo F have वषट्कृते जुहोति।

वारुण्या अध्वर्युराशयादेककपालस्य च । द्विरभिघारयतो । न प्रत्यङ्क्तो[१] । ऽत्याक्रम्याश्राव्याहाग्निꣳ स्विष्टकृतं यजेति । वषट्कृत उत्तरार्धपूर्वार्धयोरतिहाय पूर्वा आहुतीर्जुहुतो । ऽथैतानि मेक्षणान्याहवनीययोरनुप्रहरतो[२] । ऽथैनानि सꣳस्रावाभ्यामभिजुहुतो । ऽथोदङ्ङावत्याक्रम्य यथायतनꣳ स्रुचः[३] सादयित्वा प्राशित्रमवदायेडामवद्यत । आग्नेयप्रभृतीनामेवाध्वर्युरवद्यति प्रसिद्धमैन्द्राग्नान्मारुत्यै प्रतिप्रस्थाता । वारुण्या अध्वर्युराशयादेककपालस्य[४] चाभिघारयत्यथ प्रतिप्रस्थातोत्तरां वेदिमुपसर्पति[५] । ॥ ८ ॥

उपहूतायामिडायामग्नीध आदधाति षडवत्तं । प्राश्नन्ति । मार्जयन्ते । ऽथाह ब्रह्मणे प्राशित्रं परिहरेति । परि प्राशित्रꣳ हरन्त्यन्वपो ऽनु वेदेन ब्रह्मभागमथान्वाहार्यं याचति । तस्मिन्यथाश्रद्धं ददात्युद्वासयन्त्येतद्धविरुच्छिष्टमासादयन्ति वाजिने । अध्वर्युरेव संप्रैषमाह ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्यथाध्वर्युः पृषदाज्यं विहृत्य जुह्वाꣳ समा-

---

[१] Thus B only ; प्रत्यनक्तौ Bo FH ; प्रत्यनक्ते T. (grantha) ; J प्रत्यनक्ति If the dual प्रत्यनक्तः should be the correct reading, we would have a grammatical form of the same kind as भिनत्तः (supra page 136, 12) instead of भिꣳत्त. ।

[२] Thus T and Bh. ; the other MSS. आहवनीये (Be आहवनीयो) ।

[३] Thus F ; the other MSS. स्रुचौ ।

[४] Thus HJ ; ०कपालस्याचाभि० the other MSS. except Be, which has ०कपालस्याशयाचाभि० ।

[५] Thus BTHF ; उपसꣳसर्पति Be J. and Bh.

नीथात्याक्रम्याश्राव्याह देवान्यजेति । वषट्कृते जुह्वतो यज यजेति नवानूयाजानिष्ट्वोदङ्ङावृत्याक्रम्य यथायतनꣳ स्रुचः[1] सादयित्वा वाजवतीभ्याꣳ स्रुचो[1] व्यूहतः । शंयुना प्रस्तरपरिधि संप्रकीर्य संप्रस्राव्य स्रुचो[2] विमुच्य । तथैव कꣳसौ वा चमसौ वानाज्यलिप्तौ याचतः । समानौ वाजिनयोस्त्वर्याध्वर्युरेव प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य त्रीणि पाशुबन्धिकानि समिष्टयजूꣳषि जुहोत्येकं प्रतिप्रस्थाता दार्शपौर्णमासिकं दक्षिणे । ऽथ पूर्णपात्रविष्णुक्रमैश्चरित्वा न विसृजते व्रतमथ याचत्याज्यस्थालीꣳ सस्रुवाꣳ स्रुचं बर्हिः प्रतिवसनीये वाससी वारुण्यै निष्कासं तुषानित्येतत्समादायाहैहि यजमानेत्यन्वग्यजमानो ऽनूची पत्न्यन्तरेण[3] चात्वालोत्करावुदङ्ङुपनिष्क्रम्य यत्रापस्तद्यन्ति । प्रसिद्धो ऽवभृथः । साम चैव नाह देवीराप एष वो गर्भ इति चाथाप्रतीक्षमायन्ति वरुणस्यान्तर्हित्यै । प्रपथे समिधः कुर्वत एधो ऽस्येधिषीमहीत्येत्याहवनीये[4] ऽभ्यादधाति समिदसि तेजो ऽसि तेजो मयि धेहीत्यथाहवनीयमुपतिष्ठन्ते ऽपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसेत्यत्र

---

[1] Thus Be H; the dual both times in TFJ; B. has the first time the plural, the second time the dual.

[2] Thus B Be HJ; स्रुचौ TF.

[3] Thus passage याहैहि ... नूची पत्नी found thus only in B Be TH; J. has only याहैहि यजमानेति; F omits the words altogether.

[4] Thus HF; ॰त्येताहवनीये BJ.

विसृजते ऽतमथ पौर्णमासवैमृधाभ्यामिष्ट्वा यजमानायतन उपविश्य वेण्या शलल्या लोहितायसस्य च क्षुरेण शीर्षण्णि च वर्तयते परि च वपते यद्वर्मः पर्यवर्तयदन्तान्पृथिव्या दिवः । अग्निरीशान ओजसा वरुणो धीतिभिः सह । इन्द्रो मरुद्भिः सखिभिः सह ॥ अग्निस्तिग्मेन शोचिषा तप आक्रान्तमुष्णिहा । शिरस्तपस्याहितं वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये सत्येन परिवर्तये । तपसास्यानुवर्तये शिवेनास्योपवर्तये शग्मेनास्याभिवर्तये ॥ शीर्ष्णस्तदृतं तत्सत्यं तद्व्रतं तच्छकेयं तेन शकेयं तेन राध्यासमिति पुरस्तादेवाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽथोपरिष्टात्संतिष्ठन्ते वरुणप्रघासहवीꣳषि' परिवत्सरीणाꣳ स्वस्तिमाशास्त इत्याशास्ते' ॥ ९ ॥ द्वितीयः ॥

अथातश्चतुर्षु मासेषु साकमेधहविर्भिर्यक्ष्यमाणो भवति' स उपकल्पयते वेणीꣳ शललीं लोहितायसस्य च क्षुरं चतुष्टयानि पुरोडाशकपालानि चतस्रश्चरुस्थालीस्तावन्ति मेक्षणानि पृषदाज्याय दध्यथ पौर्णमास्या उपवसथे ऽग्नये ऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकꣳ सूर्येणोद्यता' सा प्रसिद्धेष्टिः संतिष्ठते' ऽथ मध्यंदिने मरुद्भ्यः सांतपनेभ्यश्चरुं निर्वपति' सा प्रसिद्धेष्टिः संतिष्ठते' ऽथास्यैतदहर्मरुद्भ्यो गृहमेधिभ्यो वत्सा अपाकृता भवन्त्यथ सायꣳ हुते ऽग्निहोत्रे सर्वासां दुग्धे गार्हपत्ये गृहमेधीयं चरुꣳ श्रपयित्वाभिघार्योदञ्चमुद्वासयत्यथैतां पात्रीं निर्णिज्योपस्तीर्य तस्यामेनमसंभिन्नन्निवोद्धरति' सर्पिरासेचनं कृत्वा प्रभूतमाज्यमानीयान्तर्वेद्यासादयत्यथाग्नये सोमायेत्याज्यभागाभ्यां

चरत्यथोपस्तीर्य पूर्वार्धाच्चरोरवद्यन्नाह मरुद्भ्यो गृहमेधिभ्यो ऽनुब्रूहीतिˈ पूर्वार्धादवदायापरार्धादवद्यत्यभिघारयतिˈ प्रत्यनक्त्यत्याक्रम्याश्राव्याह मरुतो गृहमेधिनो यजेतिˈ वषट्कृते जुहोत्यथ स्विष्टकृता चरतीडान्तो गृहमेधीयः संतिष्ठतेˈ पूर्णदर्व्याय[1] चामकाषं परिशिनष्टिˈ प्रतिवेशꣳ स्त्रीकुमारेभ्यः ५
पचन्त्याशिता भवन्त्याञ्जतेˈ ऽभ्यञ्जतेˈ ऽनु वत्सान्वासयन्तिˈ सवात्योरेवैताꣳ रात्रिं वत्सं बध्नन्त्यथाध्वर्युरपररात्र आद्रुत्य नित्यवत्सायै पयसाग्निहोत्रं जुहोत्यथैतां दर्वीं निर्णिज्योपस्तीर्य तस्यामेतꣳ सर्वश एव चामकाषमवदधातिˈ द्विरभिघारयत्यथ पुरोऽनुवाक्यामन्वाह पूर्णा दर्वि परापत सुपूर्णा पुनरापत । १०
वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो इतिˈ यजति देहि मे ददामि ते नि मे धेहि नि ते दधे । निहारमिन्नि मे हरा निहारं निहरामि ते स्वाहेत्यृषभ[2] एहीत्यृषभस्य रवथे[3] जुहुयाद्ब्रह्मणो हिंकार[4] इत्येतदपरंˈ गार्हपत्ये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यथ पृष्ठ्याꣳ स्तीर्त्वापः प्रणीय मरुद्भ्यः क्रीडिभ्यः १५
पुरोडाशꣳ सप्तकपालं निर्वपति साकꣳ सूर्येणोद्यताˈ सा प्रसिद्धेष्टिः संतिष्ठतेˈ ऽथ तदानीमेव पृष्ठ्याꣳ स्तीर्त्वापः प्रणीय

---

[1] पौर्णदर्व्यार्थं Be.

[2] स्वाहा om TF.

[3] Thus H; रवये F; रवते BT; रवे Be J; Comp. Journ. Germ. Or. Soc. LII, p. 429.

[4] Thus B Be F; ब्रह्मणोभिहिंकार H; ब्रह्मणोवाहिंकार J; ब्राह्मणोपाश्रहिंकर T.

निर्वपत्याग्नेयमष्टाकपालमिति पञ्च संचराण्यैन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेककपालमिति ' त्वचं पुरोडाशानां ग्राहयित्वा श्रपयित्वाभिवास्य प्राङ्त्याप्येभ्यो निनीय स्तम्बयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं ' त्रिर्यजुषा तूष्णीं चतुर्थं ' पूर्वं परिग्राहं परिगृह्णाति ' करणं जपत्युद्धन्त्युद्धतादाग्नीध्रस्त्रिर्हरति ' यदाग्नीध्रस्त्रिर्हरत्यथ चात्वालस्यावृता चात्वालं परिलिखत्युत्तरवेदेरावृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्खाद्याग्नेरावृताग्निं प्रणयत्यग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च दध्ना चोदेहीत्याहृतासु प्रोक्षणीषूदस्य स्फ्यं मार्जयित्वेध्माबर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य स्रुवं च स्रुचश्च संमार्ष्टि तूष्णीं पृषदाज्यग्रहणीं ' पत्नीꣳ संनह्याज्येन च दध्ना चोदेत्याज्यं च प्रोक्षणीश्चोत्पूय प्रसिद्धं ' यथा वैश्वदेवहवीꣳष्येवꣳ संतिष्ठतेऽन्यत्र वाजिनादथ पूर्णपात्रविष्णुक्रमैश्चरित्वा न विसृजते व्रतम् ' ॥ १० ॥ तृतीयः ॥

महापितृयज्ञं करिष्यन्नुपकल्पयते व्रीहीꣳश्च यवाꣳश्च षट्कपालान्यभिवान्यायै दुग्धमर्धपात्रं द्वे नवे पात्रे इक्षुशलाकां[1] त्रीन्पर्णसेवान्समूलं बर्हिर्वर्षीयाꣳसमिध्ममिध्मात्परिश्रयणं कशिपूपबर्हणे आञ्जनाभ्यञ्जने दशाꣳ स्फ्यमुदकुम्भौ यज्ञायुधानीत्यथ

---

[1] Corrected ; ॰शलाका B, the other MSS. ॰शलाकाꣳस् or ॰शलाकान् ।

गार्हपत्यं परिस्तृणाति । तमुत्तरेणैकैकꣳ सꣳसादयति कशि-
पूपबर्हणे आञ्जनाभ्यञ्जने दर्भाꣳ स्फ्यमुदकुम्भौ यज्ञायुधानीत्य।थ
यज्ञोपवीतं कृत्वोत्तरेण[1] गार्हपत्यमुपविश्य पवित्रवत्याग्निहोत्र-
हवण्या निर्वपति । देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्याꣳ सोमाय पितृमते जुष्टं निर्वपामीति चतुरो ५
मुष्टीन्व्रीहीणां निर्वपत्ये।तामेव प्रतिपदं कृत्वा पितृभ्यो बर्हिषद्भ्यो
जुष्टं निर्वपामीति चतुरो यवानामे।तामेव प्रतिपदं कृत्वा पितृभ्यो
ऽग्निष्वात्तेभ्यो जुष्टं निर्वपामीति चतुर एव यवानां । तेषां
व्रीहिष्वेव हविष्कृतमुद्वादयत्यु।पोप्यन्ते यवान्।हविष्कृता वाचं
विसृजते । समानं कर्माधिवपनाद।ध्युप्य दक्षिणार्धे गार्हपत्यस्य १०
षट्कपालानुपदधात्य।थैतान्यवानुलूखले परिक्षुद्य गार्हपत्य एक-
कपालमधिश्रित्य भर्जयन्ति[2] । बहुरूपा धानाः कृत्वा तेषामर्धा
धाना भवन्त्य।थेतरान्सक्तून्कुर्वन्ति । कृतानि पिष्टानि समुप्य
संयुत्याधिपृणक्ति[3] पुरोडाशꣳ षट्कपालम।थोत्तरतो भस्ममिश्रा-
नङ्गारान्निरूह्य तेषु नवं पात्रमधिश्रित्य तिरः पवित्रमाज्यमा- १५
नीय तिरः पवित्रं धाना आवपत्य।थैतदभिवान्यायै दुग्धमर्धपात्रं
याचति । तस्मिꣳस्तिरः पवित्रꣳ सक्तूनोप्यैकयेषुशलाकयोप-
मन्थति । दक्षिणोपमन्थत्य।नारभ्योपमन्थतीति ब्राह्मणम।थोत्तरतो
भस्ममिश्रानङ्गारान्निरूह्य तेष्वधिश्रयति । त्वचं पुरोडाशस्य

---

[1] जघनेन iustead of उत्तरेण T.

[2] om. Be JF.

[3] Before अधिपृणक्ति H Be JF have अथ ।

ग्राहयित्वाभिवास्याचैवाप्येभ्यो[1] निनयति । दक्षिणत एष सम स्थण्डिलः कृतो भवति । तदेनां चतुरश्रां[2] वेदिमालिखत्येव न खनति । तस्यै मध्यतो ऽन्वाहार्यपचनमुपसमाधाय स्तम्बयजुर्हरति । ॥ ११ ॥

इदमेव प्रसिद्धं पौरोडाशिकं । त्रिर्यजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं जपत्युद्धन्त्युद्धृतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथोत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा सम्प्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढ्याज्येनोदेहीत्याहृतासु प्रोक्षणीषूदस्य स्फ्यं मार्जयित्वेध्माबर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङाहृत्य स्रुवं च स्रुचश्च संमार्ष्ट्याज्येनोदेत्याज्यं च प्रोक्षणीश्चोत्पूय प्रसिद्धं पञ्चगृहीतानि वा षड्गृहीतानि वाज्यानि गृहीत्वा प्रोक्षणीभिरुपोत्तिष्ठतीध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तात्समूलं प्रस्तरं गृह्णाति तूष्णीमथ प्राचीनावीतं कृत्वा त्रिरपसलैः परिस्तृणन्पर्येति । संतरामेवाग्रे । ऽथ वितरामथ वितरामथ यज्ञोपवीतं कृत्वा यथेतं त्रिः पुनः प्रतिपर्येत्यथ[3] प्रस्तरपाणिर्द्वौ परिधी परिदधाति मध्यमं चैव दक्षिणं चोर्ध्वे समिधावादधाति । विधृती तिरश्ची सादयति । विधृत्योः समूलं प्रस्तरं न्यस्यति तूष्णीं ।

---

[1] After ग्राहयित्वा Be TJH have श्रपयित्वा ।

[2] Thus T; °स्रां the other MSS.

[3] प्रति om. BF.

प्रस्तरे जुहूं। बर्हिषीतरे। एता असदन्निति समभिमृश्य
प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्यानुपूर्वꣳ[1] हवीꣳष्युद्वासयत्युपस्तीर्णा-
भिघारितं पुरोडाशमभिघार्य[2] धानाः करम्भमिति। तेषामे-
कैकमनूचीनान्युदाहरन्ति। दक्षिणतः पुरोडाशमासादयत्यु।त्तरतो
धाना। उत्तरतः करम्भं। दक्षिणत एतत्परिश्रयणं कशिपूप- ५
बर्हणे आञ्जनाभ्यञ्जने दशाꣳ स्फ्यमिति निदधात्यु।त्तरत उद-
कुम्भौ। दक्षिणत उपविशतो ब्रह्मा च यजमानश्चोत्तरतो
ऽध्वर्युश्चाग्नीध्रश्च। ॥ १२ ॥

अथेध्मात्समिधमाददान आहाग्नये देवेभ्यः पितृभ्यः समिध्य-
मानायानुब्रूही।त्यभ्यादधातीध्मꣳ सकृद्वा त्रिर्वा। परि समिधꣳ १०
शिनष्टि। वेदेनोपवाजयत्य।नूक्तासु सामिधेनीषु स्रुवेणाघारमा-
घारयति। संमृष्टे स्रुग्भ्यामुत्तरमं।थामꣳस्पर्शयन्स्रुचावुदङ्ङत्याक्रम्य[3]
जुह्वा ध्रुवाꣳ समज्य सादयित्वा स्रुचौ प्रवरं प्रवृणीते।[4] ऽया-
श्रावयत्यो श्रावयास्तु श्रौषडग्निर्देवो होता देवान्पितॄन्यक्षत्सीदे-
त्येतावान्प्रवरः। सीदति होता। प्रसवमाकाङ्क्षति। प्रसूतः १५
स्रुचावादायात्याक्रम्याश्राव्याह समिधो यजेति। वषट्कृते जुहोति।
यज यजेत्यपबर्हिषश्चतुरः प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य सꣳस्रावे-

---

[1] ॰पूर्व्यꣳ all.

[2] After पुरोडाशं B Be HF ins. उद्वासयति।

[3] Thus Be HF; स्रुच उद॰ J; स्रुचाद्रुद॰ T; स्रुचा उद॰ B.

[4] BH ins. प्रसिद्धꣳ होतारं वृणीते but comp. TB. I, 6. 9. 1.

णानुपूर्वꣳ[1] हवीꣳष्यभिघारत्यथाग्नये सोमायेत्याज्यभागाभ्यां चरत्यथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा प्राचीनावीतानि कुर्वते । विपरिक्रामन्त्येत ऋत्विजो । विपरिहरन्ति हवीꣳष्युत्तरतः पुरोडाशमासादयति । दक्षिणतः करम्भमांग्नय[2] एव धाना भवन्त्युत्तरत उपविशतो ब्रह्मा च यजमानश्च दक्षिणतोऽध्वर्युश्चाग्नीध्रश्चाथैनत्परिश्रयन्ति । तस्योदीचीं द्वारं कुर्वन्ति । स यो बलवाꣳस्तमाहानेनोदकुम्भेन संततया धारया त्रिरपसलैः परिषिञ्चन्परीहीति । स तथा करोति । निधाय कुम्भं यथेतं त्रिः पुनः प्रतिपर्येत्यथोपस्तीर्य पूर्वार्धात्पुरोडाशस्यावद्यन्नाह ॥ १३ ॥

सोमाय पितृमतेऽनु स्वधेति । पूर्वार्धात्पुरोडाशस्यावद्यति । पूर्वार्धाद्धानानां । पूर्वार्धात्करम्भस्याभिघारयति । प्रत्यनक्ति । दक्षिणतोऽवदायोदङ्ङतिक्रामत्यो[3] स्वधेत्याश्रावयत्यस्तु स्वधेति प्रत्याश्रावयति । सोमं पितृमन्तꣳ स्वधा कुर्विति । ये स्वधेत्यागूर्य स्वधामह इति वा[4] । स्वधा नम इति वषट्करोति । वषट्कृते

---

[1] ॰पूर्व्यꣳ all.

[2] Thus FJ (?) ; चामथा HBT ; मथा Be.

[3] Here and in the corresponding passages some of the MSS. have चत्याक्रामति instead of चति॰ and चा instead of चो ।

[4] Thus here and in the four corresponding passages BT ; JF Be have every time ये स्वधामह इत्यागूर्भवति instead of ये स्वधेत्यागूर्य स्वधामह इति वा ; H has this passage four times thus : ये स्वधामह इत्यागूर्भवति स्वधा नम इति वषट्करोति ये स्वधेत्यागूर्य स्वधामह इति वा ।

जुहोत्यथोपस्तीर्य मध्याद्धानानामवद्यन्नाह पितृभ्यो बर्हिषद्भ्यो ऽनु स्वधेति ' मध्याद्धानानामवद्यति ' मध्यात्करम्भस्य ' मध्यात्पुरोडाशस्याभिघारयति ' प्रत्यनक्ति ' दक्षिणतो ऽवदायोदङ्ङतिक्रामत्यों स्वधेत्याश्रावयत्यस्तु स्वधेति प्रत्याश्रावयति ' पितॄन् बर्हिषदः स्वधा कुर्विति ' ये स्वधेत्यागूर्य स्वधामह इति वा ' स्वधा नम इति वषट्करोति ' वषट्कृते जुहोत्यथोपस्तीर्यापरार्धात्करम्भस्यावद्यन्नाह पितृभ्यो ऽग्निष्वात्तेभ्यो ऽनु स्वधेत्यपरार्धात्करम्भस्यावद्यत्यपरार्धात्पुरोडाशस्यापरार्धाद्धानानामभिघारयति ' प्रत्यनक्ति ' दक्षिणतो ऽवदायोदङ्ङतिक्रामत्यों स्वधेत्याश्रावयत्यस्तु स्वधेति प्रत्याश्रावयति ' पितॄनग्निष्वात्तान्स्वधा कुर्विति ' ये स्वधेत्यागूर्य स्वधामह इति वा ' स्वधा नम इति वषट्करोति ' वषट्कृते जुहोत्यथोपस्तीर्य दक्षिणार्धात्पुरोडाशस्यावद्यन्नाहाग्नये कव्यवाहनाय स्विष्टकृते ऽनु स्वधेति ' दक्षिणार्धात्पुरोडाशस्यावद्यति ' दक्षिणार्धाद्धानानां ' दक्षिणार्धात्करम्भस्य ' द्विरभिघारयति ' न प्रत्यनक्ति ' दक्षिणतो ऽवदायोदङ्ङतिक्रामत्यों स्वधेत्याश्रावयत्यस्तु स्वधेति प्रत्याश्रावयत्यग्निं कव्यवाहनꣳ स्विष्टकृतꣳ स्वधा कुर्विति ' ये स्वधेत्यागूर्य स्वधामह इति वा ' स्वधा नम इति वषट्करोति ' वषट्कृते दक्षिणार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोत्यथैतन्मेक्षणꣳ शलाकामित्यग्नावनुप्रहरत्यथैने सꣳस्रावेणाभिजुहोत्यथ दक्षिणतो ऽत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा यज्ञोपवीतानि कुर्वते ' विपरिक्रामन्त्येत ऋत्विजो ' विपरिहरन्ति हवीꣳषि ' दक्षिणतः

पुरोडाशमासादयत्युत्तरतः करम्भमाशय[1] एव धाना भवन्ति[2] । दक्षिणत उपविशतो ब्रह्मा च यजमानश्चोत्तरतोऽध्वर्युश्चाग्नीध्रश्चाथ प्राशित्रमवदायेडामवद्यति । ॥ १४ ॥

उपहूतायामिडायामग्नीध आदधाति षडवत्तं । निघ्रेण[3] भक्षयित्वा बर्हिषि संन्यस्यन्त्यथ प्राचीनावीतानि[4] कृत्वा पुरोडाशं धानाः करम्भमिति पात्र्याꣳ संप्रयौति । तिसृषु स्रक्तिषु[5] पर्णमयेषु त्रीन्पिण्डान्ददात्येतत्ते ततासौ ये च त्वामन्विति दक्षिणस्याꣳ श्रोण्यामेतत्ते पितामहासौ ये च त्वामन्विति दक्षिणेऽꣳसे । एतत्ते प्रपितामहासौ ये च त्वामन्वित्युत्तरेऽꣳसे । उत्तरस्याꣳ श्रोण्यां लेपं निमार्ष्ट्येषा युष्माकमियमस्माकमिमां वयं जीवा जीवन्तोऽनुसंचरन्तो भूयास्मेत्यथ पितरो यथाभागं मन्दध्वमित्युक्त्वोदञ्चो निष्क्रम्य[6] यज्ञोपवीतानि कृत्वाहवनीयमुपतिष्ठन्ते सुसंदृशं त्वा वयं मघवन्मन्दिषीमहि । प्र नूनं पूर्णवन्धुर स्तुतो यासि वशाꣳ अनु । योजा न्विन्द्र ते हरीमित्या तमितोरुपतिष्ठन्ते । ऽथ गार्हपत्यमुपतिष्ठन्तेऽक्षन्-

---

[1] Thus only F ; श्या Be ; आश्या the other MSS.

[2] BT ins. उत्तरत उदकुंभौ ।

[3] Thus (comp. Apastamba's अवघ्रेण) T Bh. Keś., the other MSS. also Prayoga I.O. जिघ्रेण ।

[4] Here and in the following passages the MSS. have sometimes the singular instead of the plural : यज्ञोपवीतं, प्राचीनावीतं ।

[5] स्रक्तीषु Be H.

[6] Be JF ins. अथ ।

मीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती । योजा न्विन्द्र ते हरीमित्या तमितोरुपतिष्ठन्ते । ऽथ प्राचीनावीतानि कृत्वान्वाहार्यपचनमभिप्रपद्यन्ते ऽक्षन्पितरो ऽमीमदन्त पितरो ऽतीतृपन्त पितरो ऽमीमृजन्त पितरः । परेत पितरः सोम्या इत्या तमितोरुपतिष्ठन्ते । स यो ब्रह्मवाꣳस्तमाहानेनोदकुम्भेन संततया धारया त्रिरपसलैः परिषिञ्चन् परीहीति । स तथा करोति । निधाय कुम्भं यथेतं त्रिः पुनः प्रतिपर्यैत्याहरणप्रीत्येव[1] कशिपूपबर्हणे आञ्जनाभ्यञ्जने ददात्यथ वासाꣳसि ददात्यथ षड्भिर्नमस्कारैर्विपर्यासमुपतिष्ठते । ऽथ वीरं याचते । ऽथैनानुत्थाप्य प्रवाह्य तिसृभिर्मन आह्वयते मनो न्वाह्वामहे आ न एतु मनः पुनः पुनर्नः पितरो मन इत्यैतान्पिण्डान्सह पर्णसैवैरग्नावनुप्रहरति । व्यवच्छिन्दन्ति परिश्रयणमथ यज्ञोपवीतानि कुर्वते । ऽथ[2] संप्रैषमाह ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्यथ जुहूपभृतावादायात्याक्रम्याश्राव्याह देवौ यजेति[3] । वषट्कृते जुहोति । यज[4] यजेत्यपबर्हिषौ द्वावनूयाजाविष्ट्वोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा वाजवतीभ्याꣳ स्रुचौ व्यूहति । अंशुना प्रस्तरपरिधि संप्रकीर्य संप्रस्राव्य स्रुचौ विमुच्यात्रैव समिष्टयजुर्जुहो-

---

[1] Thus B Be HF. Keś. ; आहरणप्रीत्येव T ; J corrupt.

[2] Thus Be JF ; ०वीतं कृत्वाथ the other MSS.

[3] यजयजेति Be H.

[4] om. Be F.

त्यथैतेषाꣳ शस्त्राणां द्वेद्वे उदाहरन्त्यथ यज्ञोपवीतानि कृत्वा प्राजापत्ययर्चा गार्हपत्यमुपतिष्ठन्ते प्रजापते न त्वदेतान्यन्य इत्यथैतां द्वितीयां जपति यदन्तरिक्षं पृथिवीमुत द्यामिति' संतिष्ठते महापितृयज्ञः' ॥ १५ ॥ चतुर्थः ॥

यावदेवात्राध्वर्युस्तिष्ठति तावदेष प्रतिप्रस्थाता प्रतिपूरुषं त्रैयम्बकानेककपालानेकातिरिक्तान्गार्हपत्ये श्रपयित्वानभिघारितानुद्वास्य मते वा शरावे वा जरत्कोशबिले वा समुप्योपास्ते' ऽथ याचति नीललोहिते सूत्रे अन्तमं[1] पर्णमन्तमागारादेकोल्मुकमुदपात्रमित्यैतत्समादाय गार्हपत्यमुपतिष्ठन्ते यावन्तो गृह्याः स्मस्तेभ्यः कमकरं पशूनाꣳ शर्मासि शर्म यजमानस्य शर्म मे यच्छेत्यथोदञ्चो निष्क्रम्य तां दिशं यन्ति यत्रास्य नित्यसंपन्नश्चतुष्पथ स्पष्टो भवति' यद्यु वै न भवत्यनसा वा रथेन वा वियान्ति' तदेतदेकोल्मुकमुपसमाधाय[2] संपरिस्तीर्यान्तमे पर्णे सर्वेषां त्रैयम्बकाणाꣳ सकृत्सकृत्समवदाय जुहोत्येक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजꣳ सुभेषजं यथासति सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम् । यथा नः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसाययात्स्वाहेत्यथैतदन्तमं पर्णं यं द्वेष्टि तस्य

---

[1] Here and infra the MSS. have sometimes अंतिम° ।

[2] एतद् only FJ ; the other MSS. om.

संचरे पशूनां न्यस्यति । यद्यु वै न द्वेष्याखुवटे[1] न्यस्यत्यथैतेषां त्रैयम्बकाणामेकैकं व्युत्प्रयच्छति द्वौ यजमानायाथैतमग्निं त्रिः प्रदक्षिणं परियन्ति[2] दक्षिणानूरूनुपाघ्नानास्त्र्यम्बकं[3] यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतादिति । सकृत्परीत्योत्तरतस्तिष्ठन्त्युत्खिदन्ति[4] । भगाय त्वेति क्षिपन्ति । एवमेव द्वितीयं परियन्त्येवं तृतीयमथैषा पतिकामा[5] त्रिरपसलैः पर्येति सव्यमूरुमुपाघ्नाना[6] त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मा पतेरिति । सकृत्परीत्योत्तरतस्तिष्ठत्युत्खिदति[4] । भगाय त्वेति क्षिपति । एवमेव द्वितीयं पर्येत्येवं तृतीयमथैनान्यजमानस्याञ्जलावावपति ॥ १६ ॥

प्रजया त्वा सꣳसृजामि मासरेण सुरामिवेति । तान्यजमानः पत्न्यञ्जलावावपति प्रजया त्वा पशुभिः सꣳसृजामि मासरेण सुरामिवेति । तान्पत्नी दुहित्रे भगकामायै भगेन

---

[1] Thus Bh.; आख्युवटे T; आखवटे B; the other MSS. आखवटे, comp. X. 48.

[2] Thus only Be; the other MSS. write पर्यंति ।

[3] Thus BH; उपघ्नाना॰ J Be; उपघ्नानां F; उपनिघ्नानाम् T; अपघ्नानाः Keś.

[4] Thus BH; उत्किरंति (as TBr. I. 6. 10. 5) the other MSS., but comp. Dvaidhasūtra: त्रैयम्बकाणामुत्खेदन इति ।

[5] Instead of अथैषा पतिकामा BF have अथ दुहिता भगकामा ।

[6] Thus BH; उपघ्नाना Be JF Keś.

त्वा सꣳसृजामि मासरेण सुरामिवेत्य'थैनान्मूत ओप्य नीललोहिताभ्याꣳ सूत्राभ्यां विग्रथ्य शुष्के वा स्थाणौ विशाखायां[1] वा बध्नात्येष ते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतो ऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासोमित्या' तमितोरुपतिष्ठन्ते' ऽथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति' हस्तपादान्प्रक्षाल्यैतेनैव यथेतमेत्यादित्यं चरुं पुनरेत्य निर्वपती'यं वा अदितिरस्यामेव प्रतितिष्ठन्तीति ब्राह्मणꣳ' सा प्रसिद्धेष्टिः संतिष्ठते' ऽत्र विसृजते व्रतम'थ पौर्णमासवैमृधाभ्यामिष्ट्वा यजमानायतन उपविश्य त्रेण्या शलल्या लोहितायसस्य च क्षुरेण शीर्षन्नि च वर्तयते परि च वपते य इमां महीं पृथिवीमृतुभिः पर्यवर्तयद्यो अस्याः पृथिव्यास्त्वचि निवर्तयत्योषधीः । अग्निरीशान ओजसा वरुणो धीतिभिः सह । इन्द्रो मरुद्भिः सखिभिः सह ॥ अग्निस्तिग्मेन शोचिषा तप आक्रान्तमुष्णिहा । शिरस्तपस्याहितं वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये सत्येन परिवर्तये । तपसास्यानुवर्तये शिवेनास्योपवर्तये शग्मेनास्याभिवर्तये ॥ शीर्ष्णस्तदृतं तत्सत्यं तद्भूतं तच्छकेयं तेन शकेयं तेन राध्यासमिति पुरस्तादेवाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽथोपरिष्टा'त्संतिष्ठन्ते साकमेधहवीꣳषौदावत्सरीणाꣳ स्वस्तिमाशास्त इत्याशास्ते' ॥ १७ ॥ पञ्चमः ॥

अथातश्चतुर्षु मासेषु शुनासीरीयहविर्भिर्यक्ष्यमाणो[2] भवति'

---

[1] Thus Be HF, Dvaidha, Bh., Keś , विशाखां BT.

[2] Some MSS. read here and *infra* शुनासीर्य० ।

स उपकल्पयते त्र्येणीꣳ शललीं लोहितायसस्य च क्षुरं पञ्चतयानि पुरोडाशकपालानि पञ्च चरुस्थालीस्तावन्ति मेक्षणानि पृषदाज्याय दधीत्यथास्यैताꣳ[1] रात्रिं वायवे वत्सा अपाकृता भवन्ति ' प्रातर्वायव्यं पयो दोहयति[2] सांनाय्यस्य वावृता तूष्णीं वाथ प्रातर्हुते ऽग्निहोत्रे पृष्ठ्याꣳ स्तीर्त्वापः प्रणीय निर्वपत्याग्ने- ५
यमष्टाकपालमिति पञ्च संचराण्यैन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं पयः सौर्यमेककपालमिति ' त्वचं पुरोडाशानां ग्राहयित्वा श्रपयित्वाभिवास्य प्राङेत्याप्त्येभ्यो निनीय स्तम्बयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं ' त्रियजुषा तूष्णीं चतुर्थं ' पूर्वं परिग्राहं १०
परिगृह्णाति ' करणं ' जपत्युद्धन्त्युद्धृतादाग्नीध्रस्त्रिर्हरति ' स यद्युत्तरवेदिं करोति यथा महाहवीꣳष्येवꣳ संतिष्ठते ' यद्यु वा उत्तरवेदिं न करोति यथा वैश्वदेवहवीꣳष्येवꣳ संतिष्ठते ऽन्यत्र वाजिनादथ पूर्णपात्रविष्णुक्रमैश्चरित्वा विसृजते व्रतमथ पौर्णमासवैमृधाभ्यामिष्ट्वा यजमानायतन उपविश्य त्र्येण्या १५
शलल्या लोहितायसस्य च क्षुरेण शीर्षन्वि च वर्तयते परि च वपत एकं मासमुदसृजत्परमेष्ठी प्रजाभ्यः । तेनाभ्यो मह आवहदमृतं मर्त्याभ्यः ॥ प्रजामनु प्रजायसे तदु ते मर्त्यामृतम् । येन मासा अर्धमासा ऋतवः परिवत्सराः ॥ येन ते ते प्रजापते

---

[1] इति found only in BH; the word is missing in all the MSS. also supra page 141, 15.

[2] दोहयित्वा TF.

ईजानस्य न्यवर्तयन् । तेनाहमस्य ब्रह्मणा निवर्तयामि जीवसे ॥ अग्निस्तिग्मेन शोचिषा तप आक्रान्तमुष्णिहा॑ शिरस्तपस्याहितं वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये सत्येन परिवर्तये॑ तपसास्यानुवर्तये शिवेनास्योपवर्तये शग्मेनास्याभिवर्तये ॥ शीर्ष्णांस्तदृतं तत्सत्यं तद्व्रतं तच्छकेयं तेन शकेयं तेन राध्यासमिति पुरस्तादेवाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽथोपरिष्टात्संतिष्ठन्ते शुनासीरीयहवीꣳष्य॑नुवत्सरीणाꣳ स्वस्तिमाशास्त इत्याशास्ते॑ ॥ १८ ॥ षष्ठः ॥

॥ इति पञ्चमः प्रश्नः ॥

अग्निष्टोमेन यक्ष्यमाणो भवति । स उपकल्पयते कृष्णाजिनं च कृष्णविषाणां च वासश्च मेखलां च सैषा पृश्नी वेणीकार्या भवति त्रिवृदेकतःपाशा द्वाविꣳशतिं च दर्भपुञ्जीलानि नवनीतं चाञ्जनं च सतूलां च शरेषीकामौदुम्बरं च[1] दण्डं चमसं च[2] व्रतप्रदानꣳ स्थालीꣳ सशिक्याꣳ समेक्षणामेतानि त्रयोदश ५
यजमानस्तावन्त्येव पत्नीमभितो भवन्ति कुम्भं च कुरीरं च वासश्च योक्त्रं चापरिमितानि च दर्भपुञ्जीलानि नवनीतं चाञ्जनं च सतूला च शरेषीकामृन्मयश्च पात्रः शङ्कुश्च स्थाली सशिक्या समेक्षणा । जुष्टे देवयजने शाला कारिता भवति । पुरोहविषि देवयजने याजयेदित्येतेषां यज्जोषयते । प्राचीन- १०
वꣳशा दिक्ष्वतीकाशा दक्षिणतो वर्षीयसी । तस्यै चतस्रो द्वारः कुर्वन्ति प्राचीं दक्षिणां प्रतीचीमुदीचीं । दक्षिणतो व्रतश्रपणागारं कुर्वन्ति पश्चात्पत्नीशालमथ[3] यदि दूरे तीर्थं भवत्युत्तरेण शालां द्वौ कटपरिवारौ कुर्वन्ति पूर्वं यजमानायापरं पत्न्यै । तयोः प्राची द्वारौ कुर्वन्ति । तदुदकुम्भौ निधापयत्यथा- १५
मावास्येन वा हविषेष्ट्वा नक्षत्रे वारण्योरग्नीन्समारोह्य शालामभिप्रैत्युत्तरेण शालां परीत्य पूर्वया द्वारा शालां प्रपाद्य गार्हपत्यस्यायतने मथित्वाग्नीन्विहृत्य मध्यमे वꣳशे राजानं प्रग्रथ्नन्ति । परिस्तृणन्ति । दक्षिणत उपविशतो ब्रह्मा च यजमानश्चाथ

---

[1] च only P, the other MSS. om. the word, except F which has चमसं।

[2] च om HF.

[3] Thus TJ; ०शालाम० HBP; ०शालीम० F.

गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा सप्तहोतारं मनसानुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा यूपाहुतिं जुहोति यद्यत्र जुहोति। पूर्वाह्ण एवैतौ व्रतदुघयोर्वत्सौ बध्नन्त्यथाभ्यां व्रतोपायनीयं पाचयति[1]। तस्याश्रितौ भवतः सर्पिर्मिश्रस्य पयोमिश्रस्याथाध्वर्युस्तीर्थ्यान्संभारान्याचत्यथाहैहि यजमानेति। पूर्वया द्वारोपनिष्क्रम्य यत्रापस्तद्यन्त्यथास्य प्राङ्मुखस्य दक्षिणं गोदानमद्भिरुनत्ति ॥ १ ॥

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस इत्यूर्ध्वाग्रं बर्हिरनूक्ष्यत्योषधे त्रायस्वैनमिति। स्वधितिं तिर्यञ्चं निदधाति स्वधिते मैनꣳ हिꣳसीरिति। प्रवपति देवश्रूरेतानि प्रवप इति। स्वस्त्युत्तराण्यशीयेत्युप्तान्तं प्रत्यभिमृशत। एतयैवावृतोत्तरं गोदानमद्भिरुनत्ति यजुषा वा तूष्णीं वा। नापिताय क्षुरं प्रयच्छन्नाह नापितोप्रकेशश्मश्रुं मे निकृत्तनखं प्रब्रूतादिति। तं तथा प्राहायैनमद्भिरभिषिञ्चत्यापो अस्मान्मातरः शुन्धन्तु घृतेन नो घृतप्वः पुनन्त्विति। संप्रधाव्य रजः प्रप्लावयति विश्वमस्मत्प्रवहन्तु रिप्रमित्युदेत्युदाभ्यः[2] शुचिरा पूत एमीति। वसनस्यान्तेन प्रतिच्छाद्याप आचामत्यपो ऽश्नातीति ब्राह्मणमथ प्रदक्षिणमहतं वासः परिधत्ते सोमस्य तनूरसि तनुवं मे पाहीत्यथास्यैतन्नवनीतं विचितमुदशराव उपशेते। तस्य पाणिभ्याꣳ संप्रस्राय

---

[1] Thus J; पाचति T; याचयति BP; पावयति H; वाचयति F.

[2] Corrected according to Bh., Keś., and the parallel passage p. 159. 1. The Mss. have not उदेति but येति (BT) and एति HF; J om.

मुखमेव प्रथममभ्यङ्क्ते महीनां पयो ऽसि वर्चोधा असि वर्चो मयि धेहीत्यनुलोममा पादाभ्यामन्यो ऽस्य पृष्ठमभ्यनक्त्यथास्यैतदाञ्जनं पिष्टं दृषदुपशेते सतूला च शरेषीका । तस्य प्राङ्मुखस्य प्रत्यङ्मुख उपविश्य सव्येन पाणिना दक्षिणमक्ष्यनक्ति वृत्रस्य कनीनिकासि चक्षुष्पा असि चक्षुर्मे पाहीति त्रिरनिधावं । द्विरुत्तरमप्यु पञ्च कृत्व आङ्क्त इति ब्राह्मणं । पञ्च कृत्व एव दक्षिणं पञ्च कृत्व उत्तरमथैनमेकविꣳशत्या दर्भपुञ्जीलैः पवयति चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति । यजमानमतिवाचयति तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमित्यथैनꣳ सव्ये पाणावभिपात्य शालामानयत्या वो देवास ईमहे सत्यधर्माणो अध्वरे यद्वो देवास आगुरे यज्ञियासो हवामह इति । पूर्वया द्वारा शालां प्रपादयतीन्द्राग्नी द्यावापृथिवी आप ओषधीरित्यथैनमग्रेणाहवनीयं पर्याणीय दक्षिणत उदङ्मुखमुपवेश्याहवनीयमीक्षयति त्वं दीक्षाणामधिपतिरसीतीह मा सन्तं पाहीत्यात्मानम् । ॥ २ ॥

यावदेवाचाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता पत्न्यै दक्षिणमुपपक्षमद्भिरुनत्ति तूष्णीं । तूष्णीमूर्ध्वाग्रं बर्हिरनूच्छ्रयति । तूष्णीꣳ स्वधितिं तिर्यञ्चं निदधाति । तूष्णीं प्रवपति । तूष्णीमुप्तान्तं प्रत्यभिमृशत । एतयैवावृतोत्तरमुपपक्षमद्भिरुनत्ति तूष्णीमेव । नापिताय क्षुरं प्रयच्छन्नाह नापितोप्तोपपक्षां मे निकृत्तनखां प्रकृतादिति । तां तथा प्राहायैनामद्भिरभिषिञ्चति

तूष्णीं । तूष्णीꣳ संप्रधाव्य रजः प्रस्नावयति तूष्णीमद्भिरुदेति[१] तूष्णीं । वसनस्यान्तेन प्रतिच्छाद्याप आचामति । तूष्णीं[२] प्रदक्षिणमहतं वासः परिधत्ते । तूष्णीमभ्यङ्क्ते । तूष्णीमाङ्क्ते । ऽथैनामपरिमितैर्दर्भपुञ्जीलैः पवयति तूष्णींतूष्णीमेवाथैनामानीयापरया द्वारा शालां प्रपाद्य प्राचीमुदानयन्वाचयति प्रैतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु । अथाहमनुकामिनी स्वे लोके विशा इहेत्यथ जघनेन गार्हपत्यमुपसीदति सुप्रजसस्त्वा वयꣳ सुपत्नीरुपसेदिम । अग्ने सपत्नदम्भनमदब्धासो अदाभ्यमित्यथ पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्नावैष्णवमेकादशकपालं दीक्षणीयामिष्टिं निर्वपति । तस्यै दशतयमुत्सीदति न यजमानं व्रतमुपनयति न पत्नीꣳ संनह्यति न यजमानभागं करोति न ब्रह्मभागं न बर्हिषदं पुरोडाशं करोति नान्वाहार्यं याचति[३] न फलीकरणहोमेन चरति न समिष्टयजुर्जुहोति न पूर्णपात्रे यजमानं वाचयति न विष्णुक्रमान्क्रमते । ऽथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्याज्यस्थाल्यां प्रत्यवनीयाज्यस्थाल्याः स्रुवेणोपघातं दीक्षाहुतीर्जुहोति ॥ ३ ॥

आकूत्यै प्रयुजे ऽग्नये स्वाहा मेधायै मनसे ऽग्नये स्वाहा दीक्षायै तपसे ऽग्नये स्वाहा सरस्वत्यै पूष्णे ऽग्नये स्वाहेत्यथ

---

[१] अद्भिर् (Instr.) all, instead of the Abl., that was to be expected; H omits the word.

[२] तूष्णीं twice BF.

[३] Thus HTJF; पाचयति B.

स्रुचि चतुर्गृहीतं गृहीत्वा स्रुचा पञ्चमीं जुहोत्यापो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णाꣳ स्रुचमौद्ग्रहणं जुहोति विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यम् । विश्वे राय
इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहेत्यथैतत्पूर्णपात्रमन्तर्वेदि ५
निनयत्यथाग्रेणाहवनीयं पर्याहृत्य यजमानाय प्रयच्छति कृष्णाजिनं च कृष्णविषाणां च वासश्च मेखलां चौदुम्बरं दण्डं पञ्चममुष्णीषꣳ षष्ठमथ प्रतिप्रस्थाता पत्न्यै प्रयच्छति कुम्बं च कुरीरं च वासश्च योक्त्रं च शङ्कुं च ॥ ४ ॥ प्रथमः ॥

अथ यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोप- १०
स्तृणाति तस्य शुक्लकृष्णे संमृशति शुक्ले ऽङ्गुष्ठो भवति कृष्णे ऽङ्गुलिर्ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातमास्य यज्ञस्योदृच इत्यथ दक्षिणं जान्वाच्याभिसर्पतीमां धियꣳ शिक्षमाणस्य देव क्रतुं दक्षं वरुण सꣳशिशाधि । ययाति विश्वा
दुरिता तरेम सुतर्माणमधि नावꣳ रुहेमेत्यथोपस्थं कृत्वा १५
प्रदक्षिणं मेखलां पर्यस्यत्यूर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छेति पाहि मा मा मा हिꣳसीरिति निष्टर्क्यं ग्रन्थिं ग्रथ्नात्येतस्मिन्काले प्रतिप्रस्थाता योक्त्रेण पत्नीꣳ संनह्यत्याशासाना सौमनसꣳ सं त्वा नह्यामीति द्वाभ्यामथ यजमानं वाससा
प्रोर्णोति विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छेति २०
वसनस्यातीकाशेषु वाचयति नक्षत्राणां मातीकाशात्पाहीति प्रतिकृष्य वसनस्यान्तान्प्रदक्षिणमुष्णीषेण शिरो वेष्टयति श्रिया

ते शिरो वेष्टयामि श्रियै यशसे ब्रह्मवर्चसायेत्येतस्मिन्काले प्रतिप्रस्थाता पत्न्यै कुम्बकुरीरमध्यूहति । तूष्णीमथास्यैषा कृष्णविषाणा त्रिवलिर्वा पञ्चवलिर्वा शाण्या रज्ज्वा परिवृषा मण्डचरवद्विग्रथिता[१] । तां यजमानाय प्रयच्छतीन्द्रस्य योनिरसीति । मा मा हिꣳसीरिति यजमानः प्रतिगृह्णाति । तां वसनस्यान्तमायां[२] दशायां बद्ध्वा तयान्तर्वेदि लोष्टमुद्धन्ति कृष्यै त्वा सुसस्याया इति । सुपिप्पलाभ्यस्त्वौषधीभ्य इति दक्षिणं गोदानं कण्डूयत । एतस्मिन्काले प्रतिप्रस्थाता पत्न्यै शङ्कुमाबध्नात्येतेन कण्डूयस्वेत्यथास्मा ऊर्ध्वाग्रमौदुम्बरं दण्डं प्रयच्छति मुखेन संमितꣳ सुपस्था देवो वनस्पतिरित्यूर्ध्वो मा पाह्योदृच इति यजमानः प्रतिगृह्णात्यथैनं यज्ञस्यान्वारम्भं वाचयति स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्याꣳ स्वाहोरोरन्तरिक्षात्स्वाहा यज्ञं वातादारभ इत्यथ मुष्टी[३] करोति वाचं[३] यच्छत्यथाहादीक्षिष्टायं ब्राह्मणो ऽसावित्थंगोत्रो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता तमिन्द्रायेन्द्राग्निभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यश्च सोमपेभ्यः

---

[१] The reading of these difficult words is not wholly certain ; H reads as above ; B : मंडचरवद्भिवाविग्र॰ ; J : मंठचरवद्भाविग्र॰ ; T : मण्डलचरवद्भाविग्र॰ ; F : मडचरद्भितावाविग्र॰ ; P : मंडचरवद्भितावाविग्र॰ ; comp. the Bhāṣya (and Keś.) : मण्डचरवत् लाङ्गलपाशवत् बद्धा, where बद्धा is the periphrase of विग्रथिता ।

[२] स्यंतिमायां BJ .

[३] Thus (without च) TJF ; BH ins. च after वाचं and after मुष्टी, but comp. TS. VI. 1. 4. 3.

प्रब्रूम इति । त्रिरुपाꣳश्वाह । देवेभ्य एवैनं प्राह । त्रिरुच्चैरुपनिष्क्रम्यो।भयेभ्य एवैनं देवमनुष्येभ्यः प्राहेति ब्राह्मणमथैनꣳ सꣳशास्ति ॥ ५ ॥

दीक्षितोऽसि दीक्षितवादं वद सत्यमेव वद मानृतं मा स्मयिष्ठा मा कण्डूयथा मापावृथा यदि स्मयासा अपिगृह्य स्मयासै यदि कण्डूयासै कृष्णविषाणया कण्डूयासै यदि वाचं विसृजेद्वैष्णवीमृचमनुद्रवतान्मा त्वान्यत्र दीक्षितविमितात्सूर्यो ऽभ्युदियान्माभिनिम्रुक्ताद्यानि[1] देवतानामानि यथाख्यातं तान्याचक्ष्वाथ यान्यदेवतानामानि यथाख्यातं तान्याचक्षाण उपरिष्टाद्विचक्षणं धेहि चनसितवतीं विचक्षणवतीं वाचं वद कृष्णाजिनान्मा व्यवच्छेत्था दण्डाच्चेति । स एवमेवैतत्सर्वं करोत्य।थोपसमिन्धनवेलायामुत्तरेणाहवनीयं तिष्ठन्संप्रैषमाहाग्नीञ्ज्योतिष्मतः कुरुत दीक्षित वाचं यच्छ[2] पत्नि वाचं यच्छेति । संप्रेष्य वाचंयमयोर्व्रते दोहयतो । ऽथाध्वर्युः[3] पूर्वया द्वारोपनिष्क्रम्य दोहयित्वैतेनैव यथेतमेत्य गार्हपत्येऽग्निहोत्रविधिं चेष्टित्वा तस्मादुदगुद्वास्य शीतीकृत्वातच्य वानातच्य वोत्तरे शालाखण्डे शिक्य आमजत्य।थ प्रतिप्रस्थाता दक्षिणया द्वारोपनिष्क्रम्य दोहयित्वैतेनैव यथेतमेत्य व्रतश्रपणे तस्मादुदगुद्वास्य शीतीकृत्वातच्य वानातच्य वा दक्षिणे शालाखण्डे शिक्य

---

[1] Thus HF; ॰भ्युदयान् T; ॰भ्युदगात् BJ.

[2] BT ins. व्रत्य वाचं यच्छ ।

[3] JF ins. प्रदक्षिणमावृत्य ।

आसजत्यथोदितेषु नक्षत्रेषु यजमानः कृष्णाजिनमासज्य पू द्वारोपनिष्क्रम्याग्रेण शालां तिष्ठन्भूर्भुवः सुवर्व्रतं कृणुत कृणुतेति त्रिर्वाचं विसृजते। ऽथातिथीनामुपस्थामेति। चनसितवतीं विचक्षणवतीं वाचं वदति। स यद्यु हामेध्यमुपाधिगच्छति तज्जपत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाꣳ श्रेष्ठो दीक्षे मा मा हासीरित्यथ यद्येनमभिवर्षत्युन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्येवं[1] तत्र जपति। तस्यैते यजुषी परिप्लवे आ सꣳस्थायै भवतो। ऽथास्मै निपतः[2] काले यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति[3]। स यदि बहुतयमुपस्तीर्णं भवति कृष्णाजिनादेवानन्तर्हितः संविशत्यथ संवेशनयजुर्जपति ॥ ६ ॥

अग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि। गोपाय नः स्वस्तये प्रबुधे नः पुनर्दद इति। दक्षिणतः शय एतद्वै यजमानस्यायतनꣳ स्व एवायतने शये ऽग्निमभ्यावृत्य शये देवता एव यज्ञमभ्यावृत्य शय इति ब्राह्मणमथैषा पत्नी जघनेन गार्हपत्यꣳ संविशति तूष्णीमथाध्वर्युर्मध्यरात्र आद्रुत्य प्रबुद्धयजुर्वाचयति त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्य इत्यथाप आचामति दैवीं धियं मनामहे सुमृडीकामभिष्टये। वर्चोधां यज्ञवाहसꣳ सुपारा नो असद्वश

---

[1] एव BTH.

[2] नियतः BH ; निपतः T Keś. ; निषपतः F ; नितः J ; निपवतः P pr. m. ; निषपतः sec. m.

[3] F ins. यद्यपरिस्तीर्णा भवति comp. Keś. यद्यपरिस्तीर्णं भवति ।

इत्यथास्मै कꣳसे वा चमसे वा निःषिच्य व्रतं प्रयच्छति। तद्दक्षिणतः परिश्रित्य व्रतयति ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहेति। यजुषा यावन्मात्रं व्रतयित्वा तूष्णीं भूयो व्रतयत्ये। तस्मिन्काले प्रतिप्रस्थाता पत्न्यै पात्रे निःषिच्य व्रतं प्रयच्छति। तत्सा परिश्रित्य व्रतयति तूष्णीं। निर्णिज्य पात्रे प्रयच्छतो। ऽथ तथैव पुरा नक्षत्राणामन्तर्धानात्संप्रेष्य वाचंयमयोर्व्रते दोहयतो। ऽथोदित आदित्ये यजमानः कृष्णाजिनमासज्य पूर्वया द्वारोपनिष्क्रम्यापरेण शालां तिष्ठन्भूर्भुवः सुवर्व्रतं कृणुत व्रतं कृणुतेति त्रिर्वाचं विसृजते। समानो वाचो विसर्गः समानꣳ संवेशनयजुः समानं प्रबुद्धयजुः समानमपामाचमनꣳ समानं व्रतनमथ मनोहारान्प्रहिणोति। स यं मन्यते न मा प्रत्याख्यास्यतीति तं प्रथममभि प्रहिणोति विश्वे देवा अभि मामाववृत्रन्पूषा सन्या सोमो राधसा देवः सविता वसोर्वसुदावेत्याहरन्तं दृष्ट्वा जपति नानाहरन्तꣳ रास्वेयत्सोमा भूयो भर मा पृणन्पूर्त्या विराधि माहमायुषेति। स यथारूपं प्रतिगृह्णाति ॥७॥

चन्द्रमसीति हिरण्यं। वस्त्रमसीति वास। उस्रासीति गाꣳ। हयोऽसीत्यश्वं। छागोऽसीति छागं। मेषोऽसीति मेषमथ यद्ब्राह्मणेनानादिष्टं भवति प्राजापत्यमसि मम भोगाय भवेत्येव तत्प्रतिगृह्णाति। ताः समुदायुत्य[1] रक्षन्ति। तासां या नश्यति वा म्रियते

---

[1] Thus BTJ; समुदायिकृत्य H; समुदायैकृत्य F.

वा वायवे त्वेति तामनुदिशति । याप्सु वा पाशे वा वरुणाय त्वेति तां । या सं वा शीर्यते गर्तं वा पतति निर्ऋत्यै त्वेति तां । यामहिर्वा व्याघ्रो वा हन्ति रुद्राय त्वेति तां । तासां तिस्रः पराच्यो । ऽथ येयं नष्टा यदि विन्देयुः कथꣳ स्यादित्येतदनुदिष्टैव[1] स्यादित्येतदेकं । कमस्या[2] अतः[2] श्रेयाꣳसं[2] प्रतिग्रहीतारं लभेत । दक्षिणाभिरेवैनाꣳ[3] सह दद्यादित्येकं । वायव्ययैवैनया[4] यजेतेत्येतदपरम्[4] । ॥ ८ ॥ द्वितीयः ॥

अथातः प्रयाणस्यैव मीमाꣳसा । दीक्षितं वायोगक्षेमो विन्दत्यन्यत्र वा देवयजनाद्दीक्षते सꣳसृजन्ति व्रते । संबध्नन्ति व्रतदुघयोर्वत्सावादधति[5] यदाधेयं भवति नीडे गार्हपत्यं प्रउग आहवनीयमपि वारण्योरग्नीन्समारोह्य बृहस्पतिवत्यर्चा प्रयाति भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्वित्यथ यद्येनं यान्तं व्रतवेलोपाधिगच्छत्युत्तरतो ऽरणी निधाय दक्षिणतः परिश्रित्य व्रतयति । तूष्णीं तृणोदकायावस्यत्यथ यद्यपर्याणा[6] अप उपाधिगच्छति तज्जपति देवीरापो अपां

---

[1] Thus BF (J om. this passage); अनूद्दिष्टैव T; अनुद्दिष्टेव H.

[2] Thus T; कमस्यातश्रे॰ BJ; क्रमस्याः ताः श्रे॰ F; कमास्याः श्रे॰ H.

[3] एव om. HTF.

[4] Thus JF (but ॰नयायजेते॰) H (but ॰वैनयजे॰); B: वायव्ययैवैनयजयेत्ये॰; T: वायव्यैय्यैवेनयायजतेत्ये॰ ।

[5] Thus only T and Bh.; ॰दधाति the other MSS.

[6] Thus all the MSS. and Keś., also the citation in the Dvaidha-sūtra. I did not venture to correct अपरियाणा, as only the Vivaraṇa reads.

नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं वो मावक्रमिषमच्छिन्नं तन्तुं पृथिव्या अनु गेषमिति। सं वा गाहते सं वा तरति। सेतुमेव कृत्वात्येतीति ब्राह्मणमथ यत्र वत्स्यन्भवति तदवस्यत्ययेमवस्य वर आ पृथिव्या इत्यथादित्यमुद्यन्तमुपतिष्ठत आरे शत्रून्कृणुहि सर्ववीर इत्यथ यत्र यक्ष्यमाणो भवति तदवस्यत्येदमगन्म देवयजनं पृथिव्या इत्यान्तादनुवाकस्य। ॥ ९ ॥

अथातः क्रयस्यैवोपवसथः[1] पर्याप्लवते। स उपकल्पयते वत्सं च छागां च कृष्णवलक्ष्यावूर्णास्तुके[2] उष्णीषं द्वे वाससी द्वे कृष्णाजिने सोमक्रयणीꣳ सैषारुणा पिङ्गाक्ष्येकहायनी भवति सोमवाहनावनड्वाहौ सोमवाहनमनः प्रक्षालितमुद्धृतफलकꣳ रोहितं चर्मानडुहं इध्ममिध्माबर्हिः कार्ष्मर्यमयान्परिधीनाश्ववालं प्रस्तरमैक्षवी विधृती स्थालीं पद्धरणीमꣳशुग्रहणꣳ हिरण्यमौदुम्बरीꣳ राजासन्दीं तस्यै नाभिदघ्नाः पादा भवन्त्यरत्निमात्राणि शीर्षाण्यनूच्यानि[3]। सा मौञ्जीभी रज्जुभिर्व्यूता भवत्येकसराभिर्मनाग्वर्षीयसीमिव सम्राडासन्दीं यदि प्रवर्ग्यवान्सोमो भवत्यथाध्वर्युरपरराच आद्रुत्य सꣳशास्ति त्रिस्तनव्रतं

---

[1] एव om T.

[2] This seems to be also the reading of Bh. and Keś., presented here and infra VI 14 init. by all the MSS, also P, except F, which reads both times, and T which reads once: कृष्णवलक्ष्या ऊर्णास्तुके।

[3] Thus all, also P Bh. and Keś.; only B has: शीर्षण्यानूच्यानि; comp. Baudh. X. 12.

दोहयतेति ' प्रातरुदित आदित्ये विसृष्टायां वाच्यग्रेण शालां तिष्ठन्देवयजनमध्यवस्यति यदि पुरस्तादनध्यवसितं भवत्यथाहेहि यजमानेति ' पूर्वया द्वारा शालां प्रपाद्य पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयादित्यं चरुं प्रायणीयामिष्टिं निर्वपति ' हविष्कृता वाचं विसृज्य गार्हपत्य आज्यं विलाप्योत्पूयाहवनीये स्रुवाहुतिं जुहोति कविर्यज्ञस्य वितनोति पन्थां नाकस्य पृष्ठे अधि रोचने दिवः। येन हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनीयान्स्वाहेत्यथोपनिष्क्रम्य संप्रैषमाह सोमविक्रयिन्सोमꣳ शोधयोपरवाणां काले रोहिते चर्मण्यानडुहे ऽपामन्ते ब्राह्मणो दक्षिणत आस्तां ता गावो दूरं मा गुर्यासु सोमक्रयणी च सोमवाहनौ चानड्वाहौ[1] सोमवाहनमनः प्रक्षालयतोद्धृतफलकमिति ' यथासंप्रैषं ते कुर्वन्त्यथैतेनैव यथेतमेत्याथैतं चरुꣳ श्रपयित्वाभिघार्योदञ्चमुद्वास्य षड्ढोत्रा प्रायणीयमासादयति ' समानं कर्म प्रयाजेभ्यः ' पञ्च प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य सꣳस्रावेण पञ्चकृत्वो ध्रुवामभिघार्य चरुमभिघारयत्युपभृतमन्ततो ' ऽथ चतुर आज्यस्य गृह्णान आह ॥ १० ॥

पथ्यायै स्वस्तय इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह पथ्याꣳ स्वस्तिमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते पूर्वार्धे जुहोत्यथ चतुर एवाज्यस्य गृह्णान आहाग्नय इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याहाग्निमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते दक्षिणार्धे जुहो-

---

[1] च only read in HB; the Viv. and Keś. do not cite the sampraiṣa to the end.

त्यथ चतुर एवाज्यस्य गृह्णान आह सोमायेत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह सोममित्युपाꣳशु यजेत्युच्चैर्वषट्कृतेऽपरार्धे जुहोत्यथ चतुर एवाज्यस्य गृह्णान आह सवित्र इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह सवितारमित्युपाꣳशु यजेत्युच्चैर्वषट्कृत उत्तरार्धे जुहोत्यथोपस्तीर्य पूर्वार्धाच्चरोरवद्यन्नाहादित्या इत्युपाꣳश्वनुब्रूहीत्युच्चैः पूर्वार्धादवदायापरार्धादवद्यत्यभिघारयति प्रत्यनक्त्यत्याक्रम्याश्राव्याहादितिमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते मध्ये जुहोत्यथ वै भवत्यदितिमिष्ट्वा मारुतीमृचमन्वाह मरुतो यद्ध वो दिव इत्यथोपस्तीर्योत्तरार्धाच्चरोरवद्यन्नाहाग्नये स्विष्टकृतेऽनुब्रूहीत्यथ वै भवत्यष्टावत्तः स्विष्टकृद्द्वादशावत्तेडा द्विरभिघारयति न प्रत्यनक्त्यथैतन्मेक्षणमधोऽधः स्रुचावाग्नीध्रायोत्प्रयच्छन्नाहातिवालयतादेव मानुप्रहार्षीरित्यत्याक्रम्याश्राव्याहाग्निꣳ स्विष्टकृतं यजेति वषट्कृत उत्तरार्धपूर्वार्धेऽतिहाय पूर्वा आहुतीर्जुहोत्यथैतन्मेक्षणमाहवनीयेऽतिवाल्याद्भिरभ्युक्ष्योत्तरतः सादयत्यथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा प्राशित्रमवदायेडामवद्यत्युपहूतायामिडायामग्नीध आदधाति षडवत्तं प्राश्नन्ति मार्जयन्ते ॥ ११ ॥

अथ परिकर्मिणः सꣳशास्त्यनुच्छिष्टीकुर्वन्त एतं चरुं व्युद्धृत्य प्राश्नीतायैतां चरुस्थालीꣳ सचामकाषामेतन्मेक्षणमेतं वेदमेतद्बर्हिश्चतुष्टयमुदयनीयाय निधत्तादिति संयन्तः[1] प्राय-

---

[1] Thus B; सव्वन्तः T (Grantha!); संयुवंतः J; संयुतः H; संदुवता (प्रायणीया) F.

णीयः संतिष्ठते' ऽथैतत्पूर्णपात्रमन्तर्वेदि निनयत्यथैतद्ध्रुवाज्यमाप्याय्य स्रुचि चतुर्गृहीतं गृहीत्वा सूत्रेण हिरण्यं निष्टर्क्यं बद्ध्वा दर्भनाड्यां प्रग्रथ्य स्रुच्यवदधातीयं ते शुक्र तनूरिदं वर्चस्तया संभव भ्राजं गच्छेत्यथैतां दर्भनाडीꣳ स्रुग्दण्ड उपसंगृह्याहवनीये जुहोत्यन्वारब्धे यजमाने जूरसि धृता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यन्त्रमशीय स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाथ याचति स्फ्यमुदपात्रं बर्हिर्हिरण्यमित्येतत्समादायाहेहि यजमानेत्यन्वग्यजमानोऽनूची पत्नी स्थालीं पड्ढुरणीमादाय पूर्वया द्वारोपनिष्क्रम्याग्रेण शालां तिष्ठन्यजमानमाज्यमवेक्षयति शुक्रमस्यमृतमसि वैश्वदेवꣳ हविरित्यथैनꣳ हिरण्यमन्तर्धायादित्यमुदीक्षयति सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीनिकां यदेतशेभिरीयसे भ्राजमानो विपश्चितेत्यथैताꣳ सोमक्रयणीमग्रेण शालामुदीचीमतिविक्षयन्ति' तामनुमन्त्रयते चिदसि मनासीत्यान्तादनुवाकस्याथाह दक्षिणस्येमस्य[1] सप्तमं पदं जोषयध्वमिति' तस्यै षट्पदान्यनुनिष्क्रामति ॥ १२ ॥

वस्व्यसि रुद्रास्यदितिरस्यादित्यासि शुक्रासि चन्द्रासीति' सप्तमं पदमभिगृह्णाति बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिराचिकेत्वित्यथैतस्मिन्पदे हिरण्यं निधाय संपरिस्तीर्याभिजुहोति पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायाः पदे घृतवति स्वाहेत्यपोद्धृत्य हिरण्यꣳ स्फ्येन वा कृष्णविषाणया वा

---

[1] Thus BJH ; दक्षिणेमस्य T ; F corrupt.

पदं परिलिखति परिलिखितꣳ रक्षः परिलिखिता अरातय
इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि यो ऽस्मान्द्वेष्टि यं च वयं
द्विष्म इदमस्य ग्रीवा अपिकृन्तामीत्य।थैनत्स्फ्येनोपसंग्राहं यावन्मूतं पद्धुरण्याꣳ संवपत्यस्मे रायो ऽस्मे राय इति । त्वे राय
इति यजमानाय प्रयच्छति । तोते राय इति यजमानः पत्न्या । ५
अथ पत्नीꣳ सोमक्रयण्या समीक्षयति सं देवि देव्योर्वश्या
पश्यस्वेत्य।थ पत्नी यजमानमीक्षते त्वष्टीमती ते सपेय सुरेता
रेतो दधाना वीरं विदेय तव संदृशीत्य।थ यजमानः सोमक्रयणीमीक्षते माहꣳ रायस्पोषेण वियोषमित्य।थैनद्धिरण्यमद्भिः[1]
प्रक्षाल्य मध्यमायामङ्गुल्यां बध्नीते । ऽथैनं[2] पदाग्रयमद्भिरुपसृजन्त्युत्सृजन्ति[3] सोमक्रयणीं । नयन्ति पत्नीं । नि पदं दधति । १०
॥ १३ ॥ तृतीयः ॥

अथात्रैव तिष्ठन्याचति वत्सं च छागां च कृष्णवलक्ष्यावूर्णास्तुके[4] उष्णीषं द्वे वाससी द्वे कृष्णाजिने सोमक्रयणीमित्य।थ
पृच्छति सोमविक्रयिन्क्रय्यस्ते सोमा३[5] इति । शुद्ध इतीतरः १५

---

[1] Thus (with एनद्ध) all, also Keś.

[2] Thus all, also, a copy of the Nivaraṇa ; Keś : ऽथैतं ।

[3] FH : उपसृज्य (or ज)तिनयंति सोम॰ ; B : उपसृज्यत्युत्सृजंति सोम॰ ; T : उपसृजत्युत्सृजन्तौ सोम॰ ; J : उपसृज्यति सोम॰ ; P : उपसृजत्युत्सृजति ; Keś. has: ऽथैतं पदाग्रयं... उपसृजति । सोमक्रयणीमुत्सृजंति The Somaprayoga I. O. 1262 has : पददेशे ऽपो निनीयतिनयंति (thus !) सोमक्रयणीं । Are we to read : ऽतिनयन्ति instead of उत्सृजन्ति ?

[4] FT ॰वलक्ष्या ऊर्णा॰, the other MSS. also P, क्ष्यावू॰ comp. the note on page 166.

[5] The pluti sign is added in one of the MSS. only (H).

प्रत्याह । सुविचितꣳ[1] राजानं पुरस्ताद्भागाभिरुपतिष्ठत एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतादित्यथैतद्रोहितं चर्मानडुहमुत्तरलोमास्तीर्याथैतद्द्विगुणं[2] वासः प्राचीनदशमुत्तरार्धे चर्मण उपस्तृणात्यथ हिरण्यवता पाणिना राजानमभिमृशत्यꣳशुना ते अꣳशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय रसो अच्युतो ऽमात्यो ऽसि शुक्रस्ते ग्रह इत्यथैनमतिच्छन्दसर्चा मिमीत । एकयैकयोत्सर्गं मिमीते । ऽयातयाम्नियायातयाम्नियैवैनं मिमीते । सर्वास्वङ्गुष्ठमुपनिगृह्णात्यभि त्यं देवꣳ सवितारमूण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभि प्रियं मतिम् । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वरिति । पञ्चकृत्वो यजुषा पञ्चकृत्वस्तूष्णीं । दशकृत्वो मिमानो[3] ऽर्धवेलाꣳ राज्ञो मिमीते । ऽयातिशिष्टꣳ राजानं प्रजाभ्यस्त्वेत्युपसमूहति । समुच्चित्य वसनस्यान्तान्प्रदक्षिणमुष्णीषेणोपनह्यति प्राणाय त्वेति । व्यानाय त्वेत्यनुशृन्थत्यथोपरिष्टादङ्गुल्यावकाशं कृत्वा यजमानमवेक्षयति प्रजास्त्वमनु प्राणिहि प्रजास्त्वामनु प्राणन्त्वित्यथैनं चर्मणि निदधाति । तं ततः कौत्स आदत्ते । ऽद्भिरभ्युक्ष्य

---

[1] Thus HFP (comp. Padārthanirv. p. 270, No 56); the other MSS. सवि॰ ।

[2] The clause त्यथैतद्रोहितं ... मास्तीर्य om. PJTH. Keś. cites them.

[3] विमानो JT.

चर्मोदूहत्यथोपोत्थाय पृच्छति सोमविक्रयिन्क्रय्यस्ते सोमा३[1] इति । क्रय्य इतीतरः प्रत्याह । मूजवता३[1] इति । मूजवतो हीतीतरः प्रत्याहाथैनं गवा पणते गवा ते क्रीणानीति । क्रीतः सोम इत्याह सोमविक्रयी वयाꣳसि व्याचक्ष्वेत्येषा ते सोमक्रयणी चन्द्रं ते छागा ते वस्त्रं त इत्यथैनꣳ हिरण्येन पणते ॥ १४ ॥

सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यवन्तमभिमातिषाहꣳ शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन संयत्ते[2] गोरित्युक्त्वास्मे चन्द्राणीति यजमानाय प्रयच्छत्यथैनं प्रतीचीनग्रीवयाजया पणते तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणामीत्यस्मे ते बन्धुरिति यजमानमीक्षते । मयि ते रायः श्रयन्तामित्यात्मानमथैनां प्रदक्षिणमावर्त्याद्भिरभ्युक्ष्योदीचीमुत्सृजति[3] । सैषा कौत्सस्य भवत्यथ कौत्साद्राजानमादत्ते मित्रो न एहि सुमित्रधा इति । तं यजमानस्योरौ दक्षिण आसादयतीन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳ स्योनः स्योनमित्यथैनं प्रत्यपोर्णुते यजमानो ऽद्भिरभ्युक्ष्य कौत्साय वा परिकर्मिणे वोष्णीषं प्रयच्छत्यथ यजमानꣳ शुक्लयोर्णास्तुकयाध्यस्यत्यस्मे ज्योतिरित्यथैतां कृष्णामुपग्रथ्नातीदमहꣳ सर्पाणां दन्दशूकानां ग्रीवा उपग्रथ्नामीति । तया सोमविक्रयिणं विध्यति सोमविक्रयिणि तम इत्यथ सोमक्रयणाननुदिशति स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते

---

[1] Here again only H and Keś. have the pluti sign.

[2] Some MSS. have संय्यंते, the Mantramālā सम्यत्ते ।

[3] Most of the MSS. have माहृत्य instead of मावर्त्य ।

वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्नित्यˈथैनमादायोपोत्तिष्ठत्युदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳ अन्विति ˈ दक्षिणत एतत्सोमवाहनमनः प्रागीषं योगयुक्तमुपस्थितं भवति ˈ तदभिप्रैत्युर्वन्तरिक्षमन्विहीति ˈ तस्य नीडे कृष्णाजिनमास्तृणात्यदित्याः सदो ऽसीत्यˈदित्याः सद आसीदेति कृष्णाजिने राजानमˈथैनमुपतिष्ठते ऽस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानीत्यˈथैनं वाससा परितनोति वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्नियासु हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्रावित्यˈथोदु त्यं जातवेदसमिति सौर्यर्चा कृष्णाजिनं पुरस्तात्प्रत्यानह्यˈत्यथ सोमवाहनावानीयमानौ प्रतिमन्त्रयत उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनाविति ˈ तयोर्दक्षिणं पूर्वं युनक्ति वरुणस्य स्कम्भनमसीति ˈ वरुणस्य स्कम्भसर्जनमसीति शम्यामवगूहति ˈ प्रत्यस्तो वरुणस्य पाश इति योक्त्रमेतयैवावृतोत्तरमनड्वाहं युनक्त्यˈथ दक्षिणामीषामन्वारभ्य संप्रैषमाह ॥ १५ ॥

सोमाय क्रीताय प्रोह्यमाणायानुब्रूहि सुब्रह्मण्य सुब्रह्मण्यामाह्वय मा तु त्वमाह्वा[1]यजमान आह्वास्यतीति ˈ यदा यजमानस्त्रिरुपांश्वाह्वयते ऽथैष सुब्रह्मण्यो ऽन्तरेणेषे तिष्ठन्पलाशशाखां धारयन्सुब्रह्मण्यामाह्वयति सुब्रह्मण्योꣳ सुब्रह्मण्योमिति त्रिस्त्रिरुक्तायां प्रच्यावयन्ति प्रच्यवस्व भुवस्पते विश्वान्यभि

---

[1] Thus F only; the other MSS. °ह्वायँज° Read °ह्वो यज° (?)।

धामानि मा त्वा परिपरी विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो मा गन्धर्वो विश्वावसुरादघच्छ्येनो भूत्वा परापत यजमानस्य नो गृहे देवैः सꣳस्कृतमिति । प्रदक्षिणꣳ राजानं परिवहन्त्यथैतावक्रमोपसंक्रामतो ऽध्वर्युश्च यजमानश्च यजमानस्य स्वस्त्ययन्यसीपि पन्थामगस्महि स्वस्तिगामनेहसं येन विश्वाः परि द्विषो वृणक्ति विन्दते वस्वित्यथाग्रेण शालां तिष्ठन्नोह्यमानꣳ राजानं प्रतिमन्त्रयते नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसतेत्यथैतत्सोमवाहनमनो ऽग्रेण शालामुदगीषमुपस्थापयन्ति[1] । तदुपस्तभ्नोति वरुणस्य स्कम्भनमसीति । वरुणस्य स्कम्भसर्जनमसीति शम्यामुद्वृहत्युन्मुक्तो वरुणस्य पाश इति योक्त्रमथ वै भवति विमुक्तो ऽन्यो ऽनड्वान्भवत्यविमुक्तो ऽन्यो ऽथातिथ्यं गृह्णाति यज्ञस्य संतत्यै पत्न्यन्वारभत इति ब्राह्मणमथाहेहि यजमानेति । पूर्वया द्वारा शालां प्रपाद्य पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयातिथ्यं निर्वपत्यन्वारब्धायां पत्न्यामथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वा ॥ १६ ॥

अग्नेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामीत्येतामेव प्रतिपदं कृत्वा सोमस्यातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामीत्येतामेव प्रतिपदं कृत्वातिथेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामीत्येतामेव प्रतिपदं कृत्वाग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वा जुष्टं निर्वपामीत्येतामेव प्रतिपदं कृत्वा श्येनाय त्वा

---

[1] Thus J, Kes., Padārthanirv.; the other MSS. ॰पयति।

सोमभृते विष्णवे त्वा जुष्टं निर्वपामीति । पञ्चकृत्वो यजुषा । हविष्कृता वाचं विसृज्यैतयैवावृतोत्तरमनड्वाहं विमुञ्चत्यथैते ब्राह्मणाश्चत्वार आसन्दीमाददते । ऽथ यजमानो नीडाद्राजानमादत्ते या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञमिति । पूर्व एवासन्द्या प्रतिपद्यन्ते । ऽन्वग्राजा यजमानो ऽन्वक्छूद्र[1] उदपात्रेण । पूर्वया द्वारा शालां प्रपादयति गयस्फानः प्रतरणः सुवीरो ऽवीरहा प्रचरा सोम दुर्यानित्यथैतामासन्दीमग्रेणाहवनीयं पर्याहृत्य दक्षिणतो निदधति[2] । तस्यां कृष्णाजिनमास्तृणात्यदित्याः सदो ऽसीत्यदित्याः सद आसीदेति कृष्णाजिने राजानमथैनमुपतिष्ठते वरुणो ऽसि धृतव्रतो वारुणमसीति । समुच्चित्य कृष्णाजिनस्यान्तान्स्पन्द्यया विग्रथ्य वꣳशे प्रग्रथ्नाति शंयोर्देवानाꣳ सख्यादित्यथापरावासन्दीपादावन्तरेण ब्राह्मणो ऽभिषिञ्चति शूद्रः प्रक्षालयति मा देवानामपसश्छित्स्महीत्यथैनं वारुण्यर्चा परिचरति तत्त्वा यामि ब्रह्मणा वन्दमान इत्यथैनꣳ सꣳशास्ति मा राजानं चाहवनीयं चान्तरेण कश्चन संचारीन्मैनꣳ सायुधो मा सदण्डो मा सच्छत्त्रो मा सोष्णीषो मा साधस्याद्यो ऽनुप्रपादीदित्यथास्मै मधुपर्कं च गां च प्राहुस्तामध्वर्युर्विशास्ति । ॥ १७ ॥ चतुर्थः ॥

श्रपयन्त्येतमातिथ्यं वैष्णवं नवकपालं । तेन सह मदन्तीरधिश्रयति । शिल्पवदेतद्विधाबर्हिरातिथ्यस्य भवति । कार्ष्मर्यमयैः

---

[1] कूद्र F ; सुद्र H ; शूद्र PBJ , सूद्र T (Grantha !)

[2] Thus only P, comp. Keśava (ब्राह्मणा एव निदधति); निदधाति the other MSS.

परिधिभिराश्ववालेन प्रस्तरेणैक्षवीभ्यां विधृतीभ्यां तेन शिल्पवत्।त्वचं पुरोडाशस्य ग्राहयित्वा श्रपयित्वाभिवास्य[1] प्राङेत्याप्येभ्यो निनीय स्तम्बयजुर्हरती।दमेव प्रसिद्धं पौरोडाशिकं त्रिर्यजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं जपत्यु।द्धन्त्यु।द्धतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथोत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढ्याज्येनोदेहीत्या।हृतासु प्रोक्षणीषूदस्य स्फ्यं मार्जयित्वेध्माबर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य स्रुवं च स्रुचश्च संमार्ष्ट्याज्येनोदेत्याज्यं[2] च प्रोक्षणीश्चोत्पूय प्रसिद्धं चतुर्गृहीतानि वा पञ्चगृहीतानि वाज्यानि गृहीत्वा प्रोक्षणीभिरुपोत्तिष्ठती।ध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तादाश्ववालं प्रस्तरं गृह्णाति । पञ्चविधं बर्हिः स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य कार्ष्मर्यमयान्परिधीन्परिदधात्यू।र्ध्वे समिधावादधात्यै।क्षवौ विधृती तिरश्ची सादयति । विधृत्योराश्ववालं प्रस्तरं । प्रस्तरे जुहूं । बर्हिषीतरे । एता असदन्निति समभिमृश्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्याथैतं पुरोडाशमुपस्तीर्णाभिघारितमुद्वास्य च तूष्णींचातिथ्यमासादयत्य।थ संभारान्व्याचष्टे । ऽथ निर्मन्थ्यस्यावृता निर्मन्थ्येन चरति । प्रहृत्याभिकृत्याथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूही।त्यभ्यादधाती।ध्मं । न समिधं परिशिनष्टि । वेदेनोपवाजयत्य।नूक्तासु सामिधेनीषु

---

[1] श्रपयित्वा om. HTB; read by PJF.

[2] उदेह्याज्यं BJ; उदेत्याज्यं the other MSS. also P.

स्रुवेणाघारमाघारयति। संमृष्टे स्रुग्भ्यामुत्तरमथासꣳस्पर्शयन्स्रुचावुदङ्ङत्याक्रम्य जुह्वा ध्रुवाꣳ समज्य सादयित्वा स्रुचौ प्रवरं प्रवृणीते। प्रसिद्धꣳ होतारं वृणीते। सीदति होता। प्रसवमाकाङ्क्षति। प्रसूतः स्रुचावादायात्याक्रम्याश्राव्याह समिधो यजेति। वषट्कृते जुहोति यज यजेति। चतुर्थं यच्चान्यच्चैतदौपभृतमाज्यꣳ सर्वश एव जुह्वाꣳ समानयते। पञ्च प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य सꣳस्रावेण ध्रुवामभिघार्य पुरोडाशमभिघारयति नोपभृतमथाग्नये सोमायेत्याज्यभागाभ्यां चरत्युपाꣳशु हविषा चरति विष्णवेऽनुब्रूहि[1] विष्णुं यजेत्यथ स्विष्टकृता चरतीडान्त आतिथ्यः संतिष्ठते। ऽथैतत्पूर्णपात्रमन्तर्वेदि निनयत्यथैतद्ध्रुवाज्यमाप्याय्य कꣳसं वा चमसं वा याचति। तमन्तर्वेदि निधाय तस्मिन्नेतत्तानूनप्त्रं निगृह्णाति ॥ १८ ॥

आपतये त्वा गृह्णामि परिपतये त्वा गृह्णामि तनूनप्त्रे त्वा गृह्णामि शाक्वराय त्वा गृह्णामि शक्मन्नोजिष्ठाय त्वा गृह्णामीति। स यावन्त ऋत्विजस्त एनत्समवमृशन्त्यनाधृष्टमस्यनाधृष्यं देवानामोजो ऽभिशस्तिपा अनभिशस्तेन्यमिति। यजमानमतिवाचयत्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरञ्जसा सत्यमुपगेषꣳ सुविते मा धा इति। स यावन्त ऋत्विजस्तेषूपहवमिष्ट्वा यजमान एव त्रिरवजिघ्रति प्रजापतौ त्वा मनसि जुहोमीत्यथैनदद्भिरभ्युन्नीयोत्तरतः सिञ्चत्यथाहाग्नीन्मदन्त्यापा३[2] इति। मदन्ति देवीरमृता ऋतावृध इति। ताभिराद्रवेत्यथ

---

[1] THF ins. इति।

[2] only H has the pluti sign.

मदन्तीरुपस्पृश्योपोत्थाय विस्रस्य हिरण्यमवधाय राजानमाप्याययन्त्यꣳशुरꣳशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेति। यजमानमतिवाचयत्याप्यायय सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेत्यथाप उपस्पृश्य यथायतनमुपविशन्त्यथाध्वर्युर्वाजवतीभ्याꣳ स्रुचौ व्यूहति। विष्टतीभ्यां प्रस्तरꣳ समुत्सुप्यामतिश्लक्ष्णꣳस्त्रेधा नक्ति। न प्रस्तरायाश्रावयति। न बर्हिरनुप्रहरति। तं दक्षिणार्धे वेद्यै निधाय तस्मिन्दक्षिणोत्तरिणौ निह्नुवत एष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति। परिधिषु शकलानुपसंगृह्णाति प्रस्तरे बर्हिर्यावन्मात्रꣳ स्पन्द्यया विग्रथ्याहवनीये ऽतिवाह्याद्भिरभ्युक्ष्योत्तरतः सादयत्यथ यजमानमवान्तरदीक्षामुपनयत्यग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि या तव तनूरियꣳ सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानीत्यथैनꣳ सꣳशास्ति संतरां मेखलाꣳ समायच्छस्व संतरां मुष्टी कुरुष्व तप्तव्रत एधि मदन्तीभिर्मार्जयस्वोत्पूर्वं[1] व्रतनꣳ सृज या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहेत्येतेनातो ऽधि व्रतयेति। स एवमेवैतत्सर्वं करोति। ॥ १९ ॥

अथ प्रवर्ग्यस्यावृता प्रवर्ग्येण चरत्यथ स्फ्यमाददान आहाग्नीन्मदन्तीरधिश्रय हविरधिश्रयैह्युपसीदेत्यैतास्वेव मदन्तीषु भूयसीरप आनयत्याज्यमधिश्रयति। तद्धविरथैतस्यैव

---

[1] Thus Keś., Mantramālā ; पूर्वंव्रतनं the other MSS. also P.

बर्हिषि स्तीर्णस्य पर्यवलोपꣳ स्तम्बयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं । त्रिर्यजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं जपत्युद्धन्त्युद्धतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथोत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह मदन्तीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचौ च संमृड्ढि हविषोदेहीत्याहृतासु मदन्तीषूदस्य स्फ्यं मार्जयित्वेध्माबर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य स्रुवं च स्रुचौ च संमार्ष्टि । हविषोदेति । हविश्च मदन्तीश्चोत्पूयाष्टौ कृत्वो जुह्वां गृह्णीते । चतुरुपभृत्याज्यस्थाल्यां तृतीयामुत्प्रदाय मदन्तीभिरुपोत्तिष्ठतीध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तादाश्ववालं प्रस्तरं गृह्णात्येकविधं बर्हि स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य काष्मर्यमयान्परिधीन्परिदधात्यूर्ध्वे समिधावादधात्यैक्षवी विधृती तिरश्ची सादयति । विधृत्योराश्ववालं प्रस्तरं । प्रस्तरे जुहूं । बर्हिषीतरे । एते असदतामिति समभिमृश्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य जघनेन गार्हपत्यमुपविश्य देवपत्नीर्व्याचष्टे । ऽथैतेनैव यथेतमेत्याथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूहीत्यभ्यादधातीध्मꣳ सकृद्वा त्रिर्वा । न समिधं परिशिनष्टि । वेदेनोपवाजयत्यनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति । संमृष्टे न स्रुग्भ्यामुत्तरमथ प्रवरं प्रवृणीते । ऽथाश्रावयत्यो श्रावयास्तु श्रौषट् सीद होतरित्येतावान्प्रवरः । सीदति होता । प्रसवमाकाङ्क्षति । प्रसूतः स्रुचावाददान आह ॥ २० ॥

अग्नय इत्युपाꣳश्वनुब्रूहीत्युच्चै।रत्याक्रम्याश्राव्याहाग्निमित्यु-
पाꣳशु यजेत्युच्चैर्वषट्कृते पूर्वार्धे ऽर्धवेलां[1] जुहोत्य।थाचैव तिष्ठन्नाह
सोमायेत्युपाꣳश्वनुब्रूहीत्युच्चैराश्राव्याह सोममित्युपाꣳशु यजे-
त्युच्चैर्वषट्कृते मध्ये जुहोत्य।थ समानयमान[2] आह विष्णव
इत्युपाꣳश्वनुब्रूहीत्युच्चैराश्राव्याह विष्णुमित्युपाꣳशु यजेत्युच्चै। ५
र्वषट्कृते पश्चात्सर्वं जुहोत्य।थोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ
सादयित्वाथाहाग्नीन्मदन्त्यापा३ इति। मदन्ति देवीरमृता
ऋतावृध इति। ताभिराद्रवेत्य।थ मदन्तीरुपस्पृश्योपोत्थाय
विस्रस्य हिरण्यमवधाय राजानमाप्याययन्त्यꣳशुरꣳशुस्ते देव
सोमाप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा १०
त्वमिन्द्राय प्यायस्वेति। यजमानमतिवाचयत्याप्यायय सखीन्सन्या
मेधया स्वस्ति ते देव सोम सुत्यामशीयेत्य।थाप उपस्पृश्य यथा-
यतनमुपविशन्त्य।थाध्वर्युर्वाजवतीभ्याꣳ स्रुचौ व्यूहति। विधृतीभ्यां
प्रस्तरꣳ समुष्टुप्याप्रतिशृष्टाꣳस्त्रेधानक्ति। न प्रस्तरायाश्रावयति।
न बर्हिरनुप्रहरति। तं दक्षिणार्धे वेद्यै निधाय तस्मिन्दक्षिणो- १५
त्तरिणो निह्नुवत एष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो
दिवे नमः पृथिव्या इति। सव्ये पाणौ प्रस्तरꣳ समावृत्याज्य-
स्थाल्याः स्रुवेणोपहत्य प्रथमामुपसदं जुहोति या ते अग्ने
ऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो
अपावधीꣳ स्वाहेति। परिधिषु शकलानुपसंगृह्णाति प्रस्तरे २०

---

[1] Thus HTF; ॰र्धवेलायां BJ.

[2] Thus J only; समावपमान HF; समावयमान B Keś.; समायमान T.

बर्हिर्यावन्मात्रꣳ स्पन्द्यया विग्रथ्याहवनीये ऽतिवाप्याद्भिरभ्युक्ष्योत्तरतः सादयत्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय त्रिस्तनव्रतं[1] प्रयच्छतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यां । त्रिस्तनव्रतं प्रयच्छत्यथापराह्ण अपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति । तयोः समानी चर्यैतावदेव नाना । सव्योत्तरिणौ निह्नुवते । ऽथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय त्रिस्तनव्रतं दोहयतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यां । त्रिस्तनव्रतं दोहयति । तदर्धरात्रे प्रयच्छति । ॥ २१ ॥ पञ्चमः ॥

अथाध्वर्युरपररात्र आहुत्य सꣳशास्ति द्विस्तनव्रतं दोहयतेति[2] । प्रातरुदित आदित्ये विसृष्टायां वाचि मध्यमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति । रजाशयामच्च जुहोत्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय द्विस्तनव्रतं प्रयच्छतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यां । द्विस्तनव्रतं प्रयच्छति । स आहवनीयादेवाग्रे षट् प्राचः प्रक्रमान्प्रक्रामति । तच्छङ्कुं निहन्ति । स शालामुखीयः शङ्कुः । शालामुखीयाच्छङ्कोः षट्त्रिꣳशत्प्राचः प्रक्रमान्प्रक्रामति । तच्छङ्कुं निहन्ति । स यूपावटीयः शङ्कुः । शालामुखीयाच्छङ्कोः पञ्चदश दक्षिणा प्रक्रमान्प्रक्रामति पञ्चदशोदीचस्तच्छङ्कू निहन्ति । ते श्रोणी । यूपावटीयाच्छङ्कोर्द्वादश दक्षिणा प्रक्रमान्प्रक्रामति द्वादशोदीचस्तच्छङ्कू निहन्ति ।

---

[1] Here and elsewhere F and the Mantramālā write त्रिस्तनं व्रतं, द्विस्तनं व्रतं etc.; all the other MSS. and Keś. write *one* word.

[2] T ins. अथ ।

अग्नय इत्युपाꣳश्वनुब्रूहीत्युच्चैर्।त्याक्रम्याश्राव्याहाग्निमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते पूर्वार्धे ऽर्धवेलां[1] जुहोत्य।थात्रैव तिष्ठन्नाह सोमायेत्युपाꣳश्वनुब्रूहीत्युच्चै।राश्राव्याह सोममित्युपाꣳशु यजेत्युच्चै।र्वषट्कृते मध्ये जुहोत्य।थ समानयमान[2] आह विष्णव इत्युपाꣳश्वनुब्रूहीत्युच्चै।राश्राव्याह विष्णुमित्युपाꣳशु यजेत्युच्चै।र्वषट्कृते पश्चात्सर्वं जुहोत्य।थोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वाथाहाग्नीन्मदन्त्यापा३ इति। मदन्ति देवीरमृता ऋतावृध इति। ताभिराद्रवेत्य।थ मदन्तीरुपस्पृश्योपोत्थाय विस्रस्य हिरण्यमवधाय राजानमाप्याययन्त्यꣳशुरꣳशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेति। यजमानमतिवाचयत्याप्यायय सखीन्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेत्य।थाप उपस्पृश्य यथायतनमुपविशन्त्य।थाध्वर्युर्वाजवतीभ्याꣳ स्रुचौ व्यूहति। विधृतीभ्यां प्रस्तरꣳ समुत्सुप्याप्रतिशृष्टपाꣳस्त्रेधानक्ति। न प्रस्तरायाश्रावयति। न बर्हिरनुप्रहरति। तं दक्षिणार्धे वेद्यै निधाय तस्मिन्दक्षिणोत्तरिणो निह्नुवत एष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति। सव्ये पाणौ प्रस्तरꣳ समावृत्याज्यस्थाल्याः स्रुवेणोपहत्य प्रथमामुपसदं जुहोति या ते अग्ने ऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीꣳ स्वाहेति। परिधिषु शकलानुपसंगृह्णाति प्रस्तरे

---

[1] Thus HTF; °र्धवेलायां BJ.

[2] Thus J only; समावपमान HF; समावयमान B Keś.; समायमान T.

बर्हिर्यावन्मात्रꣳ सान्वया विग्रथ्याहवनीये ऽतिवाह्याङ्गिरभ्युह्योत्तरतः सादयत्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय चिस्तनव्रतं[1] प्रयच्छतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यां। चिस्तनव्रतं प्रयच्छत्यथापराह्ण अपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति। तयोः समानौ चर्यैतावदेव नाना। सव्योत्तरिणौ निह्नुवते। ऽथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय चिस्तनव्रतं दोहयतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यां। चिस्तनव्रतं दोहयति। तदर्धरात्रे प्रयच्छति। ॥ २१ ॥ पञ्चमः ॥

अथाध्वर्युरपररात्र आहुत्य सꣳशास्ति द्विस्तनव्रतं दोहयतेति[2]। प्रातरुदित आदित्ये विसृष्टायां वाचि मध्यमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति। रजाश्रयामत्र जुहोत्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय द्विस्तनव्रतं प्रयच्छतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यां। द्विस्तनव्रतं प्रयच्छति। स आहवनीयादेवाग्रे षट् प्राचः प्रक्रमान्प्रक्रामति। तच्छङ्कुं निहन्ति। स शालामुखीयः शङ्कुः। शालामुखीयाच्छङ्कोः षट्त्रिꣳशत्प्राचः प्रक्रमान्प्रक्रामति। तच्छङ्कुं निहन्ति। स यूपावटीयः शङ्कुः। शालामुखीयाच्छङ्कोः पञ्चदश दक्षिणा प्रक्रमान्प्रक्रामति पञ्चदशोदीचस्तच्छङ्कू निहन्ति। ते श्रोणी। यूपावटीयाच्छङ्कोर्द्वादश दक्षिणा प्रक्रमान्प्रक्रामति द्वादशोदीचस्तच्छङ्कू निहन्ति।

---

[1] Here and elsewhere F and the Mantramālā write चिस्तनं व्रतं, द्विस्तनं व्रतं etc.; all the other MSS. and Keś. write *one* word.

[2] T ins. अथ।

तावꣳसाव।थैनामक्ष्णया मानेन प्रमाय समन्तꣳ स्पन्द्यया परितनोति। पृष्ठ्यामातनोति। यूपावटीयाच्छङ्कोरनुस्पन्द्यं द्वादश प्रत्यञ्चि क्षुद्रपदानि प्रक्रामति। तच्छङ्कुं निहन्ति। स मध्यम औत्तरवेदिकः शङ्कु।र्मध्यमादौत्तरवेदिकाच्छङ्कोः पञ्च दक्षिणा क्षुद्रपदानि प्रक्रामति पञ्चोदञ्चि। तच्छङ्कू निहन्ति। ते श्रोणी। यूपावटीयाच्छङ्कोश्चत्वारि दक्षिणा क्षुद्रपदानि प्रक्रामति चत्वार्युदञ्चि। तच्छङ्कू निहन्ति। तावꣳसाव।थैनामक्ष्णया मानेन प्रमाय समन्तꣳ स्पन्द्यया परितनोति। पृष्ठ्यामातनोति[1]। मध्यमादौत्तरवेदिकाच्छङ्कोरनुस्पन्द्यꣳ षट् प्रतीचः प्रक्रमान्प्रक्रामति दक्षिणा सप्तमं। तत्स्फ्यं निदधाति। स उपरवाणां कालो। ऽथ महावेद्या उत्तरादꣳसीयाच्छङ्कोर्वेद्यन्तेन द्वादश प्रतीचः प्रक्रमान्प्रक्रामत्युदञ्चं त्रयोदशं। तदाग्नीध्र उपसीदति। स उत्करस्य कालो। ऽथोपरवाणां कालात्स्तम्बयजुर्हरति। ॥ २२ ॥

इदमेव प्रसिद्धं पौरोडाशिकं। त्रिर्यजुषा तूष्णीं चतुर्थं। पूर्वं परिग्राहं परिगृह्णाति। करणं जपतीमां नराः कृणुत वेदिमेत्य वसुमतीꣳ रुद्रवतीमादित्यवतीं विश्वदेव्यावतीं वर्ष्मन्दिवो नाभा पृथिव्या यथायं यजमानो न रिष्येदि।त्युद्धन्त्यु।द्धतादाग्नीध्रस्त्रिर्हरति। यदाग्नीध्रस्त्रिर्हरत्यथाग्रेण शालां तिष्ठन्संप्रैषमाह वेदिकारा वेदिं कल्पयत प्र स्थलानि भिन्दत प्रति निम्नान्पूरयत किꣳशारूणि निरस्यत प्राचीमुदीचीं प्रवणां निस्तिष्ठतेति। यथासंप्रैषं ते कुर्वन्त्य।थ महावेद्या उत्तरादꣳसीयाच्छङ्कोर्वेद्यन्तेन

---

[1] BJT om. these two words.

स्रौग्प्रतीचः प्रक्रमान्प्रक्रामत्युदञ्चं चतुर्थं । तच्चात्वालस्यावृता चात्वालं परिलिखत्युत्तरवेदेरावृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्साद्याथैनां प्रतिच्छाद्यापराह्णिकीभ्यां[1] प्रवर्ग्योपसद्भ्यां प्रचरत्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय द्विस्तनव्रतं दोहयतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यां । द्विस्तनव्रतं दोहयति । तदर्धरात्रे प्रयच्छति । ॥ २३ ॥ षष्ठः ॥

अथाध्वर्युरपररात्र आद्रुत्य सꣳप्रास्यैकस्तनव्रतं दोहयतेति । प्रातरुदित आदित्ये विसृष्टायां वाच्युत्तमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति । हराग्रयामत्र जुहोत्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वयार्धस्तनव्रतं प्रयच्छतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यामर्धस्तनव्रतं प्रयच्छत्यथ तदानीमेवापराह्णिकौ[2] प्रवर्ग्योपसदौ समस्योपनिष्क्रम्य[3] संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय प्रतिप्रस्थातः प्रवर्ग्यस्यावृता प्रवर्ग्यꣳ सꣳसादयोद्वासनायेति । त्रेधैतत्पदं कुर्वन्ति । गार्हपत्ये तृतीयमुपयमनीषु तृतीयं नि तृतीयं दधत्यथ प्रवर्ग्यस्यावृता प्रवर्ग्यमुद्वासयत्यग्नेरावृताग्निं प्रणयत्यग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादयेत्येतावान्संप्रैषो । ऽत्रैवैतद्बर्हिरनुस्पन्द्यꣳ स्तृणाति सकृदेवै तदेवेध्माबर्हिरग्नीषोमीयाय पशवे परिग्रयीतेत्येक आहुरथास्यैते अनसी प्रचालिते प्रपन्ने

---

[1] After ०च्छाद्य B ins. अपराह्ण।

[2] ०पराह्णिके BH Keś.

[3] Thus JF, Bh., Keś. ; समस्यत्यथोप० the other MSS.

घोगयच्छते अभितः शालां तिष्ठतस्तयोर्दक्षिणं वर्षीय उत्तरꣳ ह्रसीय। उद्धूतफलकं दक्षिणमनुद्धूतफलकमुत्तरं। तयोर्यदक्षे बद्धं तदवस्यत्यथैने अन्तर्वेद्यभ्यावर्तयन्त्यथाग्रेण[1] शालामरत्निमात्रमभित स्पन्द्याꣳ स्थापयित्वाथैने प्रोक्षति वैष्णवी विष्णवे शुन्धेथामित्यथाहैहि यजमानेति। पूर्वया द्वारा शालां प्रपाद्य गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा शालामुखीये सावित्रं जुहोत्यन्वारब्धे यजमाने युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाथ याचत्याज्यस्थालीꣳ सस्रुवाꣳ स्फ्यमुदपात्रं बर्हिर्हिरण्यमित्येतत्समादायाहैहि यजमानेत्यन्वग्यजमानो ऽनूची पत्नी पदलतीयमादाय पूर्वया द्वारोपनिष्क्रम्य दक्षिणस्य हविर्धानस्य पश्चादक्षमुपस्पृश्य दक्षिणस्यां वर्तन्याꣳ स्फ्येनोद्धत्यावोक्ष्य हिरण्यं निधाय संपरिस्तीर्याभिजुहोतीदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳसुरे स्वाहेत्यथैतेषां पदपाꣳसूनामर्धान्पत्न्यञ्जलावावपत्यथैनान्स्रुꣳस्रावेणाभिघारयति। सा प्राचोत्तानेन पाणिना दक्षिणमक्षधुरमुपानक्त्या नो वीरो जायतां कर्मण्यो यꣳ सर्वे ऽनुजीवाम यो बहूनामसद्वशीत्यपरं चतुर्गृहीतं गृहीत्वोत्तरस्य हविर्धानस्य पश्चादक्षमुपस्पृश्योत्तरस्यां वर्तन्याꣳ स्फ्येनोद्धत्यावोक्ष्य हिरण्यं निधाय

---

[1] Thus TF; comp. xv. 22 (व्यावर्त॰); the other MSS. चाभ्यवर्तयंति।

संपरिस्तीर्याभिजुहोतीरावती[1] धेनुमती हि भूतꣳ सूयवसिनी मनवे यशस्ये । व्यस्कभ्नाद्रोदसी विष्णुरेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहेत्यथैतान्यदपाꣳसून्त्सर्वांश एव पत्न्यञ्जलावावपत्यथैनान्त्सꣳस्रावेणाभिघारयति । सा प्राचोत्तानेनैव पाणिनोत्तरमक्षधुरमुपानक्ति । समान उपाञ्जनो । ऽथैतानि शस्त्राणि प्रतिप्रस्थात्र उत्प्रयच्छति । नयन्ति पत्नीꣳ ह्वयन्ति होतारमथैने संपरिगृह्य संप्रेषमाह ॥ २४ ॥

हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीति । त्रिरुक्तायां प्रवर्तयन्ति प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जीह्वरतमित्यथ यत्र च उत्सर्जंति सुवाग्देव दुर्याꣳ आवदेत्येव तत्र जपत्यथैतावक्षमोपसंक्रामतोऽध्वर्युश्च प्रतिप्रस्थाता चोत्तरेण हविर्धाने परीत्य पूर्वावुपातीत्य[2] मध्यमादौत्तरवेदिकाच्छङ्कोरनुस्पन्द्यं द्वौ प्रतीचः प्रक्रमान्प्रक्रामतस्तदेनयोर्नभ्यस्थयोस्तुवुके रमयतोऽत्र रमेथां वर्ष्मन्पृथिव्या इत्यथ दिवो वा विष्णवुत वा पृथिव्या इत्याशीर्पदयर्चाध्वर्युर्दक्षिणस्य[3] हविर्धानस्य दक्षिणतो मेथीं निहन्त्यथैनाꣳ स्पन्द्यया सूपनिबद्धामुपनिबध्नाति विष्णोर्नु कं वीर्याणि प्रवोचमित्येवमेव प्रतिप्रस्थातोत्तरस्य

---

[1] Thus BTJ; ०स्तीर्यैवाभि० H; ०स्तीर्यावाभि० F.

[2] Thus BH; पूर्वानु० JF; T corrupt.

[3] Thus B; त्याशीपदय० HF; त्याशीर्वदय० J; त्याशिषंदय० T (Grantha!); त्याशीर्पदयर्चा also Hir. VII. 17, comp. Garbe in his ed. of Apast., Vol. II, p. 311.

हविर्धानस्योत्तरतो मेथीं निहन्त्यथैनाꣳ स्यन्द्यया सूपनिबद्धा-
मुपनिबध्नात्येतेनैव मन्त्रेणाथाध्वर्युर्दक्षिणस्य[1] हविर्धानस्य चुबु-
कात्प्राञ्चमरत्निं मीत्वा लोके[2] न्यस्य गर्तं खानयत्यथ दक्षिणा-
द्युगान्तात्प्राञ्चं बाहुं मीत्वा लोके[2] न्यस्य गर्तं खानयति ।
तावुभावुत्तरेणान्यं गर्तं खानयत्येवमेव प्रतिप्रस्थातोत्तरत- ५
स्त्रीन्गर्तान्खानयत्येवमपरतस्तेषु प्राचीनकर्णा स्थूणा उच्छ्रयन्ति ।
तासूदञ्चौ वꣳशौ प्रोहन्त्यध्यस्यन्ति पुरस्ताद्रराटीं विष्णो ररा-
टमसीति । विष्णोः पृष्ठमसीति मध्यमं छदिरधिनिदधाति ।
विष्णो श्नप्त्रे[3] स्थ इति ये अभितो भवतो । दक्षिणतश्चोत्तर-
तश्च परिश्रयन्ति । प्राचीं च प्रतीचीं च द्वारौ कुर्वन्त्यथ १०
दक्षिणे द्वार्बाहौ कुशहस्तमुपनिगृह्य दर्भणं प्रवयति दर्भणे
स्यन्द्यां विष्णोः स्यूरसीति । विष्णोर्ध्रुवमसीति ग्रन्थिं[4] करोति[4] ।
तं तदानीमेव विस्रस्याहाकुर्वन्तो ग्रन्थीन्हस्तकौशलैर्निस्तिष्ठतेत्येव-
मेवोत्तरं द्वार्बाहुमेवमपरे[5] द्वार्बाहू निस्तिष्ठत्यथैनदभिमृशति[6]
वैष्णवमसि विष्णवे त्वेत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य १५

---

[1] अध्वर्युर् om. JHF.

[2] Thus all.

[3] Thus BHF, Keś. (pr m.); श्नप्त्रे T, Prayogamālā; the visarga of विष्णोः is omitted by all the MSS. exc. H.

[4] ग्रंथीकरोति B.

[5] अपरे BTHJP; अपरौ F.

[6] Thus (॰ष्ठत्य॰ or ॰ष्ठंत्य॰) all, except B, which has निस्तिष्ठतो (comp. Keś. : कुर्वतः) — अथैनद॰ HF; अथैनम॰ BTJP (Bh., Keś. : अथैतद्धविर्धानमभिमृशति) ।

शालामुखीयाच्छङ्कोरनुस्पन्द्यꣳ षट् प्राचः प्रक्रमान्प्रक्रामति दक्षिणा सप्तमं । तदभ्रिं निदधाति । स औदुम्बर्यै काल । औदुम्बर्यै कालादभ्रिमादत्ते ॥ २५ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्यादायाभिमन्त्रयतेऽभ्रिरसि नारिरसीति । तयौदुम्बर्या अवटं[1] परिलिखति परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामीत्यथोद्गातारमाहोद्गातरेहीममौदुम्बर्या अवटं[2] खन प्राक् पुरीषमुद्वपतादिति । तꣳ स खनति वा खानयति वा । सोऽत एव सदो विमिमीते । यथा त्रीणि छदींꣳषि तिर्यञ्च्येवं प्रक्ग्रो । यथा त्रीणि छदीꣳष्यन्वञ्च्येवमुदक्ग्रो । ऽपि वा यथा द्वौ भागावुदक् सन्धायै स्यातामेको दक्षिणत इति । तस्य त्रिश्रेणिगर्तान्खानयति[3] । सोऽत एव प्राङ् द्रुत्वा[4] दक्षिणस्य हविर्धानस्य पुरोऽक्षमुपरवान्विमिमीते प्रादेशमुखान्प्रादेशान्तरालानथोन्नेतारमाहोन्नेतरेहीमानुपरवा-

---

[1] Thus only B; all the other MSS., here and infra, l. 9, औदुम्बर्यवटं, the second time also the Mantramālā.

[2] Comp. note १.

[3] Uncertain reading. त्रिश्रेणी° B; चौक्षेणि° H; चौणीश्रेणि° T; चौणि° JF; त्रिश्रेणि° P; comp. Padārthanirv. p. 310 (No. 174.). Keśavasvāmin glosses: तस्य सदसः गर्तपङ्क्तीस्तिस्रः खानयति । Read: चौक्ष्रेणि° ?

[4] BH ins. अध्वर्युः; Keś. has not read the word, as he glosses: सोऽध्वर्युः सदसः प्राम्मता etc.

न्खन प्रादेशमुखान्प्रादेशान्तरालान्बाहुमात्रानवाचो ऽसंभिन्दन्नुपरिष्टादधस्तात्संतृण्णानिति । तान्स खनति वा खानयति वाथैषां पुरीषं दक्षिणस्य हविर्धानस्याग्रेणोपस्तम्भनं निवपति । तं चतुरश्रं खरं करोत्यथैनꣳ सिकताभिराभ्राभिन्नं करोत्यथोपरवाणां काष्ठादभ्रिमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां ५
पूष्णो हस्ताभ्यामाददे इत्यादायाभिमन्त्रयते ऽभ्रिरसि नारिरसीति । तया यूपावटं परिलिखति यथान्तर्वेद्यर्धꣳ स्याद्बहिर्वेद्यर्धं परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामीत्यथाग्नीध्रमाहाग्नीद्देहीमं यूपावटं खनोपर- १०
संमितं प्राक्पुरीषमुद्वपताच्चतुरङ्गुलेनोपरमतिखनतादिति । तꣳ स खनति वा खानयति वा । यावदेवात्राध्वर्युस्तिष्ठति तावदेष प्रतिप्रस्थातौदुम्बरीꣳ स्थूणां यजमानेन संमायाधस्तात्परिवासयत्यच्छिन्नो रायः सुवीर इत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य याचति यवमतीः प्रोक्षणीर्बर्हिर्हस्तमाज्यस्थालीꣳ स्रुवं १५
मैत्रावरुणदण्डꣳ हिरण्यमुदपात्रमित्येतत्समादायाहेहि यजमानेत्यौदुम्बर्येषा स्थूणा प्रचालिता प्रपन्ना प्रागवटादुपशेते । तां परस्तादर्वाचीं[1] प्रोक्षति ॥ २६ ॥

दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेत्यवटे ऽपो ऽवनयति शुन्धतां लोकः पितृषदन इति । यवान्प्रस्कन्दयति यवो ऽसि १०
यवयास्मद्द्वेषो यवयारातीरिति । बर्हिर्हस्तं व्यतिषज्यावस्तृणाति

---

[1] Thus only Keś , T तामपरस्तात् (Grantha !); the other MSS. पुरस्तात्।

पितॄणाꣳ सदनमसीत्यथैनद्धिरण्यमन्तर्धाय[1] स्रुवाहुत्याभिजुहोति पितृभ्यः स्वाहेत्यथैनामुच्छ्रयत्युद्दिवꣳ स्तभानान्तरिक्षं पृण पृथिवीं दृꣳहेत्यथैनां प्राचीनकर्णां मिनोति द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणयोर्ध्रुवेण धर्मणेत्यथैनां प्रदक्षिणं पुरीषेण पर्यूहति ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिꣳ रायस्पोषवनिं पर्यूहामीति । मैत्रावरुणदण्डेन सꣳहन्ति ब्रह्म दृꣳह क्षत्रꣳ दृꣳह प्रजां दृꣳह रायस्पोषं दृꣳहेत्यन्यूनमनतिरिक्तं परिन्यस्योदपात्रमुपनिनीयाथास्यै विशाखे हिरण्यं निधाय स्रुवाहुत्याभिजुहोति घृतेन द्यावापृथिवी आपृणेथाꣳ स्वाहेत्यान्तमन्ववस्रावयत्यान्तमेव यजमानं तेजसानक्तीति ब्राह्मणमथैनामुद्गातृभ्यः प्राहुस्तस्यां तच्चेष्टन्ति यत्ते विदुरेतस्या उच्छ्रयणमनु प्राचीनकर्णा स्थूणा उच्छ्रयन्ति । तासूदीचो वꣳशान्प्रोहन्त्यध्यस्यन्ति मध्यमं छदिरिन्द्रस्य सदोऽसीति । विश्वजनस्य छायेति ये अभितो भवतो । नवच्छदि तेजस्कामस्य मिनुयादिति । त्रीणित्रीण्येव सर्वाणि भवन्ति[2] । दक्षिणान्युत्तराणि करोति । स दक्षिणानि[3] दक्षिणान्येवोत्तराणि करोत्यन्तर्वर्तान्करोति व्यावृत्त्या इति । सन्धिषु तृणवर्तान्प्रत्यस्यति[4] । ते ऽन्तर्वर्ता । अथैनत्परिश्रयन्ति परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतो

---

[1] °थैन° all, also Keś, except B, which has °थैत°, but comp. page 170,11.

[2] Thus BT; करोति the other MSS. also P.

[3] Thus BHJP; दक्षिणा TF.

[4] तृणवर्तान् or °वर्त्तान् BJTH; तर्णवर्त्तान् FP.

वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टय इति । दक्षिणतश्चोत्तरतश्च परिश्रयन्ति । प्राचीं च प्रतीचीं च द्वारौ कुर्वन्त्यथ दक्षिणे द्वार्बाहौ कुशहस्तमुपनिगृह्य दर्भेणं प्रवयति दर्भेणे स्पन्द्यामिन्द्रस्य स्यूरसीतीन्द्रस्य ध्रुवमसीति ग्रन्थिं करोति । तं तदानीमेव विस्रस्याहाकुर्वन्तो ग्रन्थीन्हस्तकौशलैर्निस्तिष्ठतेत्येवमेवोत्तरं द्वार्बाहुमेवमपरे[1] द्वार्बाहू निस्तिष्ठत्यथैनदभिमृशत्यैन्द्रमसीन्द्राय त्वेत्यथ महावेद्या उत्तरादꣳसीयाच्छ्रोणेर्वेद्यन्तेनाष्टादश प्रतीचः प्रक्रमान्प्रक्रामति । तदाग्नीध्रागारं विमिमीते यथान्तर्वेद्यर्धꣳ स्याद्बहिर्वेद्यर्धमथैनत्समुच्छ्रित्य परिश्रयन्ति । तस्य दक्षिणां द्वारं कुर्वन्त्याग्नीध्रागारस्य पार्श्वमानी पश्चारत्निरेतेन मार्जालीयो व्याख्यातस्तस्योदीं द्वारं कुर्वन्ति ।

॥ २७ ॥ सप्तमः ॥

अथात्रैव तिष्ठन्याचत्यग्निं यवमतीः प्रोक्षणीर्बर्हिर्हस्तमाज्यस्थालीꣳ सस्रुवामधिषवणं चर्माधिषवणे फलके षट् छङ्कून्ग्रावाणꣳ हिरण्यमुदपात्रमित्येतत्समादायाहैहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य दक्षिणस्य हविर्धानस्य नीड एतच्चर्मोत्सादयति । पुरोऽक्षमितराणि सꣳसादयन्त्यथोपरवाणां[2] कालादभ्रिमादत्ते देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद इत्यादायाभिमन्त्रयतेऽभ्रिरसि नारिरसीति । तयोपरवान्परिलिखति पूर्वयोर्दक्षिणमेवाग्रे परिलिखितꣳ रक्षः परिलिखिता

---

[1] अपरौ again (as p. 186) F only; the other MSS., also P, अपरे।

[2] सꣳसादयंत्य॰ BTJP; ॰दयत्य॰ the other MSS.

अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामीति सर्वानेवानुपूर्वं । खनति रक्षोहणो वलगहनो वैष्णवान्खनामीति सर्वानेवानुपूर्वमर्थेभ्यः पाꣳसूनुद्वपतीदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखानेदमेनमधरं करोमि यो नः समानो यो ऽसमानो ऽरातीयति गायत्रेण छन्दसेत्यवबाढो वलग इति यजमानस्याधस्तदं पाꣳसूनुद्वपति पूर्वयोर्दक्षिणात्त्रैष्टुभेन छन्दसेत्यपरयोर्दक्षिणाज्जागतेन छन्दसेत्यपरयोरुत्तरादानुष्टुभेन छन्दसेति पूर्वयोरुत्तरादथैतान्पदपाꣳसूनसञ्चरे परावपत्यत्र यं यजमानो द्वेष्टि तं मनसा ध्यायत्यथाप उपस्पृश्याथैनानवमृशतो ऽध्वर्युश्च यजमानश्च पूर्वयोर्दक्षिणमेवाध्वर्युरवमृशत्युत्तरं[1] यजमानो । ऽथ यजमानः पृच्छत्यध्वर्यो किमत्रेति । भद्रमिति । तन्नौ सहेत्यथाध्वर्युः पृच्छति यजमान किमत्रेति । भद्रमिति । तन्नौ सहेति । यमेवाध्वर्युः प्रजहाति तं यजमानो ऽवमृशति । दक्षिणयोरपरमेवाध्वर्युरवमृशति पूर्वं यजमानो । ऽध्वर्युरत्र पृच्छत्यथ यजमानो । ऽपरयोरुत्तरमेवाध्वर्युरवमृशति दक्षिणं यजमानो । यजमानो ऽत्र पृच्छत्यथाध्वर्युरुत्तरयोः पूर्वमेवाध्वर्युरवमृशत्यपरं यजमानो । ऽध्वर्युरत्र पृच्छत्यथ यजमानो । यजमानः प्रथमः पृच्छति यजमान उत्तमो । ऽथैनानभिमृशति विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा

---

[1] Here and infra F अभिमृशति instead of अवमृ॰ ।

विश्वाराडसि विश्वासां नाष्ट्राणाꣳ हन्तेति सर्वानेवानुपूर्वमथैना-
नद्भिः प्रोक्षति रक्षोहणो वलगहनः प्रोक्षामि वैष्णवानिति
सर्वानेवानुपूर्वमथैष्वपोऽवनयति रक्षोहणो वलगहनोऽवनयामि
वैष्णवानिति सर्वेष्वेवानुपूर्वमथैषु यवान्प्रस्कन्दयति यवोऽसि
यवयास्मद्द्वेषो यवयारातीरिति सर्वेष्वेवानुपूर्वमथैनान्बर्हिषाव- ५
स्तृणाति रक्षोहणो वलगहनोऽवस्तृणामि वैष्णवानिति सर्वा-
नेवानुपूर्वमथैनान्हिरण्यमन्तर्धाय स्रुवाहुत्याभिजुहोति रक्षोहणो
वलगहनोऽभिजुहोमि वैष्णवान्स्वाहेति सर्वानेवानुपूर्वमथास्यैते
फलके दीर्घसोमे संतृण्णे भवतोऽसंतृण्णे एकाहे । ते सꣳस्पृष्टे[1]
उपदधाति रक्षोहणौ वलगहनावुपदधामि वैष्णवौ इत्यथैने १०
शङ्कुभिः परिणिहन्ति द्वाभ्यां पुरस्ताद्द्वाभ्यां पश्चाद्द्वाभ्यामभितो
ऽनवसर्पणायाथैने प्रदक्षिणं पुरीषेण पर्यूहति रक्षोहणौ
वलगहनौ पर्यूहामि वैष्णवौ इत्यथैने बर्हिषा परिस्तृणाति
रक्षोहणौ वलगहनौ परिस्तृणामि वैष्णवौ इत्यथैने अभिमृशति
रक्षोहणौ वलगहनौ वैष्णवौ इत्यथैतच्चर्म फलकयोः प्राचीन- १५
ग्रीवमुत्तरलोमोपस्तृणाति[2] यज्ञ प्रतितिष्ठेति[3] वा तूष्णीं वा ।
तिरश्चर्मन्फलके ग्राव्णोदादयति ॥ २८ ॥

बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वदेति । नीड

---

[1] संवृष्टे BTF Keś., Mādh. Vol I., p. 159; सꣳस्पृष्टे HJ; Bhav. seems to have read संस्पृष्टे ।

[2] Thus PHJF, Keś., Mādh.; आस्तृणाति B, अवस्तृ॰ T.

[3] Thus HTF, Bb, Keś; प्रतिष्ठेति BJP

एतत्त्वंमीत्सादयति । ग्रावसु ग्रावाणमभ्यर्जत्यथ दक्षिणस्य हविर्धानस्याग्रेणोपस्तम्भनं बर्हिर्मुष्टिमुपनिबध्नाति स्तोत्रेभ्यो ऽथ याचति स्फ्यमुदपात्रं चात्वालात्पुरीषꣳ सिकता इत्येतत्समादायाग्नीदेहि यजमानेत्याग्नीध्रं हुत्वा स्फ्येनोद्धत्यावोक्ष्य चात्वालात्पुरीषꣳ सिकता इति निवपति विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा मा हिꣳसीरिति । तं परिमण्डलं धिष्णियं[1] करोत्यथैनꣳ सिकताभिराभ्राग्निनं करोत्यथान्तःसदसं धिष्णियान्निवपति होतुः प्रथमं वह्निरसि हव्यवाहन इति । श्वात्रो ऽसि प्रचेता इति दक्षिणतो मैत्रावरुणस्य । तुथो ऽसि विश्ववेदा इत्युत्तरतो ब्राह्मणाच्छꣳसिन । उशिगसि कविरित्युत्तरतः पोतुरङ्घारिरसि बम्भारिरित्युत्तरतो नेष्टुरवस्युरसि दुवस्वानित्युत्तरतो ऽच्छावाकस्याथ दक्षिणे वेद्यन्ते मार्जालीयं धिष्णियं[2] निवपति शुन्ध्यूरसि मार्जालीय इति । सर्वेष्वेव रौद्रमनुवर्तयत्याग्नीध्रे ऽन्ततो निवपत्युदक्सꣳस्थाताया इत्यष्टौ न्यवाप्सीदित्यथाष्टावनुदिशति । सम्राडसि कृशानुरित्याहवनीयमुपतिष्ठते । परिषद्यो ऽसि पवमान इत्यास्तावं । प्रतक्वासि नभस्वानिति चात्वालमसंमृष्टो ऽसि हव्यसूद इति पशुश्रपणमथ सदसो द्वारि तिष्ठन्नौदुम्बरीमुपतिष्ठत ऋतधामासि सुवर्ज्योति-

---

[1] Instead of धिष्णियं (thus PBT Keś.) HF have खरं, J धिष्ण्यं खरं ; the word धिष्णिय is found here and infra often written धिष्ण्य ।

[2] om. HJF.

रिति। ब्रह्मज्योतिरसि सुवर्धामेति ब्रह्मसदनमथात्रैव तिष्ठन्गार्हपत्यमुपतिष्ठते ऽजो ऽस्येकपादित्यहिरसि बुध्निय इति यं प्रहास्यन्तो भवन्ति। ॥ २९ ॥

अथात्रैव तिष्ठन्संप्रैषमाह स्तृणीत बर्हिः प्र व्रतं यच्छत समपिव्रतान्ह्वयध्वमास्तावं बहुलꣳ स्तृणीत सदोहविर्धाने बहुले स्तृणीतोन्नेतर्ग्राव्णो वायव्यानि द्रोणकलशं दशापवित्रे समवधाय पत्नीशाले सꣳसाद्याग्नीदाज्यमधिश्रय प्रतिप्रस्थातः स्रुचः संमृड्ढ्याज्येनोदेहि पृषदाज्याय दध्याहरेति। यथासंप्रैषं ते कुर्वन्त्यथ दक्षिणे वेद्यन्ते बर्हिर्मुष्टिꣳ स्तृणाति देवबर्हिरूर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य इति। तां बहुलां पुरस्तात्प्रत्यञ्च[1] स्तृणन्तो यन्त्यथान्तःशालं पृषदाज्यवन्त्याज्यानि गृहीत्वा परिकर्मिभ्य उत्प्रदाय ब्रह्मणे राजानमुत्प्रयच्छति। तं ब्रह्मादायोत्तरत[2]स्तिष्ठत्युत्तरतस्तिष्ठन्नग्निमन्वानयत्युदग्ने[3] तिष्ठानु मामुदेहि विश्वैर्देवैर्यज्ञियैः संविदानः। सुवर्गे लोके यजमानꣳ हि धेहि मास्यै[4] हास्या आहुत्यै यामुपेम इत्यथाभ्यादधातीध्मं[5] प्रणयनीयमुपोपयमनीः कल्पयन्ति चात्वालात्। समन्वारब्धेष्वपिव्रतेषु संप्रच्छन्नेषु गार्हपत्य आज्यं विलाप्योत्पूय

---

[1] Thus TH; प्रत्यंचः PJF; प्रत्यंचꣳ B.

[2] तिष्ठत्युत्तरतस् om. TJF; according to the Prayoga and the Vivaraṇa it is to be read.

[3] •न्वानयत उद• PH; the Ṛc seems not to be found in any known Saṃhitā.

[4] Corrected, मास्येहास्या MSS.

[5] Thus TP; •थ्यादधा• F; •थ्मादधा• the other MSS.

स्रुचि चतुर्गृहीतं गृहीत्वा शालामुखीये वैसर्जनानि[1] जुहोति त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्यो ऽन्यकृतेभ्य उरु यन्तासि वरूथꣳ स्वाहेति । स्रुवेणांशुं प्रस्कन्दयति जुषाणो अप्तुराज्यस्य वेतु स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा संप्रैषमाहाग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहीति । चिदन्नायासुयच्छन्तो[2] । होतुर्वेश्मं यन्त्यथ वै भवति प्राञ्चमग्निं प्रहरन्त्युत्पत्नीमानयन्त्यन्वनाꣳसि प्रवर्तयन्तीति[3] । यदस्याच ग्रस्तं भवति पूर्वं तेनाग्निमन्ववस्यन्त्यथाग्निप्रथमाः प्रतिपद्यन्ते ऽन्वग्राञ्जा चाज्यैस्स्वान्वग्रावणो[4] वायव्यानि । पूर्वया द्वारोपनिष्क्रामन्त्ययं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं शत्रूञ्जयतु जर्हृषाणो ऽयं वाजं जयतु वाजसातावित्युत्तरेण सदः परीत्याग्नीध्रागारे ऽग्निं निधाय नयवत्यर्चाग्नीध्रे जुहोत्यग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम स्वाहेत्यचैवैतद्ग्रावोवायव्यꣳ[5] समुपसाद्योपातियन्ति राज्ञा चाज्यैस्स्वाहवनीये स्रुवाहुतिं जुहोत्युरु विष्णो

---

[1] °सर्जनं BTJ; but comp. TS. VI. 3. 2.

[2] चनून्नायासु° BF.

[3] इति om BTJ; °प्रवर्तयन्त्यथ यदस्या° T.

[4] Thus F; the other MSS. ग्रावो।

[5] Thus BJHP; ग्रावोवायव्युत्यु° T; ग्राव्णोवायव्यां F; ग्रावोवायव्यानि Keś. The remarkable ग्रावोवायव्यम् occurs several times in the Karmānta sūtra. The Pronoun एतत् seems also to point to a neuter; but comp. Bh. and Keś: एतदिति द्रोणकलशोपसंग्रहार्थम् ।

विक्रमस्वोरु क्षयाय नः कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहेति । ॥ ३० ॥

अथ प्रोक्षणीभिरुपोत्तिष्ठती।ध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तादाश्ववालं प्रस्तरं गृह्णाति । पञ्चविधं बर्हिः स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य कार्ष्मर्यमयान्परिधीन्परिदधात्यू।र्ध्वे समिधावादधात्यै।क्षवी विधृती तिरश्ची सादयति । विधृत्योराश्ववालं प्रस्तरं । प्रस्तरे जुहूं । बर्हिषीतरा । एता असदन्निति समभिमृश्याथाप उपस्पृश्य ब्रह्मणो राजानमादाय पूर्वया द्वारा हविर्धानं प्रपादयति सोमो जिगाति गातुविद्देवानामेति निष्कृतमृतस्य योनिमासदमित्य।थ दक्षिणस्य हविर्धानस्य नीडे कृष्णाजिनमास्तृणात्यदित्याः सदो ऽसीत्य।दित्याः सद आसीदेति कृष्णाजिने राजानमथैनं देवताभ्यः संप्रयच्छत्येष वो देव सवितः सोमस्तꣳ रक्षध्वं मा वो दभदिति । संप्रदायोपतिष्ठत एतत्त्वꣳ सोम देवो देवानुपागा इदमहं मनुष्यो मनुष्यान्सह प्रजया सह रायस्पोषेणेति । नमो देवेभ्य इति प्राञ्चमञ्जलिं करोति । स्वधा पितृभ्य इति दक्षिणा[1] न्यञ्चत्य।थोपनिष्क्रामतीदमहं निर्वरुणस्य पाशादित्य।थाहवनीयमुपतिष्ठते सुवरभिविख्येषं वैश्वानरं ज्योतिरित्य।थ यजमानमवान्तरदीक्षां विसर्जयत्यग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूस्त्वय्यभूदियꣳ सा मयि या तव तनूर्मय्यभूदेषा सा त्वयि यथायथं नौ व्रतपते व्रतिनोर्व्रतानीत्य।थैनꣳ सꣳशास्ति

---

[1] Thus BJ, Bh.; दक्षिणान्यंच्ययोप॰ H; दक्षिणंन्यंचोन्यायोप॰ F; दक्षिणंजाम्बाचत्यथोप॰ T; दक्षिणान्यंचमथोप॰ P.

स्रस्वीष्व मेखलां प्र मुष्टी सारय मैत्रावरुणाय दण्डं प्रयच्छ यजमान इति त्वाचक्षतां नामग्राहं ते पितृभिः पितामहैः प्रपितामहैः पुत्रैः पौत्रैः सुब्रह्मण्यः सुब्रह्मण्यामाह्वयत्विति। स एवमेवैतत्सर्वं करोत्यथ यूपाहुतिꣳ हुत्वा यूपं यजुषा करोति।
५ यूपावटं यजुषा करोति। तदेतद्यूपावटान्तम्। ॥ ३१ ॥ **अष्टमः** ॥

अथ यूपस्यावृता यूपमुच्छ्रयति। स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति। तस्य प्रसिद्धं वपया चरित्वा वपाश्रपणी अनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते। ऽथ यो दीक्षितः कुम्भस्तं याचति। तमादायान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य
१० यत्रापस्तद्यन्ति[1]। नान्तमा वहन्तीरत्येति। न स्थावराणां गृह्णाति। प्रतीपं तिष्ठन्गृह्णाति। छायायै चातपतस्य संधौ गृह्णाति हविष्मतीरिमा आपो हविष्मान्देवो अध्वरो हविष्माꣳ आविवासति हविष्माꣳ अस्तु सूर्य इत्यथैना आदाय प्रदक्षिणमावृत्य सव्ये ऽꣳसे निधायैतेनैव यथेतमेत्योत्तरेणाग्नीध्रीयं परीत्योत्तरेण
१५ सदः परीत्य पूर्वया द्वारा शालां प्रपाद्य जघनेन गार्हपत्यमौपसदायां वेद्याꣳ सꣳस्पृष्टाः[2] सादयत्यग्नेर्वो ऽपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनीः सुम्ने मा धत्तेत्यथ पशुपुरोडाशं निर्वपतीडान्तः पशुपुरोडाशः संतिष्ठते। पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके। ॥ ३२ ॥ **नवमः** ॥

---

[1] तद्देति only T and Madh.; तद्यंति the other MSS. also P and Keś..

[2] Some of the MSS. have here and elsewhere सꣳस्पृष्टाः ।

अथ वसतीवरीः परिहरिष्यन्नाह व्यपक्रामत मा वोऽभिपरिहारिषमिति । यजमानायतने यजमान उपविशति । जघनेन गार्हपत्यं पत्न्य।थैना आदाय दक्षिणया द्वारोपनिर्हृत्य सव्ये ऽꣳसे निधाय दक्षिणेन सदः परीत्य दक्षिणेन मार्जालीयं धिष्णियं पर्याहृत्य दक्षिणतो यूपेन सꣳसृष्टाः सादयतीन्द्राग्न्योर्भागधेयी स्थेत्य।थैना आदायोदङ्ङावृत्य दक्षिणे ऽꣳसे निधायैतेनैव यथेतमेत्य जघनेन गार्हपत्यमौपसदायां वेद्याꣳ सꣳसृष्टाः सादयति मित्रावरुणयोर्भागधेयी स्थेत्य।थैना आदाय पूर्वया द्वारोपनिर्हृत्य दक्षिण एवाꣳसे निधायोत्तरेण सदः परीत्योत्तरेणाग्नीध्रीयं धिष्णियं पर्याहृत्योत्तरतो यूपेन सꣳसृष्टाः सादयति विश्वेषां देवानां भागधेयी स्थेत्य।थैना आदाय प्रदक्षिणमावृत्य सव्ये ऽꣳसे निधायैतेनैव यथेतमेत्य जघनेनाग्नीध्रीयं धिष्णियꣳ सꣳसृष्टाः सादयति यज्ञे जाग्रतेति । ॥ ३३ ॥

अथ पयाꣳसि विशास्ति या सम्राड्धुक् तस्यै दधिघर्माय दधि कुरुत या यजमानस्य तस्या आमिक्षायै या पत्न्यै तस्या आशिरे पयश्च सक्तूꣳश्च कुरुत शृतातङ्क्यमादित्यग्रहाय दधि कुरुत पुरोडाशीयानि पिष्टानि कुरुत धाना हारियोजनीः कुरुत चतुरो [1]ऽम्भृणाꣳस्तौनुदचनानयुज[1] एकधनाꣳस्त्यवमाने-

---

[1] Most of the MSS. read •रीषय• ।

[2] Thus PHBJ, Bh., Mantramālā, Keś. ; उदंचनान् F, Prayoga I.O., Padārthanirv ; उदचान् T.

कादशपरमाꣳस्तस्रो रशनास्तस्रो वपाश्रपण्यौद्वयमिध्माबर्हि[1]-
रौदुम्बरान्महापरिधीन्कुरुत सुब्रह्मण्यः सुब्रह्मण्यामाह्वयत्विति ।
यथासंप्रैषं ते कुर्वन्त्य।थैतानभ्युपानाययत्यु।त्तरस्य[2] हविर्धानस्य
नीड आधवनीयं । प्रउगे पूतभृतं । तयोः समान उद्चन ।
५ आग्नीध्र एकꣳ सोद्चनं । मार्जालीय एकꣳ सोद्चनमा।ग्नीध्र
एताꣳ रात्रिं यजमानः संविशति । हविर्धाने राजानं गोपायन्ति । ॥ ३४ ॥ दशमः ॥

॥ इति षष्ठः प्रश्नः ।

---

[1] द्व रशने द्वे वपाश्रपणी एकतयमिध्माबर्हिर् Mantramālā, Padārthan iv. Prayoga I.O.

[2] Thus PF only ; यथैनान॰ BHTJ.

अथातो महारात्र एव बुध्यन्ते। संबोधयन्त्येतानृत्विजोऽध्वर्युꣳ होतारं ब्रह्माणमुद्गातारं प्रतिप्रस्थातारं प्रस्तोतारं प्रशास्तारं ब्राह्मणाच्छꣳसिनमच्छावाकं नेष्टारं पोतारꣳ सदस्यमुन्नेतारमाग्नीध्रं ग्रावस्तुतꣳ सुब्रह्मण्यं प्रतिहर्तारं ये चान्ये परिकर्मिणो भवन्ति। ते हस्तपादान्प्रक्षाल्याग्नीध्रे यजमानमुपसंगच्छन्ते। ऽथाध्वर्युर्हस्तौ संमृशते कर्मणे वां देवेभ्यः शकेयमित्य।थाचैव तिष्ठन्संप्रैषमाहोन्नेतर्ग्राव्णो वायव्यानि द्रोणकलशे दशापवित्रे समवधाय दक्षिणस्य हविर्धानस्य पुरोऽक्षꣳ सꣳसादयाग्नीदाज्यमधिश्रय प्रतिप्रस्थातः स्रुचः संमृड्ढ्याज्येनोदेहि पृषदाज्याय दध्याहरेति। यथासंप्रैषं ते कुर्वन्त्य।थाध्वर्युराग्नेय्यर्चाग्नीध्रमभिमृशत्यग्निर्मूर्धा दिव इति। वैष्णव्या हविर्धानं विष्णो त्वं नो अन्तम इत्या।ग्नेय्या स्रुचोऽयमग्निः सहस्रिण इति। वायव्यया वायव्यानि वायो शृतꣳ हरीणामित्यै।न्द्र्या सद इन्द्रं विश्वा अवीवृधन्नित्य।थ पृषदाज्यवन्त्याज्यानि गृहीत्वा प्रोक्षणीभिरुपोत्तिष्ठतीध्मं प्रोक्षति। वेदिं प्रोक्षति। बर्हिः प्रोक्षति। बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तात्प्रस्तरं[1] गृह्णात्येकविधं बर्हि स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्यौदुम्बरान्महापरिधीन्परिदधाति नित्येन परिधानेना।थैनान्योगेन युनक्ति। युनज्मि ते पृथिवीं ज्योतिषा सहेति मध्यमं। युनज्मि वायुमन्तरिक्षेण ते सहेति दक्षिणं। युनज्मि वाचꣳ सह सूर्येण त इत्युत्तरम।थ स्रुचः सन्ना अभिमृशति युनज्मि तिस्रो विपृचः सूर्यस्य त इत्य।थाप उपस्पृश्याहेहि

---

[1] Behind पुरस्तात् HJ ins. [illegible]।

यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्याथैतच्चर्म[1] फलकयोः प्राचीनग्रीवमुत्तरलोमोपस्तृणाति[2] यज्ञ प्रतितिष्ठेति वा तूष्णीं वा । तस्मिन्संमुखान्ग्रावणः कृत्वा दक्षिणस्य हविर्धानस्यान्तरेणेषे राजानमुपावहरति हृदे त्वा मनसे त्वा सोम राजन्नेह्यवरोहेति द्वाभ्यामथैनमुद्ग्राहभ्यः प्राञ्चस्तस्मिंस्तच्चेष्टन्ति यत्ते विदुरथाप उपस्पृश्याहेहि यजमानेत्याग्नीध्रं द्रुत्वा स्रुचि चतुर्गृहीतं गृहीत्वा पञ्चहोतारं मनसानुद्रुत्याग्नीध्रे जुहोत्यन्वारब्धे यजमाने स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाग्नीध्र एवामन्यां जुहोत्यासन्यान्मा मन्त्रात्पाहि कस्याश्चिदभिशस्त्याः[3] स्वाहेत्यथाहवनीये घृतानुषिक्तꣳ शकलमभ्यादधाति तूष्णीमथान्वेव तिष्ठन्संप्रैषमाह ॥ १ ॥

प्रातर्यावभ्यो देवेभ्यो होतरनुब्रूहि ब्रह्मन्वाचं यच्छ सुब्रह्मण्य सुब्रह्मण्यामाह्वयाग्नीत्सवनीयान्निर्वप प्रतिप्रस्थातः खरे पात्राणि युङ्ग्धीति । यथासंप्रैषं ते कुर्वन्ति । प्रतिपद्यत एष होता प्रातरनुवाकं । यच्छति ब्रह्मा वाचमाह्वयति सुब्रह्मण्यः सुब्रह्मण्यां । तस्यामाहूतायां ब्रह्मा वाचं विसृजते । निर्वपत्येष आग्नीध्र ऐन्द्रानेकादशकपालान्सवनीयाꣳस्तेषां व्रीहिष्वेव हविष्कृतमुद्वादयत्युपोद्यच्छन्ते यवानथ प्रतिप्रस्थाता खरे पात्राणि युनक्ति ।

---

[1] Thus (द्यथैतच्च०) Keś.; द्यथैनच्च० the MSS.

[2] आस्तृणाति B.

[3] अभिशस्त्या PBTJ, Mantramālā; ०शस्त्यै Prayoga IO, Padārtha-nirv.; ०शस्त्रै H; ०शस्त्यै F.

पूर्वार्धे खरस्य दक्षिणाशिरसमुपाꣳशुसवनं निदधाति दक्षिणत उपाꣳशुपात्रमुत्तरतो ऽन्तर्यामपात्रमुपसꣳस्पृष्टेˈ असꣳस्पृष्टे अभिचरतःˈ पश्चाद्द्विदेवत्यपात्राण्यन्वञ्चैन्द्रवायवपात्रं मैत्रावरुणपात्रमाश्विनपात्रंˈ पश्चाच्छुक्रामन्थिनोः[1] प्रबाहुग्दक्षिणꣳ शुक्रपात्रमुत्तरं मन्थिपात्रमग्रेण मन्थिपात्रमृतुपात्रेˈ पश्चादाग्रयणस्थालींˈ दक्षिणस्यां खरश्रोण्यामादित्यस्थालीꣳ सोपशयामुत्तरस्यां खरश्रोण्यामुक्थ्यस्थालीꣳ सोपशयामुत्तरस्य हविर्धानस्याग्रेणोपस्तम्भनमनुपोप्ते ध्रुवस्थालीमन्तरेण पूतभृदाधवनीयौ चमसान्दक्षिणस्य हविर्धानस्य पश्चादक्षं द्रोणकलशं दशापवित्रे इति निदधात्यथैनान्यभिमृशत्यग्निर्देवता गायत्री छन्द उपाꣳशोः पात्रमसीति दशभिर्दशाथाध्वर्युः सं वा विशति कर्माणि वानुप्रेक्षमाण आस्तेˈ ॥ २ ॥

अथ यत्र होतुरभिजानात्यभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः। अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवमिति तत्प्रचरण्याꣳ स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः। शृणोत ग्रावाणो विदुषो नु यज्ञꣳ शृणोतु देवः सविता हवं मे स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा बर्हिरादाय संप्रैषमाहाप इष्य होतर्मैत्रावरुणस्य चमसाध्वर्यवाद्रवैकधनिन एत नेष्टः पत्नीमुदानयाग्नीद्धोतृचमसेन च मा वसतीवरीभिश्च चात्वाले प्रत्युपलम्बस्वेतिˈ यथासंप्रैषं ते

---

[1] Thus PTH Keś.; ˚नौ BJF.

कुर्वन्व्यानयति नेष्टा पत्नीं पान्नेजनं कलशमादाय प्रेहुदेहीत्येतेन निगदेनाथैनां पूर्वया द्वारोपनिष्क्रमय्योत्तरेण सदः परीत्योत्तरेणाग्नीध्रीयं धिष्णियं पर्याणीयान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य यत्रापस्तद्यन्त्यथाप्सु बर्हिः प्रास्याभिजुहोति देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं देवेभ्यो देवत्रा धत्त शुक्रꣳ शुक्रपेभ्यो येषां भाग स्थ स्वाहेति । मैत्रावरुणचमसेनाकृतिमपप्लावयति कार्षिरस्यपापां मृध्रमिति । बर्हिषी अन्तर्धायोन्नयति समुद्रस्य वो ऽक्षित्या उन्नय इत्यथैकधनान्गृह्णातीन्द्राय वो जुष्टान्गृह्णामीति वा तूष्णीं वाथ पन्नेजनीर्गृह्णाति वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यः पन्नेजनीर्गृह्णामि यज्ञाय वः पन्नेजनीर्गृह्णामीति । ताः पत्न्यै संप्रदायोदायन्त्यन्वारब्धे यजमान एतेनैव यथेतमेत्य चात्वाले होतृचमसं च मैत्रावरुणचमसं च सꣳस्पर्श्य वसतीवरीर्व्यानयति । पूरयति होतृचमसमंशुं मैत्रावरुणचमसे प्रस्कन्दयत्यथ होतृचमसं वसतीवरीर्मैत्रावरुणचमसमिति त्रयꣳ संनिधाय प्रतिस्तोमं प्रचरण्या समनक्ति सं ज्योतिषा ज्योतिरङ्क्ताꣳ सꣳ शुक्राः शुक्रेण सꣳ हविषा हविः सं यज्ञपतिराशिषेत्यथैषा पत्न्येतेनैव यथेतमेत्य जघनेन गार्हपत्यमौपसदायां वेद्याꣳ संस्पृष्टाः सादयति तूष्णीम् । ॥ ३ ॥

अथाध्वर्युर्होतुरुत्काममेति । होताध्वर्युं पृच्छत्यध्वर्यो ऽवेरपा३ इत्युतेमनन्नमुरुतेमाः पश्येतीतरः प्रत्याहाथ यद्यग्निष्टोमो जुहोति यमग्ने पृत्सु मर्त्यमावो वाजेषु यं जुनाः ।

स यन्ता शश्वतीरिषः स्वाहेत्यथ यद्युक्थ्य एतेनैव यजुषा मध्यमे परिधौ निमार्ष्ट्यथ यद्यतिरात्र एतदेव यजुर्वदन्प्रपद्यते। यज्ञक्रतूनां व्यावृत्त्या इति ब्राह्मणमथैता होतृचमसीया दक्षिणस्य हविर्धानस्यान्तरेणेषे उपातिहृत्य नीड उत्सादयत्यथोदुन्नशाधवनीयꣳ सर्वश एव मैत्रावरुणचमसीयाः पर्यस्यति। ५
तृतीयं वसतीवरीणामवनयति। तृतीयमेकधनानां। पुरोऽक्षं वसतीवरीः सादयति। पश्चादक्षमेकधनानथान्तरेण हविर्धाने उपविश्यौदुम्बरं पात्रं चतुःस्रक्ति याचति। तस्मिन्बर्हिषी अन्तर्धाय प्राजापत्यं दधिग्रहं गृह्णात्युपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधे १०
रातं देवेभ्योऽग्निजिह्वेभ्यस्त्वर्तायुभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्य इत्यपोद्धृत्य बर्हिषी अथैनमादायोपोत्तिष्ठति दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेति। पूर्वया द्वारोपनिष्क्रामत्यपेन्द्र द्विषतो मनोऽप जिज्यासतो जह्यप यो नोऽरातीयति तं जहीत्येत्याहवनीये जुहोत्यन्वारब्धे यजमाने १५
प्राणाय त्वापानाय त्वा व्यानाय त्वा सते त्वासते त्वाद्भ्यस्त्वौषधीभ्यो विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजा अखिद्रा[1] अजायन्त

---

[1] Conjecturally. The best MSS. (BJ) and the Mantramālā read अरिखद्रा which seems to mean: akhkhidrā, thus P. By adding a little stroke we get the reading I have put in the text, on account of the usual form the verb खिदति has in the Taittirîya texts (स्खिदति). Comp. TS. III. 5, 8, C.

तस्मै त्वा प्रजापतये विभूदाव्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि स्वाहेत्यथास्य संचालनमन्तःपरिधि निनयति । धेनुवरं[1] वानडुद्वरं वा दद्यादिति ह स्माह बौधायनो । द्वादश पष्ठौहीरित्याश्मौगविर्कृषभमिति कात्यो । मणिकुण्डलमिति राथीतरः । ॥ ४ ॥ प्रथमः ॥

अथैता होतृचमसीया दक्षिणस्य हविर्धानस्यान्तरेणेषे उपावहृत्य चर्मणि निदधाति । तासु निग्राभ्यासु यजमानं वाचयति निग्राभ्या स्थ देवश्रुत आयुर्मे तर्पयतेति प्रतिपद्य गणा मे मा वितृषन्नित्यातस्ता यजमानाय संप्रदायाथैतेषां ग्राव्णां यः सुजन्तुरिव तमादत्ते देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्यादायाभिमन्त्रयते ग्रावास्यध्वरकृद्देवेभ्यो गम्भीरमिममध्वरं कृध्युत्तमेन पविनेन्द्राय सोमꣳ सुषुतं मधुमन्तं पयस्वन्तं वृष्टिवनिमित्यथैनं प्राञ्चं प्रश्रित्य विस्रस्य राजानं ग्रावाणमुपाꣳशुसवनमभि मिमीत इन्द्राय त्वा वृत्रघ्न इन्द्राय त्वा वृत्रतुर इन्द्राय त्वाभिमातिघ्न इन्द्राय त्वादित्यवत इन्द्राय त्वा विश्वदेव्यावत इति । पञ्चकृत्वो यजुषा । पञ्चकृत्वस्तूष्णीं । दशकृत्वो मिमानोऽर्धवेलाꣳ राज्ञो मिमीते । ऽथातिशिष्टꣳ राजानमुष्णीषेण विग्रथ्य दक्षिणस्य हविर्धानस्यान्तरेणेषे उपातिहृत्य[2] नीड उत्सादयत्यथ मितꣳ राजानꣳ होतृचमसीयाभिरुपसृजति श्वात्रा स्थ वृत्रतुरो

---

[1] धेनू॰ H, but comp. IV. 11 (page 127, 14).

[2] [illegible] BJTF; उपावहृत्य H.

राधोगूर्ता अमृतस्य पत्नीस्ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबतोपहूतो युष्माकꣳ सोमः पिबत्वित्यथैनꣳ संप्रयौति यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे तेनास्मै यजमानायोरु राया कृध्यधि दात्रे वोच इति । तिरश्चर्मण्फलके अभिमृशति धिषणे वीडू सती वीडयेथामूर्जं दधाथामूर्जं मे धत्तं मा वाꣳ हिꣳसिषं मा मा हिꣳसिष्टमित्यथ वृद्धीर्वाचयत्यवीवृधं वो मनसा सुजाता ऋतप्रजाता भग इद्वः स्याम । इन्द्रेण देवीर्वीरुधः संविदाना अनु मन्यन्ताꣳ सवनाय सोममिति । संहृतस्य राज्ञः प्रतिप्रस्थाता सव्ये पाणौ षडꣳशून्सचते । ऽथैतेनैव पाणिनोपाꣳशुपात्रमादत्ते । ऽथोपसृष्टꣳ राजानमष्टौ कृत्वो ऽग्रे ऽभिषुणोति । सो ऽꣳशौ स्कन्ने वाचयत्या मास्कान्त्सह प्रजया सह रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीरित्यथाञ्जलिनोपहन्ति[1] तूष्णीमन्तर्दधाति प्रतिप्रस्थाता । प्रथमाभ्यामꣳशुभ्यामानयत्यध्वर्युर्वाचस्पतये पवस्व वाजिन्निति । सचत एतावꣳशू । तथोपसृष्टꣳ राजानमेकादशकृत्वो द्वितीयमभिषुणोति । नात्राꣳशौ स्कन्ने वाचयति । तथाञ्जलिनोपहन्ति तूष्णीमेवान्तर्दधाति प्रतिप्रस्थाता । मध्यमाभ्यामꣳशुभ्यामानयत्यध्वर्युर्वृषा वृष्णो अꣳशुभ्यां गभस्तिपूत इति । सचत एतावꣳशू । तथैवोपसृष्टꣳ राजानं द्वादशकृत्वस्तृतीयमभिषुणोति । नैवात्राꣳशौ स्कन्ने वाचयति । तथैवाञ्जलिनोपहन्ति तूष्णीमेवान्तर्दधाति प्रतिप्रस्थातोत्तमाभ्यामꣳशुभ्यामानयत्यध्वर्युर्देवो

---

[1] About the interpunction of this passage I am not sure.

देवानां पवित्रमसि येषां भागो ऽसि तेभ्यस्त्वेति । स्रवत एतावꣳशू । अथैनमुपाꣳशुसवनं[1] दशापवित्रेण परिमृज्य पूर्वार्धे खरस्य दक्षिणाशिरसं निदधात्यथ प्रतिप्रस्थातुर्ग्रहमादत्ते स्वांकृतो ऽसीति । ग्रहमपयच्छत्यथैनमवेक्षते[2] मधुमतीर्न इषस्कृधीत्यथैनमूर्ध्वमुन्मार्ष्टि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इत्यथैनमादायोपोत्तिष्ठति मनस्त्वाष्ट्वित्युर्वन्तरिक्षमन्विहीत्येत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहा त्वा सुभवः सूर्याय स्वाहेति । कृत्वानुप्राणिति । वाचयति भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं मे पाहीत्यथैनमवाचीनमवमृज्य प्रतीचा नीचा पाणिना मध्यमे परिधौ निमार्ष्टि देवेभ्यस्त्वा मरीचिपेभ्य इत्यथ प्रदक्षिणमावृत्याग्रयणस्थाल्यां ग्रहस्य सꣳस्रावमवनयत्येष ते योनिरित्यथैतस्मिन्नुपाꣳशुपात्रे ऽꣳशुं प्रास्यत्यथैनं[3] दक्षिणत उपाꣳशुसवनेन सꣳसृष्टꣳ सादयति प्राणाय त्वेति । व्यानाय त्वेत्युपाꣳशुसवनं प्रत्यभिमृशते । ॥ ५ ॥

यावदेवात्राध्वर्युस्तिष्ठति तावदेष प्रतिप्रस्थाता राजन्येवाꣳशूनां द्वौद्वावपिसृजति यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहेति यत्ते सोम यत्ते सोमेत्यथाभिषोष्यन्तः सर्वंश एव राजानं पर्युपविशन्ति । पश्चात्प्राङ्मुखो ऽध्वर्युरुपविशति । तस्य दक्षिणं बाहुमनु यजमानो । दक्षिणतः

---

[1] Thus (अथैनमु॰) all MSS.

[2] ग्रहमपयच्छत्य॰ TH, the other MSS. ग्रहमुप॰ ।

[3] Thus TF Kcś., अथैतद्दु B, अथैनद्दु PH.

प्रतिप्रस्थातोत्तरत आग्नीध्रो । ऽन्तरेण प्रतिप्रस्थातारं चाग्नीध्रं च यश्चतुर्थो ऽभिषुणोत्यथोन्नेतारमाहाहरोपसृजेत्युपसृजत्युन्नेताधवनीयादुदचनेनोपर्यर्धे होतृचमसे ऽꣳशून्परिप्लावयन्ति प्रागपागुदगधराक्तास्त्वा दिश आधावन्त्वम्ब निष्वरेत्येष निग्राभ । आप्याययन्ति । व्यपोहन्ते । ऽभिषुण्वन्ति । निग्राभमुपयन्त्याप्या- ५
ययन्ति । व्यपोहन्ते । ऽभिषुण्वन्ति ।[1] निग्राभमुपयन्त्याप्याययन्ति । व्यपोहन्ते । ऽभिषुण्वन्ति[1] । न चतुर्थं निग्राभमुपयन्त्यथैनꣳ सुसंभृतꣳ संभरणाꣳ संभृत्योन्नेत्र उत्प्रयच्छति । तमुन्नेताधवनीये ऽवनयत्येवमेव द्वितीयः पर्यायः संतिष्ठत । एवं तृतीय । ऋजीषमन्ततो दशापवित्रेण परिवेष्ट्योन्नेत्र उत्प्रयच्छति । १०
तदुन्नेताधवनीये[2] विचाल्य प्रपीड्य दक्षिणस्य हविर्धानस्यान्तरेणेषे उपावहृत्य[3] चर्मणि निदधाति । तस्मिन्संमुखान्ग्राव्णः कृत्वा चतुर्धैतदृजीषं ग्रावमुखेभ्यो व्यपोहत्यथोद्गाता वा प्रस्तोता वा दक्षिणस्य हविर्धानस्य पश्चादक्षमुपसृप्य प्राञ्चं ग्रावसु द्रोणकलशमभ्यूहति । तस्मिन्नुदीचीनदशं दशापवित्रं वितन्वन्ति । १५
तेन तथा कृतेनादित्यस्योदयमाकाङ्क्षन्त । उदित आदित्ये ऽन्तर्यामं गृह्णात्यतिपवमानस्य राज्ञ उपयामगृहीतो ऽस्यन्तर्यच्छ मघवन्पाहि सोममुरुष्य रायः समिषो यजस्वान्तस्ते दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षꣳ सजोषा देवैरवरैः परैश्चान्तर्यामे

---

[1] The passage निग्राभमु ...... ऽभिषुण्वन्ति, found in PHF, is missing in BTJ.

[2] Thus JP; तमुन्नेता॰ TFB.

[3] Thus BJTP; उपातिहृत्य H; उपानिहृत्य F.

मघवन्मादयस्वेति । स्वांकृतो ऽसीति ग्रहमपयच्छत्य।थैनमवेक्षते[१] मधुमतीर्न इषस्कृधीत्य।थैनमूर्ध्वमुन्मार्ष्टि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इत्य।थैनमादायोपोत्तिष्ठति मनस्त्वाष्ट्वि।त्युर्वन्तरिक्षमन्विहीत्यै।त्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहा त्वा सुभवः सूर्याय स्वाहेति । हुत्वान्वपानिति । वाचयति धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहीत्य।थैनमूर्ध्वमुन्मृज्य प्राचोत्तानेन[२] पाणिना मध्यमे परिधावुन्मार्ष्टि देवेभ्यस्त्वा मरीचिपेभ्य इत्य।थ प्रदक्षिणमावृत्याग्रयणस्थाल्यां ग्रहस्य सꣳस्रावमवनयत्येष ते योनिरित्य।थैनमुत्तरत[३] उपाꣳशुसवनेन सꣳस्पृष्टꣳ सादयत्यपानाय त्वेति । व्यानाय त्वेत्युपाꣳशुसवनं प्रत्यभिमृशते । ऽथोन्नेतारमाहाप्रमत्तः संततमानयोपाꣳशु ग्रहान्ग्रहीष्यामीत्य।थादत्त ऐन्द्रवायवपात्रं । तदेतद्राह्लावत्परिग्रीवि भवति । तेन गृह्णात्यतिपवमानस्य राज्ञ आ वायो भूष शुचिपा इत्यनुद्रुत्योपयामगृहीतो ऽसि वायवे त्वा जुष्टं गृह्णामीत्य।थैनमपयत्य[४] पुनरेवोपयच्छतीन्द्रवायू इमे सुता इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्रवायुभ्यां त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः सजोषाभ्यां त्वेत्य।थादत्ते मैत्रावरुणपात्रं । तदेतत्पिलकावद्भवति[५] । तेन गृह्णात्यतिपवमानस्य

---

[१] उपयच्छत्य° BTF Keś.; अपय° HJ.　[२] एव ins. FJ.

[३] अथैनमु° TF Keś.; अथैनदु° BHJP.

[४] अपयत्य H Bh., Keś.; अपनयत्य B; अपनयत्यथ F; उपयत्य JT.

[५] Thus HJ Bh., Keś.; पिलिकावत् T; फलकावद्‌ (*i.e.*, पुल्ल°) B; फलका... F.

राज्ञो ऽयं वां मित्रावरुणेत्यनुद्रुत्योपयामगृहीतो ऽसि मित्रावरुणाभ्यां त्वा जुष्टं गृह्णामीतिˈ बर्हिषी अन्तर्धाय पयसा श्रीणात्यपोद्धृत्य बर्हिषी दशापवित्रेण परिमृज्य सादयत्येष ते योनिरृतायुभ्यां त्वेत्यथोपातीत्याश्विनपात्रꣳ शुक्रपात्रमादत्तेˈ तदेतद्बैल्वं वा पालाशं वा श्लक्ष्णं भवतिˈ तेन गृह्णात्यतिपवमानस्य राज्ञो ऽयं वेनश्चोदयदित्यनुद्रुत्योपयामगृहीतो ऽसि शण्डाय त्वा जुष्टं गृह्णामीतिˈ परिमृज्य सादयत्येष ते योनिर्वीरतां पाहीत्यथादत्ते मन्थिपात्रंˈ तदेतद्वैकङ्कतꣳ श्लक्ष्णं भवतिˈ तेन गृह्णात्यतिपवमानस्य राज्ञस्तं प्रत्नथेत्यनुद्रुत्योपयामगृहीतो ऽसि मर्काय त्वा जुष्टं गृह्णामीतिˈ बर्हिषी अन्तर्धाय सक्तुभिः श्रीणात्यपोद्धृत्य बर्हिषी दशापवित्रेण परिमृज्य सादयत्येष ते योनिः प्रजाः पाहीत्यथादत्त आग्रयणस्थालींˈ तया गृह्णात्यतिपवमानस्य राज्ञो ये देवा दिव्येकादश स्थेत्यनुद्रुत्योपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामीत्यथैनां[1] त्रिरभिहिङ्करोति ॥ ६ ॥

हिं हिं हिं सोमः पवते सोमः पवते सोमः पवते ऽस्मै ब्रह्मणे पवते ऽस्मै क्षत्राय पवते ऽस्मै विशे पवत इषे पवत ऊर्जे पवते ऽद्भ्यः पवत ओषधीभ्यः पवते वनस्पतिभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते ब्रह्मवर्चसाय पवते ऽस्मै सुन्वते यजमानाय पवते मह्यमित्युपाꣳशूक्त्वा ज्यैष्ठ्याय पवत

---

[1] Thus PH ; अथैनं BJT ; अथैनत् F ; अथैन Keś.

इत्युच्चैरथैनमधिवदत आग्रयणो ऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणेति । परिमृज्य सादयत्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्युपब्दिमतो ऽत ऊर्ध्वं ग्रहान्गृह्णाति । त्रिꣳशत्त्रयश्च गणिनो रुजन्त इति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयादिति ब्राह्मणमथादत्त उक्थ्यस्थालीं । तया गृह्णात्यतिपवमानस्य राज्ञ उपयामगृहीतो ऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवे यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वोक्थायुव इत्यथादत्ते ध्रुवस्थालीꣳ । स आह ये पूर्वया द्वारा प्रापत्सत[1] प्राञ्चस्ते निष्क्रामन्तु ये ऽपरया प्रत्यञ्चस्ते मा वो ऽभिपरिहारिषमिति । जघनेनाभिषोतॄन्सोन्नेतृकानभिपरिहृत्योत्तरत उपयच्छति[2] मूर्धानं दिवो अरतिं पृथिव्या इत्यनुद्रुत्योपयामगृहीतो ऽस्यग्नये त्वा वैश्वानराय जुष्टं गृह्णामीत्यथैनमधिवदते ध्रुवो ऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमो ऽच्युतानामच्युतक्षित्तम इत्यथैनद्यथाहृतं[3] प्रतिपर्याहृत्योत्तरस्य हविर्धानस्याग्रेणोपस्तम्भनमनुपोप्ते सादयत्येष ते योनिरग्नये त्वा वैश्वानरायेति । ध्रुवेण राजानं परिदधात्यथोपर्यर्धे द्रोणकलशे परिप्लु पात्रं प्रास्य द्रप्सानु-

---

[1] Thus emended. All MSS. also P Bh., Mantramālā, Prayoga IO, Padārthanirv. have प्रापत्स्यंतः, only T, Keś. प्रापत्स्यतः ।

[2] Thus PBTH Bh.; उत्प्रय॰ F Keś.

[3] अथैनं instead of अथैनद् T; अथैनंयथाहृतं P (pr. m.), अथैनद्यथा॰ P (sec. m).

मन्त्रयते द्रप्सश्चस्कन्द यस्ते द्रप्सो यो द्रप्सो यस्ते द्रप्स इत्यथोन्नेतारमाहारिक्तं पूतभृतं कुरु पवमानस्य ग्रहान्ग्रहीष्यामीति। तच्छुक्लोन्नेता पूतभृतो बिले पवित्रं वितत्य द्वौ वा त्रीन्वा राज्ञ उदचनानानयत्यथारिक्ते पूतभृति पवमानस्य ग्रहान्गृह्णात्युपयामगृहीतो ऽसि प्रजापतये त्वेति द्रोणकलशमभिमृशतीन्द्राय त्वेत्याधवनीयं। विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतमथोन्नेतरित्याह ग्रास्वꣳ राजानं पूतभृतमभि संपवयताद्दशाभिराधवनीयं मृष्ट्वा न्युब्जतादिति। स तथा करोत्यथाप उपस्पृश्य बर्हिषी आदायोपनिःसर्पति। तं निःसर्पन्तमन्वारभत उद्गातोद्गातारं प्रस्तोता। प्रस्तोतारं प्रतिहर्ता। प्रतिहर्तारं यजमानो। यजमानं ब्रह्मा[1]। प्रतिप्रस्थाता सप्तमः सर्पति। तेषु समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति। ॥ ७ ॥

अग्निः प्रातःसवने पात्वस्मान्वैश्वानरो महिना विश्वशंभूः। स नः पावको द्रविणं दधात्वायुष्मन्तः सहभक्षाः स्याम स्वाहेत्येतयाध्वर्यू जुहुतो। यथावेदमितरे जुह्वत्यथोदञ्चो ऽभि पवमानꣳ सर्पन्ति। प्रह्व एवाध्वर्युः प्रथमो बर्हिषी धुन्वानः[2] सर्पति वागग्रेगा अग्र एतृजुगा देवेभ्यो यशो मयि दधती प्राणान्पशुषु प्रजां मयि च यजमाने चेत्यथास्तावे यथायतनमुपविशन्त्यथोद्गात्रे वा प्रस्तोत्रे वा बर्हिषी प्रयच्छत्यृक्सामयो-

---

[1] F (not BHP) ins. ब्रह्माणं ; T ins. अथ।

[2] Thus B, the other MSS. more or less corrupt. धुवानः HF, धवानः P.

रुपस्तरणमसि मिथुनस्य प्रजात्या इति वा तूष्णीं वायोपाकरणं जपति वायुर्हिंकर्ताग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वे देवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनं ते देवाः प्राणभृतः प्राणं मयि दधत्वोꣳ स्तुध्वमिति । स एष त्रिवृद्बहिष्पवमानो भवति । तस्य पञ्चम्यां प्रस्तुतायां वाचयति श्येनो ऽसि गायत्रच्छन्दा अनु त्वारभे स्वस्ति मा संपारयेत्यत्र दशहोतारं व्याचष्ट । उद्गुते साम्नि संप्रैषमाहाग्नीदग्नीन्विहर बर्हिः स्तृणाहि पुरोदाशाꣳ अलंकुरु प्रतिप्रस्थातः पशुरन्तिके ऽस्त्विति । यथासंप्रैषं तौ कुरुतो[1] । ऽथाप उपस्पृश्याहेहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य समस्तꣳ राजानमुपतिष्ठते विष्णो त्वं नो अन्तम इत्यथादत्त आश्विनपात्रं । तदेतद्द्व्यश्रि भवति । तस्मिन्गृह्णाति द्रोणकलशात्परिप्लुना पात्रेण या वां कशेत्यनुद्रुत्योपयामगृहीतो ऽस्यश्विभ्यां त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिर्माध्वीभ्यां त्वेत्यथाप उपस्पृश्याहेहि यजमानेत्याहवनीयं द्रुत्वा स्रुचि चतुर्गृहीतं गृहीत्वा सप्तहोतारं मनसानुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यथावकाशैश्चरति परिभूरग्निं परिभूरिन्द्रमित्येतेनानुवाकेनाथ प्रचरण्यां नवकृत्वो गृह्णीते । ऽथैष आग्नीध्र आग्नीध्रीयाद्धिष्णियादनुपूर्वं[2] धिष्णियेष्वङ्गारान्विहरत्यथ पुरस्तात्प्रत्यङ्ङासीनो विहृतान्धिष्णियान्व्याघारयति यथा-

---

[1] कुर्वतो JF Keś.

[2] Thus JBHP; (Keś: अयानपर्वं); स्वानुपूर्व्यं the other MSS.

न्युप्तैर्मन्त्रैः । स यद्यु ह यथान्युप्तमभिजुहोति सप्त त इत्याग्नीध्रे[१] ऽन्ततो जुहोति । यद्यु वै स्वाहास्वाहेति स्वाहेत्येवान्तत आग्नीध्रीये[१] जुहोत्युदक्सꣳस्थताया इत्यथोत्तरस्य हविर्धानस्य चुबुके प्रचरणीꣳ सादयत्यथ सांकाशिनेन पथा पृष्ठ्याꣳ स्तृणाति संततां गार्हपत्यादाहवनीयात् । ॥ ८ ॥ द्वितीयः ॥

अथाध्वर्यू रशनाहस्तौ यूपमभ्यैत्युदूह्य पूर्वाꣳ रशनां नाभिदघ्ने परिव्ययन्नाह परिवीयमाणायानुब्रूहीति । स्वर्वन्तं यूपमुत्सृज्याग्नेयं पशुमुपाकरोति । समानं कर्मा प्रवरात्प्रसिद्धꣳ होतारं वृणीते । ऽथाश्रावयत्यो श्रावयास्तु श्रौषडश्विनाध्वर्यू आध्वर्यवादित्यहं चासौ च मानुषाविति । प्रतिप्रस्थातुर्नाम गृह्णात्यथाश्रावयत्यो श्रावयास्तु श्रौषण्मित्रावरुणौ प्रशास्तारौ प्रशास्त्रादित्यसौ मानुष इति । मैत्रावरुणस्य नाम गृह्णात्यथाश्रावयत्यो श्रावयास्तु श्रौषडिन्द्रो ब्रह्मा ब्राह्मणादित्यसौ मानुष इति । ब्राह्मणाच्छꣳसिनो नाम गृह्णात्यथाश्रावयत्यो श्रावयास्तु श्रौषण्मरुतः पोत्रादित्यसौ मानुष इति । पोतुर्नाम गृह्णात्यथाश्रावयत्यो श्रावयास्तु श्रौषड् ग्नावो नेष्ट्रादित्यसौ मानुष इति । नेष्टुर्नाम गृह्णात्यथाश्रावयत्यो श्रावयास्तु श्रौषडग्निराग्नीध्रादित्यसौ मानुष इत्यग्नीधो नाम गृह्णाति । तेषां प्रवृतःप्रवृत एव प्रवृताहुतीर्जुहोति । जुष्टो वाचो भूयासमृचा स्तोमꣳ समर्धय सूर्यो मा देवो देवेभ्यः पात्वित्येताभिरध्वर्यू जुहुतो ।

---

१ आग्नीध्रीये PBH, comp. VI. 29 (page 193, 14).

२ आग्नीध्रे TJ.

यथावेदमितरे जुहोत्यथाश्रावयत्यो श्रावयास्तु श्रौषडग्निर्ह[1] दैवीनां विशां पुरएतायꣳ सुन्वन्यजमानो मनुष्याणां तयोरस्थूरि गार्हपत्यं दीदयच्छतꣳ हिमा द्वा यू राधाꣳसीत्संपृञ्चानावसंपृञ्चानौ तन्व इति ˈ समानं कर्मा वपायै ˈ वपया प्रचर्य वपाश्रपणी अनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते ˈ ऽथ यजमानमुत्करे स्फ्यविघनानुपस्थापयति ॥ ९ ॥

स्फ्यः स्वस्तिर्विघनः स्वस्तिः पर्शुर्वेदिः परशुर्नः स्वस्तिः । यज्ञिया यज्ञकृत स्थ ते मास्मिन्यज्ञ उपह्वयध्वमुप मा द्यावापृथिवी ह्वयेतामुपास्तावः कलशः सोमो अग्निरुप देवा उप यज्ञ उप मा होत्रा उपहवे ह्वयन्तामित्यथ नमो ऽग्नये मखघ्ने मखस्य मा यशो ऽर्यादित्याहवनीयमुपतिष्ठते ˈ नमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीध्रं ˈ नम इन्द्राय मखघ्न इन्द्रियं मे वीर्यं मा निर्वधीरिति होत्रीयमथ प्राङावृत्य जपति दृढे स्थः शिथिरे समीची माꣳहसस्पातꣳ सूर्यो मा देवो दिव्यादꣳहसस्पातु वायुरन्तरिक्षादग्निः पृथिव्या यमः पितृभ्यः सरस्वती मनुष्येभ्य इत्यथ प्रदक्षिणमावृत्य पूर्वे द्वारौ सदसः संमृशति देवी द्वारौ मा मा संताप्तमित्यथ सदः प्रपद्यते नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्या इत्यथासनाद्बहिःसदसं तृणं निरस्यत्यहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद यो

---

[1] Comp. IV. 6 (page 116, 13).

ऽस्मत्पाकतर इत्युपविशत्युन्निवत उदुद्वतस्य गेषमित्यथेमे समीक्षेते पातं मा द्यावापृथिवी अद्याह्न इत्यथ दक्षिणार्धं परेक्षत आगन्त पितरः पितृमानहं युष्माभिर्भूयासꣳ सुप्रजसो मया यूयं भूयास्तेत्यथोत्तरार्धं परेक्षत। उदक्सꣳस्थताया इति। ॥ १० ॥

अथेमावध्वर्यू आहवनीयप्रभृत्येवमेवाहवनीयमुपतिष्ठेते। एवमाग्नीध्रीयमेवꣳ होत्रीयमेवं प्राञ्चावावृत्य जपत। एवं प्रदक्षिणमावृत्य पूर्वौ द्वारौ सदसः संसृपत। एवꣳ सदः प्रपद्येते। एवमासनाभ्यां बहिःसदसं तृणे निरस्यतो। दक्षिणमेवाध्वर्युर्द्वार्बाहुं निश्रयमाण उपविशत्युत्तरं प्रतिप्रस्थातैवमिमे समीक्षेते। एवं दक्षिणार्धं चोत्तरार्धं च परेक्षेते। उदक्सꣳस्थताया इत्यथेमे वषट्कर्तार आहवनीयप्रभृत्येवमेवाहवनीयमुपतिष्ठन्त। एवमाग्नीध्रीयं। तमुत्तरेण परियन्त्येवꣳ[२] होत्रीयमेवं प्राञ्च आवृत्य जपन्त्येवं प्रदक्षिणमावृत्य पूर्वौ द्वारौ सदसः संसृपन्त्येवꣳ सदः प्रपद्यन्ते। ऽग्रेण धिष्णियानुत्तरेणाच्छावाकस्य[१] धिष्णियं परीत्यैवमासनेभ्यो बहिःसदसं तृणानि निरस्यन्त्येवꣳ स्वꣳस्वमेव धिष्णियमनूपविशन्त्येवमिमे समीक्षन्त। एवं दक्षिणार्धं चोत्तरार्धं च परेक्षन्त। उदक्सꣳस्थताया इत्यथेमे सर्वे उद्गातारो ब्रह्मा सदस्य इत्यवषट्कर्तार आहवनीयप्रभृत्येवमेवाहवनीयमुपतिष्ठन्त। एवमाग्नीध्रीयं। तमुत्तरेण परियन्त्येवꣳ होत्रीयमेवं

---

[१] BF ins. च।

[२] All the MSS. read here and infra पर्यन्ति।

प्राञ्च आवृत्य जपन्त्येवं प्रदक्षिणमावृत्योत्तरेण सदः परीत्यैवमपरे द्वारौ सदसः संसृपन्त्येवꣳ सदः प्रपद्यन्त । एवमासनेभ्यो बहिःसदसं तृणानि निरस्यन्त्यौदुम्बरीमेवोद्गातारः पर्युपविशन्ति । दक्षिणत उदङ्मुखौ[1] ब्रह्मा सदस्य इत्युपविशत । एवमिमे समीक्षन्त । एवं दक्षिणार्धं चोत्तरार्धं च परेक्षन्त । उदक्सꣳस्थताया इत्य।थैतेषां[2] विसꣳस्थितसंचरो । ऽन्तरेण होतुश्च धिष्ण्यं ब्राह्मणाच्छꣳसिनश्च ये ऽधिष्ण्या । अथ धिष्ण्यवन्तः स्वꣳस्वमेव धिष्ण्यमुत्तरेणोत्तरेण परियन्ति । ते सꣳस्थिते सवने यथाप्रसृप्तमेव विनिःसर्पन्ति । ॥ ११ ॥ तृतीयः ॥

संप्रसृप्तान्विदित्वाध्वर्युः सवनीयान्पुरोडाशान्याचत्य।थ आग्नीध्रो जघनेन गार्हपत्यमुपविश्य पात्र्यां पञ्चधोपस्तृणीते मध्यतः पुरोडाशमुपस्तीर्णाभिघारितमुद्वासयति । पुरस्ताद्धाना । दक्षिणतः करम्भं । पश्चात्परिवाप।मामिक्षामुत्तरतो । ऽथैनानि संपरिगृह्य पूर्वया द्वारोपनिर्हृत्योत्तरेण सदः परीत्योत्तरेणाग्नीध्रीयं धिष्ण्यं पर्याहृत्यान्तर्वेद्यासादयत्य।थ जुहूपभृतोरुपस्तृणान आह प्रातः प्रातःसावस्येन्द्राय पुरोडाशानामवदीयमानानामनुब्रूहीति । द्विः पुरोडाशस्यावद्यति । द्विर्धानानां । द्विः करम्भस्य । द्विः परिवापस्य । द्विरामिक्षाया । अभिघारयति । प्रत्यनक्त्य।थोपभृति स्विष्टकृते सर्वेषाꣳ सकृत्सकृदुत्तरार्धादवद्यति ।

---

[1] Thus HT; ॰मुखो BJFP.

[2] Thus PJBFH Keś.; अथैषां T Bh.

द्विरभिघारयति । न प्रत्यनक्त्यत्याक्रम्याश्राव्याह प्रातः प्रातः-
सावस्येन्द्राय पुरोडाशान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोत्यथ
समावपमान आहाग्नये ऽनुब्रूहीत्याश्राव्याहाग्नये प्रेष्येति । वषट्कृत
उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोत्यथोदङ्ङत्याक्रम्य
यथायतनꣳ स्रुचौ सादयित्वा पात्र्यामिडाꣳ समवधाय प्रतीचः ५
पुरोडाशान्प्रच्छिणोत्यनु हैके संयन्ति पशव इडेति वदन्तो ।
ऽथ प्राङायन्नाह वायव इन्द्रवायुभ्यामनुब्रूहीति । तच्छ्रुत्वा
प्रतिप्रस्थातैन्द्रवायवस्य प्रतिनिर्ग्राह्यं[1] गृह्णाति द्रोणकलशात्परि-
प्लुना पात्रेणादित्यस्थाल्या औपशये पात्र उपयामगृहीतो ऽसि
वाक्षसदसि वाक्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां १०
गृह्णामीति । ग्रहावादायोपनिष्क्रामत्युपनिष्क्रान्तस्यैवाध्वर्युर्ग्रहा-
वादत्त । उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रतिनिर्ग्राह्यं[1] प्रयच्छत्यथ
वै भवत्यैन्द्रवायवमादायाघारमाघारयेदिति । स आज्यस्थाल्याः[2]
स्रुवेणोपहत्यैन्द्रवायवमादायाघारमाघारयत्यध्वरो यज्ञो ऽय-
मस्तु देवा ओषधीभ्यः पशवे नो जनाय विश्वस्मै भूतायाध्वरो १५
ऽसि स पिन्वस्व घृतवद्देव सोम स्वाहेत्यथाश्रावयत्यो श्रावयास्तु
औषड्वायव इन्द्रवायुभ्यां प्रेष्येति । वषट्कृते ऽध्वर्युः पूर्वो जुहोति ।
द्वितीयं वषट्कृते सहोभौ जुहुतो । हुत्वा वाचयति यो न

---

[1] Here and infra, without *y*, BJT Bh. (Grantha MS. and Dev. MS.); प्रतिनिर्ग्राह्यं FHP Dvaidha, Keś., Padārthanirv. (F once without *y*).

[2] ०स्या FH ; ०स्याः BT ; ०स्यां J.

इन्द्रवायू अभिदासति भ्रातृव्य उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्तमश्चेतयानीत्यथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य सꣳस्रावमवनयत्युभयोरर्धमध्वर्युः प्रतिप्रस्थातुः पात्रेऽवनयति । तं प्रतिप्रस्थातादित्यस्थाल्यामवनयति देवेभ्यस्त्वेत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य होत्रे पात्रं प्रदाय प्राङ्गयन्नाह मित्रावरुणाभ्यामनुब्रूहीति । तच्छ्रुत्वा प्रतिप्रस्थाता मैत्रावरुणस्य प्रतिनिर्ग्राह्यं गृह्णाति द्रोणकलशात्परिप्लुना पात्रेणादित्यस्थाल्या औपशये पात्र उपयामगृहीतोऽस्यृतसदसि चक्षुष्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामीति । ग्रहावादायोपनिष्क्रामत्युपनिष्क्रान्तस्यैवाध्वर्युर्ग्रहावादत्त । उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रतिनिर्ग्राह्यं प्रयच्छत्यथाश्रावयत्यो श्रावयास्तु श्रौषण्मित्रावरुणाभ्यां प्रेष्येति । वषट्कृते सहोभौ जुहुतो । हुत्वा वाचयति यो नो मित्रावरुणावभिदासति भ्रातृव्य उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्तमश्चेतयानीत्यथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य सꣳस्रावमवनयत्युभयोरर्धमध्वर्युः प्रतिप्रस्थातुः पात्रेऽवनयति । तं प्रतिप्रस्थातादित्यस्थाल्यामवनयति विश्वेदेवेभ्यस्त्वेत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य होत्रे पात्रं प्रदाय प्राङ्गयन्नाहाश्विभ्यामनुब्रूहीति । तच्छ्रुत्वा प्रतिप्रस्थाताश्विनस्य प्रतिनिर्ग्राह्यं गृह्णाति द्रोणकलशात्परिप्लुना पात्रेणादित्यस्थाल्या औपशये पात्र उपयामगृहीतोऽसि श्रुतसदसि श्रोत्रपाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामीति । ग्रहावादा-

थोपनिष्क्रामत्युपनिष्क्रान्तस्यैवाध्वर्युर्ग्रहावादत्त । उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रतिनिर्ग्राह्यं प्रयच्छत्यथाश्रावयत्यो श्रावयास्तु श्रौषडश्विभ्यां प्रेष्येति । वषट्कृते सहोभौ जुहुतो । हुत्वा वाचयति यो नोऽश्विनावभिदासति भ्रातृव्य उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्तमश्चेतयानीत्यथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य सꣳस्रावमवनयत्युभयोरर्धमध्वर्युः प्रतिप्रस्थातुः पात्रेऽवनयति । तं प्रतिप्रस्थातादित्यस्थाल्यामवनयति विश्वेभ्यस्त्वा देवेभ्य इति । ॥ १२ ॥

स यद्यु हैतैः सꣳस्रावैरुपर्यर्धा स्थाली भवत्येतेनैनां पात्रेणापिदधाति । यद्यु वै नोपर्यर्धा भवति द्रोणकलशादेनामुपर्यर्धां[1] कृत्वैतेनैव पात्रेणापिदधाति विष्णवुरुक्रमैष ते सोमस्तꣳ रक्षस्व तं ते दुश्चक्षा मावख्यदित्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य होत्रे पात्रं प्रदाय प्राङायन्नाहोन्नीयमानेभ्यो ऽनुब्रूहि होतुश्चमसमनून्नयध्वमुभयतःशुक्रान्कुरुध्वमच्छावाकस्य चमसाध्वर्यो मा तु त्वमुन्नेष्ठाः प्रतिप्रस्थातश्चतुर्भिर्मा शकलैः प्रोक्षिताप्रोक्षितैः प्रत्युपलम्बस्वेति । यथासंप्रैषं ते कुर्वन्ति । द्रोणकलशादेव प्रथममुन्नयन्त्यथ[2] पूतभृतो । ऽथ द्रोणकलशात्त उभयतःशुक्रा । होतृचमसमेव प्रथममुन्नयन्ति[3] । यथोपपादमितरान्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथ[4] प्रतिप्रस्थाता चतुर्णाꣳ शकलानां द्वौ

---

[1] Before एनामु° BFHP ins. एव । [2] Thus BHTP; °यत्यथ F.
[3] Thus BFHP °यति T. [4] Thus BHFP Keś.; सादयत्यथ JT.

प्रोक्षति ' द्वावप्रोक्षितौ भवतः ' प्रोक्षिताभ्यामपिधायाप्रोक्षिताभ्यामुपयच्छतः ' शुक्रमेवाध्वर्युरादत्ते ' मन्थिनं प्रतिप्रस्थाता ' ग्रहावादायोपनिष्क्रामतो ' दक्षिणमेवाध्वर्युर्द्वार्बाहुं निश्रयमाण उपनिष्क्रामत्युत्तरं प्रतिप्रस्थाता ' तौ जघनेनोत्तरवेदिं ग्रहौ संधत्त आयुः संधत्तं तन्मे जिन्वतं प्राणꣳ संधत्तं तं मे जिन्वतमपानꣳ संधत्तं तं मे जिन्वतं व्यानꣳ संधत्तं तं मे जिन्वतं चक्षुः संधत्तं तन्मे जिन्वतꣳ श्रोत्रꣳ संधत्तं तन्मे जिन्वतमिति ' षड्भिः संधाभिः संधाय व्युत्क्रामत ' सुतो ऽसि जनधा देवास्त्वा शुक्रपाः प्रणयन्तु सुवीराः प्रजाः प्रजनयन्परीहि शुक्रः शुक्रशोचिषेत्यध्वर्युर्दक्षिणेनोत्तरवेदिं परिक्रामति ' सुतो ऽसि जनधा देवास्त्वा मन्थिपाः प्रणयन्तु सुप्रजाः प्रजाः प्रजनयन्परीहि मन्थी मन्थिशोचिषेति प्रतिप्रस्थातोत्तरेणोत्तरवेदिं परिक्रामति ' तौ पुरस्तात्प्रत्यञ्चावुत्तरवेदिमधिद्रवत इन्द्रेण मयुजो वयꣳ सासह्याम पृतन्यतः । घ्नन्तो वृत्राण्यप्रति ॥ यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते अग्ने हरस्तेनाहꣳ हरस्वी भूयासमित्यथान्तरेण यूपं चाहवनीयं च ग्रहौ संधत्त आयु स्थ आयुर्मे धत्तमायुर्यज्ञाय धत्तमायुर्यज्ञपतये धत्तं प्राण स्थः प्राणं मे धत्तं प्राणं यज्ञाय धत्तं प्राणं यज्ञपतये धत्तमपान स्थो ऽपानं मे धत्तमपानं यज्ञाय धत्तमपानं यज्ञपतये धत्तं व्यान स्थो व्यानं मे धत्तं व्यानं यज्ञाय धत्तं व्यानं यज्ञपतये धत्तं चक्षु स्थश्चक्षुर्मे धत्तं चक्षुर्यज्ञाय धत्तं चक्षुर्यज्ञपतये धत्तꣳ श्रोत्रꣳ स्थः श्रोत्रं मे धत्तꣳ श्रोत्रं यज्ञाय

धत्तꣳ श्रोत्रं यज्ञपतये धत्तमिति षड्भिः संधाभिः संधाय व्युत्क्रामतः ॥ १३ ॥

तौ देवौ शुक्रामन्थिनौ कल्पयतं दैवीर्विशः कल्पयतं मानुषीरिषमूर्जमस्मासु धत्तं प्राणान्पशुषु प्रजां मयि च यजमाने चेत्यथाप्रोक्षितौ शकलौ बहिर्वेदि निरस्यतो निरस्तः शण्डः सहामुनेत्यध्वर्युर्यं यजमानो द्वेष्टि तं मनसा ध्यायति निरस्तो मर्कः सहामुनेति प्रतिप्रस्थाता यं यजमानो द्वेष्टि तं मनसा ध्यायत्यथाप उपस्पृश्य प्रोक्षितावभ्याधत्तः शुक्रैषा ते समित्तया समिध्यस्व स्वाहेत्यध्वर्युर्मन्थिन्नेषा ते समित्तया समिध्यस्व स्वाहेति प्रतिप्रस्थातैतस्मिन्काले चमसाध्वर्यवश्चमसानुपोद्यच्छन्ते ऽथाध्वर्युः पुरस्तात्प्रत्यङ् तिष्ठन्नाश्रावयत्यो श्रावयास्तु श्रौषट् प्रातः प्रातःसावस्य शुक्रवतो मन्थिवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति वषट्कृते सहोभौ जुहुतः स प्रथमः संकृतिर्विश्वकर्मा स प्रथमो मित्रो वरुणो अग्निः । स प्रथमो बृहस्पतिश्चिकित्वान्तस्मा इन्द्राय सुतमाजुहोमि स्वाहेति वषट्कृतानुवषट्कृते द्विर्जुहुतस्तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वत्यथ संप्रैषमाह प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातुः प्र यजमानस्य प्र सदस्यस्य होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्द्रोणकलशादभ्युन्नीयोपावर्तध्वꣳ होतुश्चमसाध्वर्यवुपरमैहि प्रतिप्रस्थातरुत्तरार्ध आहवनीयस्य मन्थिनः सꣳस्रावं जुहुधीति यथासंप्रैषं ते कुर्वन्त्यथ प्रदक्षिणमावृत्य होतृचमसे ग्रहस्य सꣳस्रावमवनयति हुतं त्वा हुते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति

वा तूष्णीं वाथ प्रतिप्रस्थातोत्तरार्ध आहवनीयस्य मन्थिनः सꣳस्रावं जुहोत्येष ते रुद्र भागो यं निरयाचथास्तं जुषस्व विदेर्गौपत्यꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिꣳ स्वाहेत्यथाप उपस्पृश्य शुक्रपात्रं च मन्थिपात्रं च खरे यथायतनꣳ सादयति । यन्त्येते[१] महर्त्विजां चमसा । अथैते होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्द्रोणकलशादभ्युन्नीयोपावर्तन्ते । तेषां मैत्रावरुणचमसमादायाश्राव्याह प्रशास्तर्यजेति । वषट्कृतानुवषट्कृते द्विजहोति । ब्रह्मन्यज पोतर्यज नेष्टर्यजाग्नीद्यजेति पञ्च होत्राः संयाज्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्याग्रेण होतारमुपविशत्ययाडग्नीदिति । स भद्रमकरित्याह होता यो नः सोमꣳ राजानं पाययिष्यतीत्यथ होतादत्त ऐन्द्रवायवपात्रमात्तमेवाध्वर्युरन्वारभते । ऽन्वारब्धे ऽध्वर्यौ होतोपहवमिष्ट्वा भक्षयति यथा स वेद । तथान्वारब्धे होतर्यध्वर्युरुपहवमिष्ट्वा भक्षयति मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहीत्यथ होता भक्षयत्यथाध्वर्युरथैनद्धोत्रे ऽनुषजति । तद्धोता यथायतनꣳ सादयत्यथ होतादत्ते मैत्रावरुणपात्रमात्तमेवाध्वर्युरन्वारभते । ऽन्वारब्धे ऽध्वर्यौ होतोपहवमिष्ट्वा भक्षयति यथा स वेद । तथान्वारब्धे होतर्यध्वर्युरुपहवमिष्ट्वा भक्षयति मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाहीत्यथैनद्धोत्रे ऽनुषजति । तद्धोता यथायतनꣳ सादयत्यथ होतादत्त आश्विनपात्रमात्तमेवाध्वर्युरन्वारभते ।

---

[१] Thus (सादयतियंत्येते) PHT and Keś.; the other MSS. सादयंत्येते (B) or सादयत्येते JF.

ऽन्वारब्धे ऽध्वर्यौ होतोपहवमिष्ट्वा भक्षयति यथा स वेद' तथान्वारब्धे होतर्यध्वर्युरुपहवमिष्ट्वा भक्षयति मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहीति' सर्वतः परिहारमाश्विनं भक्षयतीति ब्राह्मणमथैनद्धोत्रे ऽनुषजति' तद्धोता यथायतनꣳ सादयत्यथाप उपस्पृश्य होत्र इडामुपोद्यच्छन्ते' ॥ १४ ॥

उपहूयमानायामिडायामुपप्रगृह्णन्ति चमसानुपहूतायामिडायामनाहितमग्नीध्रे भवत्यथैतानि द्विदेवत्यपात्राण्यरिक्तानि करोति' पुरोडाशशकलमैन्द्रवायवपात्रे प्रास्यत्यामिक्षां मैत्रावरुणपात्रे' धाना आश्विनपात्रे' ऽथैनानि संपरिगृह्य पूर्वया द्वारोपनिर्हृत्यापरया द्वारा हविर्धानं प्रपाद्य दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्याꣳ सादयति' तान्या तृतीयसवनात्परिशेरे' ऽथाग्नीध्र आदधाति षडवत्तं' प्राश्नन्ति' मार्जयन्त' इडोपहूताꣳश्चमसान्भक्षयन्ति भक्षेहि माविशेति दीर्घभक्षमनुद्रुत्य वसुमद्गणस्य सोम देव ते मतिविदः प्रातःसवनस्य गायत्रच्छन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति' होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति' यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्त' आप्याययन्ति चमसानाप्यायस्व समेतु त इति' सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽध[1] ऐन्द्राग्नायाथैषो ऽच्छावाको ऽग्रेण सद आस्ते' तस्मै महत्पुरोडाशशकलमादधदाहाच्छावाक[2]

---

[1] Thus PHJF Bh. Keś.; °वालंब° B; °वा° or °पा° T (Grantha!)

[2] Thus JHFP; °वदधद्° B; °पदथद° T.

वदस्व यत्ते वाद्यमिति । स यत्राच्छावाकस्याभिजानात्युपो अस्मान्ब्राह्मणान्ब्राह्मणा ह्वयध्वमिति तदाह होतरच्छावाको वा अयमुपहवमिच्छते तमुपह्वयस्वेति । तमृचा होतोपह्वयते । ऽथ प्राङायन्नाहोन्नीयमानायानुब्रूह्यच्छावाकस्य चमसाध्वर्यवुन्नयस्वोभयतःशुक्रं कुरुष्वेति । स तथा करोत्यथ प्राङेत्याच्छावाकचमसमादायाश्राव्याहाच्छावाक यजेति । वषट्कृतानुवषट्कृते हुत्वा हरति भक्षꣳ । स यद्यस्मिन्नच्छावाक उपहवमिच्छत उपैवैनꣳ ह्वयते । नो त्वेव संभक्षयतः[1] । सीदत्यस्य नाराशꣳस आप्यायितो । ऽथाहाच्छावाक सीद नेष्टः पत्नीमुदानयाग्नीदच्छावाकं मे सन्नं प्रब्रूतादिति । सीदत्येषो ऽच्छावाको जघनेन स्वं धिष्णियमानयति नेष्टा पत्नीं पन्नेजनीरादाय[2] प्रेह्युदेहीत्येतेन निगदेनाथैनां पूर्वया द्वारोपनिष्क्रमय्यापरया द्वारा सदः प्रपाद्य जघनेन नेष्टुर्धिष्णियमसंचरे सामपथे पन्नेजनीः[3] सादयति वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यः पन्नेजनीः सादयामि यज्ञाय वः पन्नेजनीः सादयामीत्यथाहाग्नीध्रः सन्नो ऽच्छावाको ऽच्छावाकꣳ सन्नमुप पन्नेजनीरसीषदन्नित्येतस्मिन्काल आग्नीध्रे यजमानः पुरोडाशानां प्राश्नाति । यदशना स्यात्पत्नी पत्नीशाले । ॥ १५ ॥ चतुर्थः ॥

---

[1] Thus HJF Bh. Keś.; ०भक्षयति BT.

[2] Thus F; पान्नेजनी० BT; पान्नेजनं कलशं instead of पन्नेजनीर् HP, comp. VII. 3 (page 203. 10).

[3] Thus all except J, which has पान्नेजनीः।

अथर्तुपात्रे आददाते दक्षिणमेवाध्वर्युरुत्तरं प्रतिप्रस्थाताध्वर्युः पूर्वो वायव्येन द्रोणकलशाद्गृह्णात्युपयामगृहीतो ऽसि मधवे त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाता गृह्णात्युपयामगृहीतो ऽसि माधवाय त्वा जुष्टं गृह्णामीति। ग्रहावादायोपनिष्क्रामतो। दक्षिणमेवाध्वर्युर्द्वार्बाहुं निश्रयमाण उपनिष्क्रामत्युत्तरं प्रतिप्रस्थाता द्वार्बाहुं निश्रयमाण उपरमत्यथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता। प्रपद्यते ऽध्वर्युः। स गृह्णात्युपयामगृहीतो ऽसि शुक्राय त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येवाध्वर्युः। प्रपद्यते प्रतिप्रस्थाता। स गृह्णात्युपयामगृहीतो ऽसि शुचये त्वा जुष्टं गृह्णामीत्यथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता। प्रपद्यते ऽध्वर्युः। स गृह्णात्युपयामगृहीतो ऽसि नभाय त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येवाध्वर्युः। प्रपद्यते प्रतिप्रस्थाता। स गृह्णात्युपयामगृहीतो ऽसि नभस्याय त्वा जुष्टं गृह्णामीत्यथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता। प्रपद्यते ऽध्वर्युर्विपर्यस्य पात्रे। स गृह्णात्युपयामगृहीतो ऽसीषाय त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येवाध्वर्युः। प्रपद्यते प्रतिप्रस्थाता विपर्यस्य

पात्रꣳ। स गृह्णात्युपयामगृहीतोऽस्यूर्जाय त्वा जुष्टं गृह्णामीत्यथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुभिः प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता। प्रपद्यतेऽध्वर्युः। स गृह्णात्युपयामगृहीतोऽसि सहाय त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुभिः प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येवाध्वर्युः। प्रपद्युते प्रतिप्रस्थाता। स गृह्णात्युपयामगृहीतोऽसि सहस्याय त्वा जुष्टं गृह्णामीत्यथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुभिः प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता। प्रपद्यतेऽध्वर्युर्विपर्यस्य पात्रꣳ। स गृह्णात्युपयामगृहीतोऽसि तपाय त्वा जुष्टं गृह्णामीत्यथ प्रतिप्रस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुभिः प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येवाध्वर्युः। प्रपद्यते प्रतिप्रस्थाता विपर्यस्य पात्रं। तमाह प्रतिप्रस्थातरुपैतेन पात्रेण रमेत्यथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येत्यध्वर्यू यजतमित्याह प्रशास्ता। होतरेतद्यजेत्याहाध्वर्युर्वषट्कृते जुहोति। सोऽत्रैवासीनं प्रतिप्रस्थातारमनुप्रपद्यते। प्रतिप्रस्थातात्र पूर्वो गृह्णात्युपयामगृहीतोऽसि तपस्याय त्वा जुष्टं गृह्णामीत्यथाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि सꣳसर्पोऽस्यꣳहस्पत्याय त्वा जुष्टं गृह्णामीति। ग्रहावादायोपनिष्क्रामतो। दक्षिणमेवाध्वर्युर्दार्वाङ्गं निश्रयमाण उपनिष्क्रामत्युत्तरं प्रतिप्रस्थाता[१]। प्रतिप्रस्थातात्र श्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। गृहपते यजेत्याह प्रशास्ता।

---

[१] om. BT.

होतरेतद्यजेत्याह गृहपतिर्वषट्कृते सहोभौ जुहुतो । ऽथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य सꣳस्रावमवनयति[१] । तमाह प्रतिप्रस्थातरेतेन पात्रेणैन्द्राग्नं ग्रहं गृहाणेति । तेन प्रतिप्रस्थातैन्द्राग्नं ग्रहं गृह्णाति द्रोणकलशात्परिप्लुना पात्रेणैन्द्राग्नी आगतꣳ सुतमित्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राग्निभ्यां त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राग्निभ्यां त्वेत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य होत्रैतत्पात्रꣳ संभक्षयत्यृतुना पीतस्येति होत्रा पोत्रा नेष्ट्राग्नीधा ब्राह्मणाच्छꣳसिना मैत्रावरुणेनेत्यथ विपर्यस्य पात्रꣳ होत्रैव चतुः संभक्षयत्यृतुभिः पीतस्येति होत्रा पोत्रा नेष्ट्राच्छावाकेनेत्यथ विपर्यस्यैव[२] पात्रꣳ होत्रैव द्विः संभक्षयत्यृतुना पीतस्येति । ॥ १६ ॥

अथ होतारं विपृच्छति प्रणवमुपाꣳशुशꣳसꣳ शꣳसिष्यसी३ विग्राह्या३मिति । स यथैनꣳ होता प्रत्याह तच्छ्रुत्वा निगृह्य पात्रं पराङावर्तत । इडा देवहूरिति यावदेतस्य यजुषः पर्याप्नोति तावज्जपत्यभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणाति । यदुपाꣳशु शꣳसति तदुपाꣳशु प्रतिगृणाति । यदुच्चैः शꣳसति तदुच्चैः प्रतिगृणाति । संततं वा विग्राहं वा । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतमैन्द्राग्नं ग्रहमनूद्यच्छन्ते नाराशꣳसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव

---

[१] B here and infra संपातम् instead of सꣳस्रावम् (once सꣳस्रावम्) ।

[२] एव om. JT.

द्विर्द्विर्नाराशꣳसाननुप्रकम्पयन्त्येतत्पात्रं नाराशꣳसा अन्वायन्त्यनुसवनभक्ष इन्द्राग्निभ्यां पीतस्येति । होता चैवाध्वर्युश्चैतत्पात्रꣳ संभक्षयतो नराशꣳसपीतेन[1] नाराशꣳसान्नराशꣳसपीतस्य[2] सोम देव ते मतिविदः प्रातःसवनस्य गायत्रच्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ति । आप्याययन्ति चमसानाप्यायस्व समेतु त इति । सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो वैश्वदेवायाथ प्राङेत्य शुक्रपात्रमाददान आहोन्नेतर्यदेमं वैश्वदेवं ग्रहं गृह्णाम्यथोदञ्चꣳ राजानं पूतभृतमभि संपवयताद्दशाभिर्द्रोणकलशं मृष्ट्वा न्युब्जतादिति । स तथा करोति । स शुक्रपात्रेण वैश्वदेवं कलशाद्गृह्णात्योमासश्चर्षणीधृत इत्यनुद्रुत्योपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते वैश्वदेवाय । होत्र एषोत्तमेति प्राक्होतुः कालात्पराङावर्ततेऽध्वर्युरभ्येनमाह्वयते होता । प्रत्याह्वयतेऽध्वर्युः । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं वैश्वदेवं ग्रहमनूद्यच्छन्ते नाराशꣳसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानु-

---

[1] Thus PBH Bh. Keś.; नारा॰ the other MSS.

[2] Thus, नराशꣳसपीतस्य PB Bh, Keś. Mantramālā.

वषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशꣳसाननुप्रकम्पयन्त्येतत्पात्रं नाराशꣳसा अन्वायन्त्यनुसवनभक्षो विश्वैर्देवैः पीतस्येति । होता चैवाध्वर्युश्चैतत्पात्रꣳ संभक्षयतो नराशꣳसपीतेन[1] नाराशꣳसा-नरशꣳसपीतस्य[1] सोम देव ते मतिविदः प्रातःसवनस्य गायत्रच्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथाह प्रतिप्रस्थातरिमे चर्तुपात्रे एतस्य शुक्रपात्रं मार्जालीये मार्जयित्वा पात्रेष्वपिसृजेति । स तथा करोत्यथ प्राङायन्नाह ॥ १७ ॥

मैत्रावरुणस्य चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति । मैत्रावरुणचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्त्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथादत्त उक्थ्यस्थाल्या औपशयं पात्रं । तस्मिन्नेतस्य राजस्तृतीयवेलां गृह्णाति य उक्थ्यस्थाल्यां भवत्युपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थ्येभ्य उक्थायुवं[2] यज्ञस्यायुषे मित्रावरुणाभ्यां त्वा जुष्टं गृह्णामीति । पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमृशति । परिमृज्य सादयत्येष ते योनिर्मित्रावरुणाभ्यां त्वेत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । मैत्रावरुणा-

---

[1] The various readings as supra, page 229,3 ; HJ om. the bhakṣaṇamantra.

[2] Here and infra the MSS. have sometimes उक्थेभ्य and उक्थ्यायुवं ।

यैषोत्तमेति प्राङ्मैत्रावरुणस्य कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते मैत्रावरुणः । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं ग्रहमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वत्यथ प्रदक्षिणमावृत्य मैत्रावरुणस्य चमसे ग्रहस्य सꣳस्रावमवनयति हुतं त्वा हुते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वाचैवैतत्पात्रमुपनिधाय भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्षो मित्रावरुणाभ्यां पीतस्येति । मैत्रावरुणचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथाह प्रतिप्रस्थातर्ग्रहौ ते प्रचरेति । तच्छ्रुत्वा प्रतिप्रस्थाता प्राङायन्नाह ॥ १८ ॥

ब्राह्मणाच्छꣳसिनश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति । ब्राह्मणाच्छꣳसिनश्चमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्त्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथादत्त उक्थ्यस्थाल्या औपशयं पात्रं । तस्मिन्नेतस्य राज्ञो ऽर्धवेलां गृह्णाति य उक्थ्यस्थाल्यां भवत्युपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थ्येभ्य उक्थायुवं यज्ञस्यायुष इन्द्राय त्वा जुष्टं गृह्णामीति । पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमृशति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वेत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् हुत्वा स्तोत्रमुपाकरोति । स्तुवते । ब्राह्मणाच्छꣳसिन

एषोतमेति प्राङ्ब्राह्मणाच्छꣳसिनः कालात्पराङावर्तते प्रतिप्रस्थाताभ्येनमाह्वयते ब्राह्मणाच्छꣳसी । प्रत्याह्वयते प्रतिप्रस्थाता । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं ग्रहमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुहोत्यथ प्रदक्षिणमावृत्य ब्राह्मणाच्छꣳसिनश्चमसे ग्रहस्य सꣳस्रावमवनयति ऋतं त्वा ऋते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वान्नैवैतत्पात्रमुपनिधाय भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण पीतस्येति । ब्राह्मणाच्छꣳसिनश्चमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथ प्राङायन्नाह ॥ १९ ॥

अच्छावाकस्य चमसमनून्नयध्वमुन्नेतः सर्वश एव राजानमुन्नय मातिरीरिचः प्रतिप्रस्थातरुपैतेन ग्रहेण रमेहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्याथैतच्चर्म फलकयोः प्राचीनग्रीवमुत्तरलोमोपस्तृणाति यज्ञ प्रतितिष्ठेति वा तूष्णीं वा । तस्मिन्संमुखान्ग्राव्णः कृत्वा दक्षिणस्य हविर्धानस्यान्तरेणेषे राजानमुपावहरति हृदे त्वा मनसे त्वा सोम राजन्नेह्यवरोहेति द्वाभ्यामथैनमुद्गृह्य प्राञ्चस्तस्मिꣳश्चेष्टन्ति यत्ते विदुरथोदुञ्च्याधवनीयमर्धं वसतीवरीणामवनयत्यर्धमेकधनानां । पुरोऽक्षं वसतीवरीः सादयति । पश्चादक्षमेकधनानच्छावाकचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्सर्वश एव राजानꣳ

समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथादत्त उक्थ्यस्थाल्या औपशयं पात्रं। तस्मिन्नेतꣳ सर्वंश एव राजानं गृह्णाति य उक्थ्यस्थाल्यां भवत्युपयामगृहीतोऽसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवं यज्ञस्यायुष इन्द्राग्निभ्यां त्वा जुष्टं गृह्णामीति। नात्र पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमृशति। दशाभिरेवैनां मृष्ट्वा न्युब्जति। परिमृज्य सादयत्येष ते योनिरिन्द्राग्निभ्यां त्वेत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति। स्तुवते। ऽच्छावाकायैषोत्तमेति प्राङ्ङच्छावाकस्य कालात्पराङावर्तते प्रतिप्रस्थाताभ्येनमाह्वयते ऽच्छावाकः। प्रत्याह्वयते प्रतिप्रस्थाता। शꣳसति। प्रतिगृणाति। प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं ग्रहमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति। वषट्कृतानुवषट्कृते द्विर्जुहोति। तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुहोत्यथ प्रदक्षिणमावृत्याच्छावाकस्य चमसे ग्रहस्य सꣳस्रावमवनयति ऋतं त्वा ऋते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वात्रैवैतत्पात्रमुपनिधाय भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्राग्निभ्यां पीतस्येत्यच्छावाकचमसमेवैते त्रयः समुपहूय भक्षयन्ति। यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते। नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते। ऽथोक्थशा इत्याह। प्रातःसवनं प्रतिगीर्य प्रशास्तः प्रसुहीति। सर्पतेत्याह प्रशास्ता। संतिष्ठते प्रातःसवनम्। ॥ २० ॥ पञ्चमः ॥

॥ इति सप्तमः प्रश्नः ॥

प्रसर्पन्ति माध्यंदिनाय सवनाय देवी द्वारावित्यत
एवोर्ध्वेन । संसृप्तान्विदित्वाध्वर्युः प्राङायन्नाहाभिषोतार एत[1]
क्षयत[1] ग्रावस्तुतमेहि[2] यजमानेति । पूर्वया द्वारा हविर्धानं
प्रपाद्य होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तासु तथैव
निग्राभ्यासु यजमानं वाचयति । तास्तथैव यजमानाय संप्रदाय ५
ग्रावाणमादत्ते ऽन्यमुपाꣳशुसवनात्तं तथैव प्राञ्चं प्रश्रित्य विस्रस्य
राजानं ग्रावाणमभि मिमीत इन्द्राय त्वेन्द्राय त्वेति । पञ्चकृत्वो
यजुषा पञ्चकृत्वस्तूष्णीं । दशकृत्वो मिमानः सर्वश एव राजानं
मिमीते । ऽद्भिरभ्युक्ष्य ग्रावस्तुत उष्णीषं प्रयच्छत्यद्भिरेवाभ्युक्ष्या-
ध्वर्योरावसथं वासो हरन्ति[3] । तथा मितꣳ राजानꣳ होतृ- १०
चमसीयाभिरुपसृजति । तथा संप्रयौति । तथा तिरश्चर्मन्फलके
अभिमृशति । तथा वृद्धीर्वाचयति । नाचाꣳशून्सचते । घोषवन्त
एवाभिषुण्वन्तीहा३ इहा३ इहेति[4] । तदेव सद्विनयन्तीहा३[5] इह
इहा३ इह इहा३ इहेत्यथ संभरणीये निष्कीडयन्तीहा३ इहा३
इहेत्यथैनꣳ सुसंभृतꣳ संभरणाꣳ संभृत्योन्नेत्र उत्प्रयच्छति । १५

---

[1] Thus PB TH Mantramālā.

[2] Thus PTFH Bh., Mantramālā, Padārthanirv., ॰स्तुतएहि BJ Keś.

[3] Thus BHTP Bh ; हरति F.

[4] Here and l. 13, 14 BP have the pluti sign also after the last इह (thus: इहा३ इति).

[5] Uncertain reading. BT तदेवषद्विनयंती॰; H : तदेवसद्विम्नियंती॰ ; F : तदेत्यथैवद्विर्णयंती॰ ; P: तदेवसद्विनयंत इह ; Bh. and Keś. give no help (विहृत्य नयन्ति, Bh.)

तमुन्नेताधवनीये ऽवनयत्येवमेव द्वितीयः पर्यायः संतिष्ठत । एवं तृतीयस्।तृतीयस्य तृतीये बृहदुपयन्ति बृहद्बृहद्बृहदित्।यृजीषमन्ततो दशापवित्रेण परिवेष्ट्योन्नेत्र उत्प्रयच्छति । तदुन्नेताधवनीये[1] विचाल्य प्रपीड्य दक्षिणस्य हविर्धानस्यान्तरेणोषे उपावहृत्य[2] चर्मणि निदधाति । तस्मिꣳस्तथैव संमुखान्ग्राव्णः कृत्वा चतुर्धैतदृजीषं ग्रावमुखेभ्यो व्यपोहति । तथोद्गाता[3] वा प्रस्तोता वा दक्षिणस्य हविर्धानस्य पश्चादक्षमुपसृप्य प्राञ्चं ग्रावसु द्रोणकलशमभ्यूहति । तस्मिꣳस्तथैवोदीचीनदशं दशापवित्रं वितत्य प्रसिद्धꣳ शुक्रामन्थिनौ ग्रहौ गृह्णात्।यथर्तुपात्राभ्यां द्वौ मरुत्वतीयौ ग्रहौ गृह्णाति ॥ १ ॥

मरुत्वन्तं वृषभं वावृधानमिन्द्र मरुत्व इह पाहि सोममिति द्वाभ्याम।थोपरिष्टादाग्रयणमानीयाधस्तादुपगृह्णाति । तं तथैव त्रिरभिहिङ्कृत्य परिमृज्य सादयति । तथोक्थ्यं गृह्णात्।युक्थ्येन राजानं परिदधाति । तथोपर्यर्धे द्रोणकलशे परिप्लु पात्रं प्रास्य द्रप्साननुमन्त्रयते द्रप्सश्चस्कन्द यस्ते द्रप्सो यो द्रप्सो यस्ते द्रप्स इति । तथोन्नेतारमाहरिक्तं पूतभृतं कुरु पवमानस्य ग्रहान्ग्रहीष्यामीति । तथारिक्ते पूतभृति पवमानस्य ग्रहान्गृह्णात्युपयामगृहीतो ऽसीन्द्राय त्वेति द्रोणकलशमभिमृशती।न्द्राय त्वेत्या।धवनीयमि।न्द्राय त्वेति पूतभृतं । तथोन्नेतरित्याह प्राञ्चꣳ राजानं पूतभृतमभि संपवयतादृशाभिराधवनीयं मृद्वा न्युब्जता-

---

[1] Some MSS. : तमुन्नेता॰ ।

[2] उपातिहृत्य F; उपावहृत्य BHP, comp. p. 208, 12.

[3] यथोद्गाता H.

दिति । स तथा करोति । तथाप उपस्पृश्य बर्हिषी आदायोपनिःसर्पति । तेषु तथैव समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति । विश्वे देवा मरुत इन्द्रो अस्मानस्मिन्द्वितीये सवने न जह्युः । आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानाꣳ सुमतौ स्याम स्वाहेत्येतयाध्वर्यू जुहुतो । यथावेदमितरे जुह्वत्यथ प्रदक्षिणमावृत्य सदो ऽभि पवमानꣳ सर्पन्ति[1] । तथा[1] सदसि यथायतनमुपविशन्ति । तथोद्गात्रे वा प्रस्तोत्रे वा बर्हिषी प्रयच्छत्यृक्सामयोरुपस्तरणमसि मिथुनस्य प्रजात्या इति वा तूष्णीं वा । तथोपाकरणं जपति वायुर्हिङ्कर्तेति । स एष पञ्चदशो माध्यंदिनः पवमानो भवति । तस्याष्टम्यां प्रस्तुतायां वाचयति सुपर्णो ऽसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा संपारयेत्यथ चतुर्होतारं व्याचष्ट । उद्दुते साम्नि संप्रैषमाहाग्नीदग्नीन्विहर बर्हिः स्तृणाहि पुरोडाशाꣳ अलंकुरु प्रतिप्रस्थातर्दधिघर्माय दध्याहरेति । यथासंप्रैषं तौ कुरुतस्तथाप[2] उपस्पृश्याहेहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य तथा समस्तꣳ राजानमुपतिष्ठते । तथावकाशैश्चरति । तथा प्रचरण्यां नवकृत्वो गृह्णीते । तथैष आग्नीध्र आग्नीध्रीयाद्धिष्ण्यादनुपूर्वं[3] धिष्ण्येष्वङ्गारान्विहरति । तथा पुरस्तात्प्रत्यङ्ङासीनो विहृतान्धिष्ण्यान्व्याघारयति । तथोत्तरस्य हविर्धानस्य चुबुके प्रचरणीꣳ

---

[1] प्रसर्पन्त्यथ BJ.

[2] Thus BT ; कुरुतीथाप the other MSS. ; J corrupt.

[3] Thus BJHP , आनपूर्वं F ; आनुपूर्वं T.

सादयति' तथा सांकाशिनेन पथा पृष्ठ्याꣳ स्तृणाति संततां गार्हपत्यादाहवनीयात्' ॥ २ ॥

अथान्तरेण हविर्धाने उपविश्य दधिघर्माय दधि याचति' तदाहृतमवेक्षते ज्योतिरसि वैश्वानरं पृश्नियै दुग्धमिति' बर्हिषी अन्तर्धाय कꣳसे वा चमसे वा गृह्णाति यावती द्यावापृथिवी महित्वा यावच्च सप्त सिन्धवो वितस्थुः । तावन्तमिन्द्र ते ग्रहꣳ सहोर्जा गृह्णाम्यस्तृतमित्य'पोद्धृत्य बर्हिषी अथैनꣳ श्रीणाति वाक् च त्वा मनश्च श्रीणीतां प्राणश्च त्वापानश्च श्रीणीतां चक्षुश्च त्वा श्रोत्रं च श्रीणीतां दक्षश्च त्वा बलं च श्रीणीतामोजश्च त्वा सहश्च श्रीणीतामायुश्च त्वा जरा च श्रीणीतामात्मा च त्वा तनूश्च श्रीणीताꣳ शृतो ऽसि शृतंकृतः शृताय त्वा शृतेभ्यस्त्वा शृतं कृण्वित्य'थाह होतर्वदस्व यत्ते वाद्यमित्य'थैनमादायोपोत्तिष्ठन्नाह आतꣳ हविरित्य'त्याक्रम्याश्राव्याह दधिघर्मस्य यजेति' वषट्कृते जुहोति यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः । यो देवानां देवतमस्तपोजास्तस्मै त्वा तेभ्यस्त्वा स्वाहेत्य'नुवषट्कृते हुत्वा हरति भक्षꣳ' स यावन्तः प्रवर्ग्यस्यर्त्विजस्तेषूपहवमिष्ट्वा यजमान एव प्रत्यक्षं भक्षयति मयि त्यदिन्द्रियं महन्मयि दक्षो मयि क्रतुः । मयि धायि सुवीर्यं त्रिशुग्घर्मो विभातु मे ॥ आकूत्या मनसा सह विराजा ज्योतिषा सह । यज्ञेन पयसा सह ब्रह्मणा तेजसा सह । क्षत्रेण यशसा सह सत्येन तपसा सह । तस्य दोहमशीमहि तस्य सुम्नमशीमहि । तस्य भक्षमशीमहि तस्य त इन्द्रेण पीतस्य मधुमत

उपहूतस्योपहूतो भक्षयामीति। निर्णिज्य पात्रं प्रयच्छति। तथा सवनीयान्पुरोडाशान्याचति। तेषां तथैव समवद्यन्नाह माध्यंदिनस्य सवनस्येन्द्राय पुरोडाशानामवदीयमानानामनुब्रूहीति। पूर्वार्धादवदायापरार्धादवद्यत्य।भिघारयति। प्रत्यनक्ति। तथोपभृति स्विष्टकृते सर्वेषाꣳ सकृत्सकृदुत्तरार्धादवद्यति। ५
द्विरभिघारयति। न प्रत्यनक्त्य।त्याक्रम्याश्राव्याह माध्यंदिनस्य सवनस्येन्द्राय पुरोडाशान्प्रस्थितान्प्रेष्येति। वषट्कृते जुहोति। तथा समावपमान आहाग्नये ऽनुब्रूहीत्य।श्राव्याहाग्नये प्रेष्येति। वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोति। तथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा तथैव पात्र्यामिडाꣳ १०
समवधाय प्रतीचः पुरोडाशान्प्रहिणोत्य।नु हैके संयन्ति पशव इडेति वदन्तो। ऽथ प्राङायन्नाहोन्नीयमानेभ्यो ऽनुब्रूहि ॥ ३ ॥

होतुश्चमसमनून्नयध्वमुभयतःशुक्रान्कुरुध्वमच्छावाकस्य चमसाध्वर्यो ऽपि त्वमुन्नयस्व प्रतिप्रस्थातश्चतुर्भिर्मा शकलैः ओचिताप्रोचितैः प्रत्युपलम्बस्वेति। यथासंप्रैषं ते कुर्वन्ति। समानं १५
कर्माश्रावणा।दाश्रावण एव[1] व्येत्य।थाध्वर्युः[1] पुरस्तात्प्रत्यङ् तिष्ठन्नाश्रावयत्यो श्रावयास्तु श्रौषण्माध्यंदिनस्य सवनस्य निष्केवल्यस्य भागस्य शुक्रवतो मन्थिवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति। वषट्कृते सहोभौ जुहुतः स प्रथमः संकृतिर्विश्वकर्मेति।

---

[1] Uncertain reading and interpunction; एववेत्यथा॰ BJ; एवेत्यथा॰ T Keś.; एव--त्यथा॰ F; एवैतितथा॰ HP; Bhavasvāmin: एव व्यैति भिद्यत इत्यर्थः. A Prayoga: एवव्यति भिद्यत इत्यर्थः (Grantha).

वषट्कृतानुवषट्कृते द्विर्जुह्वतस्तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वति । तथा संप्रैषमाह प्रैतु होतुश्चमसः प्र ब्रह्मण इति । तथा[1] प्रदक्षिणमावृत्य होतृचमसे ग्रहस्य सꣳस्रावमवनयति हुतं त्वा हुते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वा । तथा प्रतिप्रस्थातोत्तरार्ध आहवनीयस्य मन्थिनः सꣳस्रावं जुहोति । तथाप उपस्पृश्य शुक्रपात्रं च मन्थिपात्रं च खरे यथायतनꣳ सादयति । यन्त्येते सहर्त्विजां चमसास्तथैते होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्द्रोणकलशादभ्युन्नीयोपावर्तन्ते । तेषां तथैव मैत्रावरुणचमसमादायाश्राव्याह प्रशास्तर्यजेति । वषट्कृतानुवषट्कृते द्विर्जुहोति । ब्रह्मन्यज पोतर्यज नेष्टर्यजाच्छावाक यजाग्नीध्यजेति । षड्ढोत्राः संयाज्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्याग्रेण होतारमुपविशत्ययाडग्नीदिति । स भद्रमकरित्याह होता यो नः सोमꣳ राजानं पाययिष्यतीति । तथाप उपस्पृश्य होत्र इडामुपोद्यच्छन्ते । उपह्वयमानायामिडायामुपप्रगृह्णन्ति चमसानुपहूतायामिडायामग्नीध आदधाति षडवत्तं । प्राश्नन्ति । मार्जयन्ते । इडोपहूताꣳश्चमसान्भक्षयन्ति भक्षेहि माविशेति दीर्घभक्षमनुद्रुत्य रुद्रवद्गणस्य सोम देव ते मतिविदो माध्यंदिनस्य सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते ।

---

[1] तथैव H.

आप्याययन्ति चमसानाप्यायस्व समेतु त इति ' सौदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधो[1]ऽधस्तृतीयाय मरुत्वतीयायै'तस्मिन्काल आग्नीध्रे यजमानः पुरोडाशानां प्राश्नाति ' यदशना स्यात्पत्नी पत्नीशाले '

॥ ४ ॥ प्रथमः ॥

अथ दाक्षिणानि होष्यन्याचत्याज्यस्थालीꣳ सस्रुवाꣳ स्रुचं वासस्तस्यैतस्य वसनस्यान्तमायां दशायां हिरण्यशल्कः प्रग्रथितो भवत्ये'तत्समादायाहेहि यजमानेत्यु'त्तरेणाग्नीध्रीयं परीत्योत्तरेण सदः परीत्य पूर्वया द्वारा शालां प्रपाद्य समन्वारब्धेष्वपिव्रतेषु संप्रपन्नेषु गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा वसनस्यान्तꣳ स्रुग्दण्ड[2] उपसंगृह्य[2] सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोत्युदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यꣳ स्वाहे'त्यपरं चतुर्गृहीतं गृहीत्वा गार्हपत्य एव जुहोति चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहे'त्यथाग्नीध्रं द्रुत्वा स्रुचि चतुर्गृहीतं गृहीत्वा वसनस्यैवान्तꣳ स्रुग्दण्ड उपसंगृह्य नयवत्यर्चाग्नीध्रे जुहोत्यग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम स्वाहे'त्यथ दिवं गच्छ सुवः पतेति हिरण्यꣳ कृत्वोद्गृह्णाति ' सृज्यन्ते दक्षिणा दक्षिणापथेनान्तरेण

---

[1] Thus all and P, except B, which has ॰स्यावालंब॰ ।

[2] स्रुग्दंडमुप॰ BJ.

सदश्च गार्हपत्यं चान्तरेण सदश्चाग्नीध्रं चान्तरेण चात्वालोत्करावेवमुदीच्यः प्रतिपद्यन्ते । ताः प्रदक्षिणं कृत्वाभ्यैति रूपेण वो रूपमभ्यैमि वयसा वय इत्यथैना विभजति तुथो वो विश्ववेदा विभजतु वर्षिष्ठे अधि नाक इत्यथ सदो ऽभ्यैत्येतन्ते[1] अग्ने राध ऐति सोमच्युतं तन्मित्रस्य पथा नयर्तस्य पथा प्रेत चन्द्रदक्षिणा यज्ञस्य पथा सुविता नयन्तीरिति । ॥ ५ ॥

अथैष आत्रेयो ऽग्रेण सद आस्ते । तमभ्यैति[2] ब्राह्मणमद्य राध्यासमृषिमार्षेयं पितृमन्तं पैतृमत्यꣳ सुधातुदक्षिणमित्यथैनमुत्क्रम्य पृच्छति क आत्रेय इत्ययमहमितीतरः प्रत्याह । तं तथैव द्वितीयमुत्क्रम्य पृच्छति क आत्रेय इत्ययमहमित्येवेतरः प्रत्याह । तं तथैव तृतीयमुत्क्रम्य पृच्छति क आत्रेय इत्ययमहमित्येवेतरः प्रत्याह । तस्य पाणौ हिरण्यमादधाति चन्द्र[3]मꣳहेति यदु चान्यदुपकल्पते[4] । ऽथाग्नीध्रं द्रुत्वा हिरण्यमुखमग्नीधे ददात्यथ सद आगत्य ब्रह्मणे ददाति होत्र उद्गात्रे । ऽथ हविर्धानं द्रुत्वाध्वर्यवे ददाति य उ चैनमन्ये ऽभितो भवन्त्यथ सद आगत्य प्रस्तोत्रे ददाति प्रशास्त्रे ब्राह्मणाच्छꣳसिने ऽच्छावाकस्य सदस्यस्याग्नीधः पोतुर्नेष्टुर्ग्रावस्तुत उन्नेतुः सुब्रह्मण्यस्य प्रतिहर्तुरन्ततो । यथासमुदितं प्रसर्पकेभ्यो । ऽथाहैहि यजमानेत्याग्नीध्रं

---

[1] Thus FHTP, Keś.; अभ्येति BJ.

[2] Thus TPH; अभ्येति the other MSS.

[3] चंद्र THF Mantramālā; चंद्रं BP and a Prayoga; चंद्रमवेति Keś.

[4] उपकल्पयते the MSS.

हुत्वा स्रुचि चतुर्गृहीतं गृहीत्वाग्नीध्रे पञ्च वैश्वकर्मणानि जुहोति यज्ञपतिमृषय एनसाहुरित्यथातिक्रामातीमोचैस्तरत्यग्निना[1] देवेन ये देवा यज्ञहन इत्येताभ्यामनुवाकाभ्यामथ यजमानं प्राञ्चमीक्षयति वि सुवः पश्य व्यन्तरिक्षमित्यथैनꣳ सदस्युपवेशयति यतस्व सदस्यैरित्यथ दक्षिणाः समनुदिशत्यस्मद्राता देवत्रा गच्छत मधुमतीः प्रदातारमाविशतानवहायास्मान्देवयानेन पथेत सुकृतां लोके सीदत तन्नः सꣳस्कृतमिति । ॥ ६ ॥

अथ प्राङायन्नाहेन्द्राय मरुत्वते ऽनुब्रूहीति । तच्छ्रुत्वा प्रतिप्रस्थाता ग्रहावादायोपनिष्क्रामत्युपनिष्क्रान्तस्यैवाध्वर्युर्ग्रहावादत्त । उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे ऽन्यतरं प्रयच्छत्यथाश्रावयत्यो श्रावयास्तु श्रौषडिन्द्राय मरुत्वते प्रेष्येति । वषट्कृते सहोभौ जुहुतो । ऽथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य सꣳस्रावमवनयति । तमाह प्रतिप्रस्थातरेतेन पात्रेण तृतीयं मरुत्वतीयं ग्रहं गृहाणेति । तेन प्रतिप्रस्थाता तृतीयं मरुत्वतीयं ग्रहं गृह्णाति द्रोणकलशात्परिप्लुना पात्रेण मरुत्वाꣳ इन्द्र वृषभो रणायेत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वते जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा मरुत्वत इत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य होत्रैतत्पात्रꣳ संभक्षयतीन्द्रेण मरुत्वता पीतस्येत्यथ निगृह्य पात्रं पराङावर्तत इडा देवहूरिति । यावदेतस्य यजुषः पर्याप्नोति तावज्जपत्य-

---

[1] ॰तीमोचै॰ TJHP Keś. (twice) ; ॰तिमो॰ BJ Keś. (once).

भ्येनमाह्वयते होता । प्रत्याह्वयतेऽध्वर्युः । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थ्यं प्रतिगीर्य प्राङेत्योद्यच्छत एतं तृतीयं मरुत्वतीयं ग्रहमनूद्यच्छन्ते नाराशꣳसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशꣳसाननुप्रकम्पयन्त्येतत्पात्रं नाराशꣳसा अन्वायन्त्यनुसवनभक्ष इन्द्रेण मरुत्वता पीतस्येति । होता चैवाध्वर्युश्चैतत्पात्रꣳ संभक्षयतो नराशꣳसपीतेन नाराशꣳसान्नराशꣳसपीतस्य सोम देव ते मतिविदो माध्यंदिनस्य सवनस्य त्रिष्टुप्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व स इत्यात्मानं प्रत्यभिमृशन्ते । आप्याययन्ति चमसानाप्यायस्व समेतु त इति । सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो[२] माहेन्द्राय । ॥ ७ ॥

अथ प्राङेत्य शुक्रपात्रमाददान आहोन्नेतर्यदेमं माहेन्द्रं ग्रहं गृह्णाम्यथोदश्चꣳ राजानं पूतभृतमभि संपवयताद्दशाभिर्द्रोणकलशं मृष्ट्वा न्युब्जतादिति । स तथा करोति । स शुक्रपात्रेण माहेन्द्रं द्रोणकलशाद्गृह्णाति महाꣳ इन्द्रो य ओजसेत्यनुद्रुत्योपयामगृहीतोऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते माहेन्द्राय ।

---

[२] B *again* ०वालंबम० ।

प्रस्तुते साम्नि संप्रैषमाहाभिषोतारो ऽभिषुणुताग्नीदाशिरं विनयोलूखलमुद्वादय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सौम्यस्य विद्धीति । यथासंप्रैषं ते कुर्वन्ति । होत्र एषोत्तमेति प्राग्घोतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं माहेन्द्रं ग्रहमनूद्यच्छन्ते नाराशꣳसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशꣳसाननुप्रकम्पयन्त्येतत्पात्रं नाराशꣳसा अन्वायन्त्यनुसवनभक्षो महेन्द्रेण पीतस्येति । होता चैवाध्वर्युश्चैतत्पात्रꣳ संभक्षयतो नराशꣳसपीतेन नाराशꣳसान्नरशꣳसपीतस्य सोम देव ते मतिविदो माध्यंदिनस्य सवनस्य त्रिष्टुप्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथेन्द्राय त्वेन्द्राय त्वेत्येवं त्रिभिरुक्थ्यपर्यायैश्चरति[1] । तं तथैवोत्तमे ऽतिग्राह्य आहाच्छावाकस्य चमसमनून्नयध्वमुन्नेतः सर्वश एव राजानमुन्नय मातिरीरिचः प्रतिप्रस्थातरुपैतेन ग्रहेण रमैहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्याथोदञ्च्याधवनीयꣳ सर्वश एव वसतीवरीः पर्यस्यति । सर्वश [2]एवैकधनान्पुरो ऽक्षमेव वसतीवरीकलशं

---

[1] उक्थप॰ all exc. TP.

[2] एव om BJ.

मृष्ट्वा न्युब्जति । पश्चाद्ध्येकधनानच्छावाकचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्सर्वंश एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथादत्त उक्थ्यस्थाल्या औपशयं पात्रं । तस्मिन्नेतꣳ सर्वंश एव राजानं गृह्णाति य उक्थ्यस्थाल्यां भवति ।
५ स[1] उ[1] वा[1] ऐन्द्र[1] एव भवत्यथोक्थ्यं[2] वाचीत्याह माध्यंदिनꣳ सवनं प्रतिगीर्य प्रशास्तः प्रसुहीति । सर्पतेत्याह प्रशास्ता । संतिष्ठते माध्यंदिनꣳ सवनम् । ॥ ८ ॥ द्वितीयः ॥

प्रसर्पन्ति तृतीयसवनाय देवौ द्वारावित्यत एवोर्ध्वेन । संप्रसृप्तान्विदित्वाध्वर्युः प्राङायन्नाहाग्नीत्परिश्रयणमाहर प्रति-
१० प्रस्थातराग्निरमानय शृतातङ्क्यमादित्यग्रहाय दध्याहरेहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य य एष उपांशुपात्रेऽꣳशुः प्राप्तो भवति तं माध्यंदिनीय ऋजीषेऽपिसृज्य यमेव कं च[3] ग्रावाणमादायोन्नेतारमाहाहरोपसृजेत्युपसृजत्युन्नेताधवनीयादुदचनेनापरिमितमभिषुत्याथैनꣳ सुसंभृतꣳ संभरण्याꣳ
१५ संभृत्योन्नेत्र उत्प्रयच्छति । तमुन्नेताधवनीयेऽवनयत्येवमेव द्वितीयः पर्यायः संतिष्ठत । एवं तृतीय । ऋजीषमन्ततो दशापवित्रेण परिवेष्ट्योन्नेत्र उत्प्रयच्छति । तदुन्नेताधवनीये[4] विचाल्य प्रपीड्य दक्षिणस्य हविर्धानस्यान्तरेणेषे उपातिहृत्य[5] नीड उत्सादयति । परिश्रयन्ति पूर्वां द्वारमपरां चाथादत्त

---

[1] सउवैऐन्द्र B; सउवेन्द्र T; PHF om. वा; J corrupt.

[2] अथोक्थ्यं JT. [3] कंचन BF. [4] तमुन्नेता॰ some MSS.

[5] उपातिहृत्य here all, also P.

आदित्यस्थाल्या औपशयं पात्रं ˈ तस्मिन्नेतस्य राजस्तृतीयवेलां
गृह्णाति य आदित्यस्थाल्यां भवति कदा च न स्तरीरसीत्यनु-
द्रुत्योपयामगृहीतो ऽस्यादित्येभ्यस्त्वा जुष्टं गृह्णामीति ˈ बर्हिषी
अन्तर्धाय शृतातङ्क्येन श्रीणाति कदा च न प्रयुच्छसीत्यनु-
द्रुत्योपयामगृहीतो ऽस्यादित्येभ्यस्त्वा जुष्टं गृह्णामीत्यपोद्धृत्य ५
बर्हिषी अर्धवेलाꣳ राज्ञो गृह्णाति यज्ञो देवानां प्रत्येति
सुम्नमित्यनुद्रुत्योपयामगृहीतो ऽस्यादित्येभ्यस्त्वा जुष्टं गृह्णामी-
त्यथैनꣳ स्वविमत उपाꣳशुसवनेन श्रीणाति विवस्व आदित्यैष ते
सोमपीथस्तेन मन्दस्व तेन तृप्य तृप्यास्म ते वयं तर्पयितारो या
दिव्या वृष्टिस्तया त्वा श्रीणामीत्यथैनमुद्गृह्णात्यच विज्ञानमुपैति १०
यदि ताजक् प्रस्कन्दत्यप्सुवर्षुकः[1] पर्जन्यो भवति ˈ यदि चिरमव-
र्षुको ˈ न सादयतीति ब्राह्मणमथैनमुपाꣳशुसवनं दशापवित्रेण
परिवेष्ट्य तेनाधस्तात्पात्रमुद्धन्त्यूर्मिकारमविषिञ्चन् ॥ ९ ॥

आ समुद्रादान्तरिक्षात्प्रजापतिरुदधिं च्यावयातीन्द्रः प्रस्नौतु
मरुतो वर्षयन्तून्नम्भय पृथिवीं भिन्द्धीदं दिव्यं नभः । उद्नो १५
दिव्यस्य नो देहीशानो विसृजा दृतिमित्यथैनमुपाꣳशुसवनं[2]
दशापवित्रेण परिमृज्य ग्रावस्वपिसृजति ˈ विवृण्वन्ति पूर्वां द्वार-
मपरां चाथैतं[3] ग्रहं बर्हिर्हस्तेनापिधायोपोत्तिष्ठन्स्वाहादित्येभ्यः[4]

---

[1] Thus J only; °दत्यश्ववर्षुकः F; °देहर्षुकः HP; the other MSS. are still more corrupt.

[2] अथैनमु° all except H, which has अथैतमु° ।

[3] Thus PHJ Keś.; अथैनं the other MSS.

[4] °योपोत्तिष्ठन्° TP; °योपोत्स्तिष्ठन्° J; °योपतिष्ठन्° B; °योत्तिष्ठन्° HF.

प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो महस्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्यो ऽनुब्रूहीत्यत्याक्रम्याश्राव्याहादित्येभ्यः प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो महस्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्यः प्रेष्येति । वषट्कृत ओषधीः प्रास्याग्नावादित्यं जुहोति सकृदेव । न क्रत्वान्वीक्षते । पर्यावृत्तस्यैव प्रतिप्रस्थाता पात्रमादत्त । एतस्मिन्काले प्रतिहर्ता पूतभृतो बिले पवित्रं वितत्य द्वौ वा त्रीन्वा राज्ञ उदचनानानयत्याग्रयणमेवाध्वर्युरादत्त । आदित्यस्थालीं प्रतिप्रस्थाता सोपग्रयाꣳ संप्रगृह्णाति । तासां तिसृणां चतसृणां वा[1] धाराणां [2]तयोपरिष्टादाग्रयणमानीयाधस्तादुपगृह्णाति । तं[3] तथैव त्रिरभिहिङ्कृत्य परिमृज्य सादयत्यपोद्धृत्य पवित्रं बर्हिषी अन्तर्धायाग्निरमवनयत्यन्वारब्धायां पत्न्यामस्मे देवासो वपुषे चिकित्सतेति चतसृभिरनुच्छन्दसमपोद्धृत्य बर्हिषी पूतभृतो बिले द्रप्साननुमन्त्रयते । द्वौ पवमानस्य ग्रहौ गृह्णाति । तयोन्वितरित्याह प्राञ्चꣳ राजानं पूतभृतमभि संपवयताद्दशाभिराधवनीयं स्रक्षा न्युब्जतादिति । स तथा करोति । तथाप उपस्पृश्य बर्हिषी आदायोपनिःसर्पति । तेषु तथैव समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति । ॥ १० ॥

इदं तृतीयꣳ सवनं कवीनामृतेन ये चमसमैरयन्त । ते सौधन्वनाः सुवरानशानाः स्विष्टिं नो अभि वसीयो नयन्तु स्वाहेत्येतयाध्वर्यू जुहुतो । यथावेदमितरे जुह्वति । तथा

---

[1] च T. [2] तथा om THF. [3] om. T.

प्रदक्षिणमावृत्य सदो ऽभि पवमानꣳ सर्पन्ति । तथा सदसि यथायतनमुपविशन्ति । तथोद्गात्रे वा प्रस्तोत्रे वा बर्हिषी प्रयच्छत्यृक्सामयोरुपस्तरणमसि मिथुनस्य प्रजात्या इति वा तूष्णीं वा । तथोपाकरणं जपति वायुर्हिंकर्तेति । स एष सप्तदश आर्भवः पवमानो भवति । तस्य नवम्यां प्रस्तुतायां वाचयति सघासि जगतीच्छन्दा अनु त्वारभे स्वस्ति मा संपारयेत्यत्र पञ्चहोतारं व्याचष्टे । उद्गुते साम्नि संप्रैषमाहाग्नीच्छालाकान्विहर बर्हिः स्तृणाहि पुरोडाशाꣳ अलंकुरु प्रतिप्रस्थातः पशौ संवदस्वेति । यथासंप्रैषं तौ कुरुतस्तथाप उपस्पृश्याहेहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य तथा समस्तꣳ राजानमुपतिष्ठते । नाचावकाशैश्चरति । तथा प्रचरण्यां नवकृत्वो गृह्णीते । तथैव आग्नीध्र आग्नीध्रीयाद्धिष्णियादनुपूर्वं[1] धिष्णियेषु शालाकान्विहरति[2] । तथा पुरस्तात्प्रत्यङ्ङासीनो विहृताञ्छालाकान्व्याघारयति[2] । तथोत्तरस्य हविर्धानस्य चुबुके प्रचरणीꣳ सादयति । तथा सांकाशिनेन पथा पृष्ठ्याꣳ स्तृणाति संततां गार्हपत्यादाहवनीयात् । ॥ ११ ॥

अथ पशुना चरति मनोताप्रभृतिनेडान्तेन । तथा सवनीयान्पुरोडाशान्याचति । तेषां तथैव समवद्यन्नाह तृतीयस्य

---

[1] आनुपूर्वं T, अनुपर्वं PBJ; अनुपूर्व्यां F; आन,पूर्व्यं H.

[2] शालाकान् PTJ; शलाकान् BHF; शकलान् and शलाकान् H.

सवनस्येन्द्राय पुरोडाशानामवदीयमानानामनुब्रूहीति । पूर्वार्धादवदायापरार्धादवद्यत्यभिघारयति । प्रत्यनक्ति । तथोपभृति स्विष्टकृते सर्वेषाꣳ सकृत्सकृदुत्तरार्धादवद्यति । द्विरभिघारयति । न प्रत्यनक्त्यत्याक्रम्याश्राव्याह तृतीयस्य सवनस्येन्द्राय पुरोडाशान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति । तथा समावपमान आहाग्नये ऽनुब्रूहीत्याश्राव्याहाग्नये प्रेष्येति । वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोत्यथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा तथैव पात्र्यामिडाꣳ समवधाय प्रतीचः पुरोडाशान्प्रहिणोत्यनु हैके संयन्ति पशव इडेति वदन्तो ऽथ प्राङ्ङायन्नाहोन्नीयमानेभ्यो ऽनुब्रूहि होतुश्चमसमनून्नयध्वं तीव्राꣳ आशीर्वतः कुरुध्वमुन्नेतः सोमं प्रभावयेति । होतृचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथ प्राङेत्य होतृचमसमादायाश्राव्याह तृतीयस्य सवनस्यर्भुमतो विभुमतः प्रभुमतो वाजवतः सवितृवतो बृहस्पतिवतो विश्वदेव्यावतस्तीव्राꣳ[1] आशीर्वत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति श्येनाय पत्वने स्वाहेत्यनुवषट्कृते तृम्पन्ताꣳ होत्रा मधोर्घृतस्य स्वाहेति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वति । तथा संप्रैषमाह प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातुः प्र यजमानस्य प्र सदस्यस्य होत्रकाणां चमसाध्वर्यवः सकृत्सकृदाशीर्वतो ऽभ्युन्नीयोपावर्तध्वमिति । यन्त्येते महर्त्विजां चमसास्तथैते होत्र-

---

[1] विश्वेदे° BT, Mantramālā, the other MSS., also P, have विश्वदे° ।

काणां चमसाध्वर्यवः सकृत्सकृदाशीर्वन्तो ऽभ्युन्नीयोपावर्तन्ते । तेषां तथैव मैत्रावरुणचमसमादायाश्राव्याह प्रशास्तर्यजेति । वषट्कृते जुहोति विष्टम्भाय धर्मणे स्वाहेति । परिधये जनप्रथनायेति[1] ब्राह्मणाच्छꣳसिन । ऊर्जे होत्राणामिति पोतुः । पयसे होत्राणामिति नेष्टुः । प्रजापतये मनव इत्यच्छावाकस्यर्तमृतपाः सुवर्वाडित्यग्नीधस्स्वं[2] चमसमेवानुवषट्करोति[3] तृप्यन्ताꣳ होत्रा मधोर्घृतस्य स्वाहेति । सप्त होत्राः संयाज्य प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्याग्रेण होतारमुपविशत्ययाडग्नीदिति । स भद्रमकरित्याह होता यो नः सोमꣳ राजानं पाययिष्यतीति । तथाप उपस्पृश्य होत्र इडामुपोद्यच्छन्ति । उपहूयमानायामिडायामुपप्रगृह्णन्ति चमसानुपहूतायामिडायामग्नीध आदधाति षडवत्तं । प्राश्नन्ति । मार्जयन्ते । इडोपहूताꣳश्चमसान्भक्षयन्ति भक्षेहि माविशेति दीर्घभक्षमनुद्रुत्यादित्यवद्गणस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीच्छन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । आप्याययन्ति चमसानाप्यायस्व समेतु त इति । सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽध[4]

---

[1] BTP add स्वाहा also after ॰प्रथनाय ।

[2] Thus, अग्नीधस॰ HPT ; अग्नीध्रस्व॰ or आ॰ BJ.

[3] Thus TFPH Bh ; चमसमैवानुवष॰ J ; चमसैवानुवष॰ B Keś

[4] B again ॰वालंबम॰ ।

उपासनवन्तो वैश्वदेवाय । चमसायचमसायैव त्रीꣳस्त्रीन्पुरोडाशशकलानुपास्यति । नव होतृचमसे । तानत एवानुमन्त्रयते ऽत्र पितरो यथाभागं मन्दध्वमित्येतस्मिन्काल[1] आग्नीध्रे यजमानः पुरोडाशानां प्राश्नाति । यदशना स्यात्पत्नी पत्नीशाले ।

॥ १२ ॥ तृतीयः ॥

अथ प्राङायन्नाह देवाय सवित्रे ऽनुब्रूहि प्रतिप्रस्थातरन्तर्यामपात्रेण सावित्रमाग्रयणाद्ग्रहं गृहीत्वोपास्व मा सीषद् इति । तच्छ्रुत्वा प्रतिप्रस्थातान्तर्यामपात्रेण सावित्रमाग्रयणाद्ग्रहं गृह्णाति वाममद्य सवितरित्यनुद्रुत्योपयामगृहीतो ऽसि देवाय त्वा सवित्रे जुष्टं गृह्णामीति । न सादयतीति ब्राह्मणमसादयित्वैवोपनिष्क्रम्याश्राव्याह देवाय सवित्रे प्रेष्येति । वषट्कृते जुहोत्यथ वै भवति सवितृपात्रेण वैश्वदेवं कलशाद्गृह्णाति सोमे सोममभिगृह्णातीति । स[2] सवितृपात्रेण वैश्वदेवं कलशाद्गृह्णाति सोमे सोममभिगृह्णात्युपयामगृहीतो[3]ऽसि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षे नमो विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य होत्रा समीक्ष्य पराङावर्तत इडा देवहूरिति । यावदेतस्य यजुषः पर्याप्नोति तावज्जपत्यभ्येन-

---

[1] After मन्दध्वमिति HF ins. उक्त्वा ।

[2] स only in PH ; F reads यत् ।

[3] The words सोमे सोममभिगृह्णाति om. B (*are* they interpolated ?) ; P also has them.

माह्वयते होता' प्रत्याह्वयते ऽध्वर्युः' शꣳसति' प्रतिगृणात्यथ यत्र होतुरभिजानात्येकया च दशभिश्च स्वभूत इति तत्प्रतिप्रस्थाता द्विदेवत्यपात्राणि मार्जालीये मार्जयित्वा पात्रेष्वपिसृजत्यथ यत्र होतुरभिजानाति प्र[1] द्यावा यज्ञैः पृथिवी ऋतावृधेति तदन्यतो-मदं प्रतिगृणात्योथा मोद इव मदा ५
मोद इवेत्या व्याह्वावादथ यत्र होतुरभिजानाति तद्राधो अद्य सवितुर्वरेण्यमिति तदुभयतो-मदमेव[2] प्रतिगृणाति मदा[3] मोद इव मदा मोद इवेत्या व्याह्वावात्प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं वैश्वदेवं ग्रहमनूद्यच्छन्ते नाराशꣳसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज १०
सोमस्येति' वषट्कृतानुवषट्कृते द्विर्जुहोति' तथैव द्विर्द्विर्नाराशꣳसाननुप्रकम्पयन्त्येतत्पात्रं नाराशꣳसा अन्वायन्त्यनुसवनभक्षो विश्वैर्देवैः पीतस्येति' होता चैवाध्वर्युश्चैतत्पात्रꣳ संभक्षयतो नराशꣳसपीतेन नाराशꣳसान्नराशꣳसपीतस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीच्छन्दसः पितृपीतस्य १५

---

[1] The reading of the words commencing with प्र is not wholly certain. B om. from प्र द्यावा to अभिजानाति (incl.; line 6); instead of आव्याह्वावाद् (thus JP, l. 6) F has व्याह्वावात्।

[2] उभयतो॰ FP; अन्यतोमद॰ BJ, but comp. Padārthanirv. page 378 (n°421) and Āp. śrs. XIII. 13. 8.

[3] मदा ... इवेति om. TJ; B: मदामोदैवमोदामोदैषित्य॰; most of the MSS. contract the word इव with the preceding vowel; so HPBJ, but comp. TS. III. 2, 9, 5.

मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते ॥ १३ ॥

अथ होतारं विपृच्छति परियक्ष्यसि सौम्यां३[1] न परियक्ष्यसी३[1] इति । स यथैनꣳ होता प्रत्याह तत्कृत्वासन्नꣳ सौम्यमागच्छत्यथ स्रुचि चतुर्गृहीतं गृहीत्वात्याक्रम्याश्राव्याह घृतस्य यजेति । वषट्कृते जुहोत्यथोपस्तीर्य द्विस्सरोरवद्यति[2] । पूर्वार्धादवदायापरार्धादवद्यत्यभिघारयति । न[3] प्रत्यनक्त्यत्याक्रम्याश्राव्याह सौम्यस्य[4] यजेति । वषट्कृते दक्षिणार्धपूर्वार्धे प्राचीनावीती सौम्यं जुहोत्यथैनं वैष्णव्यर्चा स्रुवाकृत्याभिजुहोति विष्णो त्वं नो अन्तम इति । यद्यु वै होताग्नावैष्णव्यर्चा परियजति संपन्नमिति नाद्रियेत । तस्मिन्नाज्यमानीयावेक्षते । पवित्रं वै सौम्य । आत्मानमेव पवयन्ते । य आत्मानं न परिपश्येदितासुः स्यादभिदर्दिं कृत्वावेक्षेतेति । तस्मिन्भूय आज्यमानीयावेक्षते यन्मे मनः परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसीति । मन एवात्मन्दधार न गतमना

---

[1] Some of the MSS. om. the pluti sign; F puts it both times behind the verb. सौम्यांन PBF; सौम्याम्न UJ.

[2] Instead of अवद्यति B has; अवद्यन्नाह सोमायानुब्रूहीति ।

[3] om. HF.

[4] सोमस्य BJ.

भवतीति ब्राह्मणम।थैनमुद्गातृभ्यो हरन्ति । तस्मिꣳस्तच्चेष्टन्ति यत्ते विदुर।थ प्राङायन्नाह प्रतिप्रस्थातरुपाꣳशुपात्रेण पात्नीवतमाग्रयणाद्गृहं गृहीत्वोपास्त्व मा सीषद् इति । तत्कृत्वा प्रतिप्रस्थातोपाꣳशुपात्रेण पात्नीवतमाग्रयणाद्गृहं गृह्णात्युपयामगृहीतोऽसि बृहस्पतिसुतस्य त इन्दो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णाम्यग्ना३इ पत्नीवा३ इति । बर्हिषी अन्तर्धाय घृतेन श्रीणात्यहं परस्तादहमवस्तादहं ज्योतिषा वि तमो ववार । यदन्तरिक्षं तदु मे पिताभूदहꣳ सूर्यमुभयतो ददर्शाहं भूयासमुत्तमः समानाना।मित्यपोद्धृत्य बर्हिषी न सादयतीति ब्राह्मणम।सादयित्वोपनिष्क्रम्याश्राव्याहाग्नीत्पात्नीवतस्य यजेति । वषट्कृते जुहोति सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहेत्युपाꣳश्वनुवषट्कृते[1] कृत्वा हरति भक्षꣳ । स यद्यस्मिन्नाग्नीध्र उपहवमिच्छेत उपैवैनꣳ ह्वयते । नो त्वेव संभक्षयतो[2] । ऽथाहाग्नीन्नेष्टुरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा संख्याप्याप उपप्रवर्तयतादूरुणोपप्रवर्तयतान्नग्नं कृत्वोरुमुपप्रवर्तयताद्धोतुस्समसमनून्नयध्वमुन्नेतः सर्वश एव राजानमुन्नय मातिरीरिचः प्रतिप्रस्थातर्होतृचमसे ध्रुवायावकाशं कुरुतादेहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य यजमानं ध्रुवमुपस्थापयति भूतमसि भूते मा धा मुखमसि मुखं भूयासमिति । होतृचम-

---

[1] करोति instead of कृत्वा T.

[2] Thus HJF; °यति TB.

स्वमेव प्रथममुन्नयन्ति । यथोपपादमितरान्सर्वंश एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप[1] उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते यज्ञायज्ञियेनात्र सप्तहोतारं व्याचष्टे । प्रस्तुते साम्नि नेष्टा पत्नीमुद्गात्रा संख्याप्य वाचयति विश्वस्य ते विश्वावतो वृष्णियावतस्तवाग्ने वामीरनु संदृशि विश्वा रेताꣳसि धिषीयागन्देवान्यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमातिष्ठतानु वातस्य पत्मन्निड ईडिता इति । स यदेवैनामुद्गातोपमीवति[2] तदेषा[3] पत्न्यूरुणा पत्नीजनीरुपप्रवर्तयति । नग्नं कृत्वोरुमुपप्रवर्तयति ॥१४॥

होत्र एषोत्तमेति प्राक्होतुः कालात्पराङावर्तते ऽध्वर्युरथैनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणात्यथ यत्र होतुरभिजानाति स्वादुष्किलायं मधुमाꣳ उतायमिति तदुभयतो-मोदं प्रतिगृणाति मोदा मोद इव मदा मोद इवेत्या[4] व्याहावादथ यत्र होतुरभिजानाति तन्तुं तन्वन्रजसो भानुमन्विहीति तत्प्रतिप्रस्थाता ध्रुवं परिगृह्णाति द्यावापृथिवीभ्यां त्वा परिगृह्णामीत्यथैनं प्रच्यावयति

---

[1] सꣳ found in HT, is omitted in most of the MSS.

[2] °मीयति HJFP Bh. (one MS.) Keś.; °मीवति BT Bh. (another MS.)

[3] Thus HBTJP; तदैषा F (तदा एषा Keś.)

[4] मोदामोद इवेत्या B; मोदादेवेत्या T; मोद इव मदा मोदै इवेत्या J; मोदा मोदै इव मोदा मोदै इवेत्या F; मोदा मोदैव मदा मोदैवेत्या HP; Bh. and Keś.: अवच्छेदे मोदा मोद इवेति प्रणवे मदा मोद इवेति ।

विश्वे त्वा देवा वैश्वानराः प्रच्यावयन्त्वित्यथैनमाहरति दिवि देवान्दृꣳहान्तरिक्षे वयाꣳसि पृथिव्यां पार्थिवानित्यथैनꣳ होतृचमसे ऽवनयति ध्रुवं ध्रुवेण हविषाव सोमं नयामसि। यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत्॥ यथा न इन्द्र इद्विशः केवलीः सर्वाः समनसः करत्। यथा नः सर्वा इद्दिशो ऽस्माकं केवलीरसन्निति | प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतꣳ होतृचमसमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति | वषट्कृतानुवषट्कृते द्विर्जुहोति | तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्षो ऽग्निना वैश्वानरेण मरुद्भिः पीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति | होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति | यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते | नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते | ऽथैताꣳश्चमसानद्भिः पूरयित्वोत्तरेणाहवनीयं प्राची वोदीची वायातयति | तेषु त्रीꣳस्त्रीꣳश्च दूर्वाग्रन्थीन्प्रास्यत्येकैकं च दर्भपुञ्जीलमथोक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य प्रशास्तः प्रसुहीति | सर्पतेत्याह प्रशास्ता | संतिष्ठते तृतीयसवनम् | ॥ १५ ॥

चतुर्थः ॥

अथ संप्रैषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्याहरन्त्येतानाग्नीध्रादौपयजानङ्गाराꣳस्तानग्रेण होतारं निवपत्युपसीदत्युपयष्टा गुदतृतीयेनाथाध्वर्युः पृषदाज्यं विहृत्य जुह्वाꣳ

समानीयात्याक्रम्याश्राव्याह देवेभ्यः प्रेष्येति । वषट्कृते जुहोति प्रेष्य प्रेष्येत्यैकादशानूयाजानिष्ट्वोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा वाजवतीभ्याꣳ स्रुचौ व्यूहति । शंयुना प्रस्तरपरिधि संप्रकीर्य संप्रस्राव्य स्रुचौ विमुच्योन्नेतारमाहोन्नेतर्ग्रहस्ते प्रचरेति । तच्छ्रुत्वोन्नेता द्रोणकलश आग्रयणाद्वतीयं[१] ग्रहं गृह्णात्युपयामगृहीतोऽसि हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्य हरिवन्तं ग्रहं गृह्णामीति । बर्हिषी अन्तर्धाय धानाभिः श्रीणाति हरी स्थ हर्योर्धाना इत्यपोद्धृत्य बर्हिषी अथैनमादायोपोत्तिष्ठन्नाहेन्द्राय हरिवते धानासोमानामनुब्रूहीति । शीर्षन्नधिनिधाय विक्रम्याश्राव्याहेन्द्राय हरिवते धानासोमान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति सहसोमा इन्द्राय स्वाहेत्यनुवषट्कृते हुत्वा हरति भक्षꣳ । स यावन्त ऋत्विजस्तेभ्य उन्नेता धाना व्यावपति । त उन्नेतर्युपहवमिष्ट्वैकैकामन्वस्यन्ते । मनसा संबाधते ॥ १६ ॥

इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीत्यथैना निर्णिज्योत्तरवेद्याꣳ संनिवपन्त्यापूर्या स्था मा पूरयत प्रजया च धनेन चेति । निवपन्नेव यजमानस्तिस्रो धानाः भक्षते । ऽथ याचति स्फ्यमुदपात्रं बर्हिरित्येतत्समादायाहैहि यजमानेति ।

---

[१] आग्रयणात्तृतीयं B.

जघनेन दक्षिणेन हविर्धाने[1] परीत्य दक्षिणेन मार्जालीयं धिष्ण्यं स्फ्येनोद्धृत्यावोक्ष्य दक्षिणाग्रं बर्हि स्तीर्त्वाद्भिर्मार्जयति मार्जयन्तां पितरो मार्जयन्तां पितामहा मार्जयन्तां प्रपितामहा इत्यथ तिस्रो धाना ददात्येतत्ते ततासौ ये च त्वामन्वेतत्ते पितामहासौ ये च त्वामन्वेतत्ते प्रपितामहासौ ये च त्वामन्वित्यत्र[2] पितरो यथाभागं मन्दध्वमित्युक्त्वोदङ् पर्यावृत्यात्र षड्ढोतारं व्याचष्टेऽथाभिपर्यावृत्य तथैवाद्भिर्मार्जयित्वैतेनैव यथेतमेत्याग्नीध्रीये द्वे स्रुवाहुती जुहोति यन्म आत्मनो मिन्दाभूत्पुनरग्निश्चक्षुरदादिति द्वाभ्यामथाहवनीये शाकलैश्चरन्ति देवकृतस्यैनसोऽवयजनमसि स्वाहा मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा पितृकृतस्यैनसोऽवयजनमसि स्वाहेत्यथाप्सु सोमान्युपविश्यावघ्रेण भक्षयन्त्यप्सु धौतस्य सोम देव ते नृभिः सुतस्येष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षो अश्वसनिर्यो गोसनिस्तस्य ते पितृभिर्भक्षंकृतस्योपहूतस्योपहूतो भक्षयामीत्यथैना निनीयोपोत्थायादित्यमुपतिष्ठन्ते ॥ १७ ॥

अपाम सोमममृता अभूमादर्श्म ज्योतिरविदाम देवान्। किमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्येति यद्यु वा अस्तमित आदित्यो भवत्याहवनीयमेवैतेन यजुषोपतिष्ठन्तेऽथाग्नीध्रं हुत्वाग्नीध्रे दधिद्रप्सान्भक्षयन्ति दधिक्राव्णो अका-

---

[1] हविर्धाने PHBT; हविर्धानं JF.

[2] इति *om.* HFP.

रिषमित्यथ सख्यवैसर्जनं जपन्त्युभा[1] कवी युवाना सत्या ता धर्मणस्पती। सत्यस्य धर्मणस्पते वि सख्यानि सृजामह इत्यथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य षडृग्मियाणि जुहोति धाता रातिः सवितेदं जुषन्तामितिˈ त्रीणि यजूꣳषि यज्ञ यज्ञं गच्छैष ते यज्ञो यज्ञपते देवा गातुविद इत्यथ स्रुचि चतुर्गृहीतं गृहीत्वायुर्दां दशमीं जुहोत्यायुर्दा अग्ने हविषो जुषाण इत्येतस्मिन्काले चात्वाले यजमानः कृष्णविषाणां प्रास्यतीन्द्रस्य योनिरसि यज्ञस्य त्वा योनौ सादयामीति वा तूष्णीं वाथ प्रतिप्रस्थाता पत्नीमुदानयति सा चात्वाले शङ्कुं प्रास्यति तूष्णीम्ˈ ॥ १८ ॥ पञ्चमः ॥

अत्रैतमवभृथꣳ[2] सꣳसादयन्त्यग्रेणाग्नीध्रमुच्छ्राय्यां[3] वा चर्मणि वाˈ पत्नीशालादाददते वारुणमुपस्तीर्णाभिघारितमाज्यस्थालीꣳ सस्रुवाꣳ स्रुचं बर्हिः प्रतिवसनीये वाससी औदुम्बरीꣳ राजासन्दीꣳˈ सदस औदुम्बरीꣳ स्थूणां मैत्रावरुणदण्डꣳˈ हविर्धानाभ्यां पूतभृदाधवनीयौ चमसानधिषवणं चर्माधिषवणे फलके षट् कङ्कून्यावणो वायव्यानि स्थालीर्द्रोणकलशं[4] दशापवित्रे ऋजीषमित्येतत्सह कृष्णाजिनेन यत्किञ्चित्सोमलिप्तं भवत्यथ वै भवति परा स्थालीरस्यन्त्युद्वायव्यानि हरन्तीत्येतत्समादाय

---

[1] जपत्यु॰ all except PBE and Bh.; Keś.: जपति सर्वे।

[2] अत्रैतदव॰ JT.

[3] Thus (or उच्छ्रायां) BP Bh. Keś.; उच्छ्रायीं T; उछायां JF; उच्छ्रयां H.

[4] स्थालीं HJTF; स्थाली BP; स्थालीर् Keś.

प्रस्तोतारमाह प्रस्तोतः साम[1] गायेतिˈ साम्ना प्रस्तोतान्वैतिˈ
त्रिर्निधनमुपैतिˈ पुरुषःपुरुषो निधनमुपैतीति ब्राह्मणमˈथान्तरेण
चात्वालोत्करावुदङ्ङुपनिष्क्रामन्त्युरुꣳ हि राजा वरुणश्चकार
सूर्याय पन्थामन्वेतवा उ । अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चिदितिˈ विषुवति द्वितीयं निधनमुपयन्त्यˈपः ५
पराख्याय वाचयति शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा
सुमतिष्टे अस्तु । बाधस्व द्वेषो निरृतिं पराचैः कृतं चिदेनः
प्रमुमुग्ध्यस्मदित्युˈदकान्ते तृतीयं निधनमुपयन्त्यˈथापामन्तमभितिष्ठन्त्यभिष्ठितो वरुणस्य पाश इत्यˈथाप्सु बर्हिः प्रास्यत्यग्नेरनीकमप आविवेश । अपां नपात्प्रतिरक्षन्नसुर्यं दमेदमे समिधं १०
यक्ष्यग्न इत्यˈथैनत्स्रुवाहुत्याभिजुहोति प्रति ते जिह्वा घृतमुच्चरण्येत्स्वाहेत्यˈथ स्रुचि चतुर्गृहीतं गृहीत्वापबर्हिषश्चतुरः प्रयाजान्यजत्यˈथाग्नये सोमायेत्याज्यभागाभ्यां चरत्यˈथोपस्तीर्य पूर्वार्धात्पुरोडाशस्यावद्यन्नाह ॥ १९ ॥

वरुणायानुब्रूहीतिˈ पूर्वार्धादवदायापरार्धादवद्यत्यˈभिघा- १५
रयतिˈ [2]प्रत्यनक्त्यˈत्याक्रम्याश्राव्याह[3] वरुणं यजेतिˈ वषट्कृते
जुहोत्यˈथोपस्तीर्य सर्वश एव वारुणमवदधदाहाग्नीवरुणाभ्याꣳ
स्विष्टकृद्भ्यामनुब्रूहीतिˈ द्विरभिघारयत्याˈश्राव्याहाग्नीवरुणौ

---

[1] Thus HTP Bh. Keś; सामानि BJ Mantramālā.

[2] F ins. न।

[3] Instead of त्याक्रम्य (thus TP) B has याक्रम्य; F om. the words त्याक्रम्य ... द्विरभिघारयति।

स्विष्टकृतौ यजेति । वषट्कृत उत्तरार्धपूर्वार्धेऽतिहाय पूर्वा
आहुतीर्जुहोत्यथ स्रुचि चतुर्गृहीतं गृहीत्वापबर्हिषौ द्वावनू-
याजौ यजत्यथाप्सु स्रुचं प्रतिष्ठापयति समुद्रे ते हृदयम-
प्स्वन्तरित्यथैनामद्भिः पूरयति सं त्वा विशन्त्वोषधीरुताप
५ इत्यप्स्वेवापो जुहोति यज्ञस्य त्वा यज्ञपते हविर्भिः । सूक्त-
वाके नमोवाके विधेम स्वाहेत्यथैतमवभृथꣳ संप्रकिरन्ति यत्किं-
चित्सोममलिप्तं भवत्यवभृथ निचंकुण निचेरुरसि निचंकुणाव
देवैर्देवकृतमेनोऽयाडव मर्त्यैर्मर्त्यकृतमुरोरा नो देव रिष-
स्पाहीत्यथाञ्जलिनाप उपहन्ति सुमित्रा न आप ओषधयः
१० सन्त्विति । तां दिशं निरुक्षति यस्यामस्य दिशि द्वेष्यो भवति
दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप
उपस्पृश्याथैतदृजीषं प्लावयन्ति[1] सह कृष्णाजिनेन देवीराप
एष वो गर्भस्तं वः सुप्रीतꣳ सुभृतमकर्म देवेषु नः सुकृतो
ब्रूतादिति । बिन्दूनुपैव स्पृशति । न भक्षयत्यथानुपमज्जन्ताव-
१५ न्योन्यस्य पृष्ठे धावयतो[2] विस्रस्य मेखले प्रतिवसनीये वाससी
परिधायोन्नेतारमाहोन्नेतरुन्नो नयेति । तिसृभिरुद्वतीभिरु-
दायन्त्युद्वयं तमसस्पर्युदु त्यं चित्रमित्यथापामन्तं प्रतियौति
प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाश इत्यथाप्रतीक्ष-
मायन्ति । वरुणस्यान्तर्हित्यै । प्रपथे समिधः कुर्वत एधो

---

[1] ०यंति HBF Keś; ०यति TP.

[2] Thus HJFP Bh.; धावयित्वा BT Keś.

ऽस्येधिषीमहीत्येत्याहवनीये[1] ऽभ्यादधाति समिदसि तेजो ऽसि तेजो मयि धेहीत्यथाहवनीयमुपतिष्ठन्ते ऽपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसेति' व्यवच्छिन्दन्ति परिश्रयणानि' विवर्तयन्ति[2] हविर्धाने दक्षिणेन दक्षिणमुत्तरेणोत्तरम्' ॥ २० ॥

यावदेवात्राध्वर्युस्तिष्ठति तावदेष प्रतिप्रस्थाता प्रायणीयस्य निष्कास उदयनीयमभिनिर्वपत्येष एव वेद एतन्मेक्षणमेतद्बर्हिरथैतां चरुस्थालीꣳ सक्षामकाषामुत्खिद्य[3] निर्णिज्य तयोदयनीयꣳ श्रपयति' तस्मिꣳस्तथैव श्रप्यमाणे जघनेन गार्हपत्यमौपसदायां वेद्याꣳ स्तम्बयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं' त्रिर्यजुषा तूष्णीं चतुर्थं' पूर्वं परिग्राहं परिगृह्णाति' करणं जपत्युद्धन्त्युद्धृतादाग्नीध्रस्त्रिर्हरति'[4] समानं कर्म यथा प्रायणीयस्यैतावदेव नाना' पथ्याममुत्र स्वस्तिं प्रथमां यजति तामिहोपोत्तमां यजति' नो तु दिशस्यवन्ते[5]' ऽथ पुरस्तात्स्विष्टकृतः स्रुवाहुतिमुपजुहोति यास्ते विश्वाः समिधः सन्त्यग्न इत्युपस्तरणाभिघारणाभ्यामेवैतद्ध्रुवाज्यं विच्छिꣳषन्ति[6]' समि-

---

[1] Some of the MSS. एता आह०, cp. p. 126, l. 11, p. 140, l. 15.

[2] Thus PJ Bh.; व्यवर्तयंति TF Keś; निवर्तयंति BH.

[3] उतिखद्य most of the MSS.

[4] After हरति HFJ ins. यदाग्नीध्रस्त्रिर्हरति।

[5] Uncertain. नेतुदिशस्यवते B, नेतुर्दशस्यवते T; नेष्टुदिशस्यवंते F; नेत्विच्छदिशस्थ्यवते J, नेत्तुदिशस्थ्यवंते H; नोत्विच्छदिशस्थ्यवते P.

[6] Uncertain; विछिंषति BF; संन्विचंति J; ध्रुवाज्यविच्छिप (?) T; विछिंषंति H; विछिꣳषंति P; समापयन्ति the Comm.

ष्टयजुर् हैके जुह्वति । शंय्वन्त उदयनीयः संतिष्ठते । ऽथैतत्पूर्णपात्रमन्तर्वेदि निनयत्यथ पृषदाज्यवन्त्याज्यानि गृहीत्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते केशश्मश्रु वपते । नखानि निकृन्तते । सर्वसꣳस्थां[1] पशोः कुर्वन्त्यथ यदि वशां न लभते मैत्रावरुणीमामिक्षां गार्हपत्ये श्रपयित्वा तयाहवनीये प्रचरति । साज्यभागप्रतिपत्केडान्ता[2] संतिष्ठते । ॥ २१ ॥

[3]अथारण्योरग्नीन्समारोह्योदवसाय मथित्वाग्नीन्विहृत्याग्नेयमष्टाकपालमुदवसानीयामिष्टिं निर्वपति । श्रपयित्वासादयति । तस्याः पञ्चदश सामिधेन्यः । पञ्च प्रयाजा[4] । वार्त्रघ्नावाज्यभागावथ हविषो ऽग्ने तमद्याधा ह्यग्न इति । त्रिष्टुभौ संयाज्ये । अन्वाहार्यमासाद्यानड्वाहं ददाति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथारण्योरग्नीन्समारोह्योदवसाय मथित्वाग्नीन्विहृत्य[5] पूर्वाणि देविकाहवीꣳषि निर्वपत्यनुमत्यै चरुꣳ राकायै चरुं धात्रे

---

[1] संस्थां TP ; सꣳस्था the other MSS ; संस्थाः H.

[2] Thus only J; ॰प्रतिपक्षे॰ B; प्रचरत्याज्यभागाभ्यां प्रभृतीडान्ताः F; T altogether corrupt; प्रचरत्याज्यभागप्रभृतीडांता H.

[3] This Khanḍa is given according to PBJT ; HF differ materially; these MSS. treat firstly of the devikāhavīṁṣi, then of the udavasānīyā iṣṭi.

[4] प्रयाजानिष्ट्वा TJP.

[5] Instead of थारण्योर ... विहृत्य P has: ऽथैतदानीमेव इष्ट्याꣳस्तीत्वापः प्रणीय ।

पुरोडाशं द्वादशकपालमित्यन्वाहार्यमासाद्य वत्सतरीं[1] ददाति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ तदानीमेव पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयोत्तराणि देविकाहवीꣳषि निर्वपति सिनीवाल्यै चरुं कुह्वै चरुं धात्रे पुरोडाशं द्वादशकपालमित्यन्वाहार्यमासाद्य वत्सतरं[2] ददाति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथारण्योरग्नीन्समारोह्य ५ स्वान्यग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्य सायंप्रातरग्निहोत्रे प्रतिजुहोति । संतिष्ठते ऽग्निष्टोमः संतिष्ठते ऽग्निष्टोमः । ॥ २२ ॥ षष्ठः ॥

॥ इत्यष्टमः प्रश्नः ॥

---

[1] Thus TJPBh.; •तरं BF.

[2] Thus TBh.; •तरीं PBJF.

प्रवर्ग्यꣳ संभरिष्यन्नुपकल्पयते खादिरीमौदुम्बरीं वैणवीं वैकङ्कतीं वाभ्रिं व्याममात्रीं वारत्निमात्रीं वोभयतःक्ष्णूं मृदं च भावितां करणीयां कृष्णाजिनं वराहविहतं वल्मीकवपामूतीकस्तम्बं वादारस्तम्बं वा छागापयो ऽर्मकपालानि शर्करा अश्वाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि सूनामधिकरणीं कर्तारं कुशलं वेणुकाण्डं मदन्तीरित्य।थामावास्येन वा हविषेष्ट्वा नक्षत्रे वा पूर्वाꣳ शान्तिमुपयन्ति नमो वाच इत्य।थाग्रेण शालां धनुर्मात्रे वेद्यै गर्तं खानयति। तद्भावितां मृदमवलेपयति। समां बिलेन करोति। तदुपसादयति वराहविहतं वल्मीकवपामूतीकस्तम्बं वादारस्तम्बं वा स्थाले छागापय इत्य।थोत्तरतः पार्श्वतः संभाराणां प्राचीनाग्राणि तृणानि सꣳस्तीर्य तेषूपरि कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणात्य।थोत्तरꣳ शालाखण्डमग्रेण[1] स्फ्येनोद्धृत्यावोक्ष्य सिकता निवपति। तं परिमण्डलं खरं करोत्य।थैनꣳ सिकताभिराभ्राग्निं करोति। तं कुशतरुणकैर्दूर्वाग्रन्थिभिरिति संप्रच्छाद्याथैनं परिश्रयन्ति। तस्योदीचीं द्वारं कुर्वन्ति। तदुपसादयत्यर्मकपालानि शर्करा अश्वाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि सूनामधिकरणीं कर्तारं कुशलं वेणुकाण्डमित्य।थ गार्हपत्ये मदन्तीरपो ऽधिश्रयत्य।न्तर्वेद्यभ्रिं निदधाति। परिश्रयन्ति द्वाराणि। पत्नीशाले पत्नीं परिश्रयन्ति।

---

[1] Thus all except B, which has शालामंडपम॰।

परिस्तृणन्ति ˈ दक्षिणत उपविशतो ब्रह्मा च यजमानश्चाथ पूर्वाꣳ शान्तिमुपयन्ति येषामनुपेता भवत्यˈथ[1] गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये सावित्रं जुहोत्यन्वारब्धे यजमाने ॥ १ ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहेति ˈ जुहोत्यदीक्षितस्य ˈ जपति दीक्षितस्याˈथाभ्रिमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्याˈदायाभिमन्त्रयते ऽभ्रिरसि नारिरस्यध्वरकृद्देवेभ्य इत्यˈथैनामादायोपोत्तिष्ठत्युत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचेति ˈ प्रैति प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु न इत्यˈथ भाविता मृदमुपतिष्ठते देवी द्यावापृथिवी अनु मे ऽमꣳसाथामित्यˈभ्रिया प्रहरत्यृध्यासमद्य मखस्य शिर इति ˈ मखाय त्वेति हरति ˈ मखस्य त्वा शीर्ष्ण इत्युत्तरतः कृष्णाजिने निवपत्युदूह्योपस्थानˈमेवमेव द्वितीयꣳ हरत्येवं तृतीयं ˈ तूष्णीं चतुर्थं ˈ पर्यैतस्यै शिनष्ट्यˈथ वराहविहतमुपतिष्ठत इयत्यग्र आसीरित्यˈभ्रिया प्रहरत्यृध्यासमद्य मखस्य शिर इति ˈ मखाय त्वेति हरति ˈ मखस्य त्वा शीर्ष्ण इत्युत्तरतः कृष्णाजिने निवपत्युदूह्योपस्थानˈमेवमेव

---

[1] Thus I only, the other MSS. भवंत्यथ ; PH om, the passage अथ ... भवति ।

द्वितीयꣳ हरत्येवं तृतीयं । तूष्णीं चतुर्थं । पर्येतस्य शिनष्ट्यथ वल्मीकवपामुपतिष्ठते देवीर्वम्रीरस्य भूतस्य प्रथमजा ऋतावरीरित्यभ्रिया प्रहरत्यृध्यासमद्य मखस्य शिर इति । मखाय त्वेति हरति । मखस्य त्वा शीर्ष्ण इत्युत्तरतः कृष्णाजिने निवपत्युदूह्योपस्थानमेवमेव द्वितीयꣳ हरत्येवं तृतीयं । तूष्णीं चतुर्थं । पर्येतस्यै शिनष्ट्यथोतीकस्तम्बं वादारस्तम्बं वोपतिष्ठत इन्द्रस्यौजो ऽसीत्यभ्रिया प्रहरत्यृध्यासमद्य मखस्य शिर इति । मखाय त्वेति हरति । मखस्य त्वा शीर्ष्ण इत्युत्तरतः कृष्णाजिने निवपत्युदूह्योपस्थानमेवमेव द्वितीयꣳ हरत्येवं तृतीयं । तूष्णीं चतुर्थं । पर्येतस्य शिनष्ट्यथ छागापय उपतिष्ठते ऽग्निजा असि प्रजापते रेत इत्यभ्रिमवदधात्यृध्यासमद्य मखस्य शिर इति । मखाय त्वेति हरति । मखस्य त्वा शीर्ष्ण इत्युत्तरतः कृष्णाजिने मृदि प्रश्चोतयत्युदूह्योपस्थानमेवमेव द्वितीयं प्रश्चोतयत्येवं तृतीयं । तूष्णीं चतुर्थं । चतुर्थेन सह सर्वश एवैतच्छागापय स्थालेन मृदि परिषिञ्चत्यथैतानतिशेषानपो ऽभ्यवहरन्त्यन्वेव वा प्रकिरन्ति । प्रायश्चित्ताय वा परिशाययन्ति[1] ।

॥ २ ॥

अथ प्रवर्ग्यमाददते ऽवनाम्य मुखान्यनभिप्रश्वसन्तो । न प्रवर्ग्यं चादित्यं चान्तर्दधति । बहवो हरन्तीति विज्ञायते । ऽथैनमानयन्त्येतु ब्रह्मणस्पतिरा देव्येतु सूनृता । अच्छा वीरं

---

[1] परिशापयंति I.

नयँ पङ्क्तिराधसं देवा यज्ञं नयन्तु न इत्यथैनं खर उपाहरन्त्यायुर्धेहि प्राणं धेह्यपानं धेहि व्यानं धेहि चक्षुर्धेहि श्रोत्रं धेहि मनो धेहि वाचं धेह्यात्मानं धेहि प्रतिष्ठां धेहि मां धेहि मयि धेहीत्यथैनमर्मकपालैः शर्कराभिरवाञ्जनपिष्टाभिरजलोमैः कृष्णाजिनलोमैरिति सꣳसृज्य मदन्तीभिरुपसृजति मधु त्वा मधुला करोत्विति। पिण्डं करोति मखस्य शिरो ऽसीति। यज्ञस्य पदे स्थ इत्यङ्गुष्ठाभ्यामुपनिगृह्णात्यथ तृतीयं मृदो ऽपच्छिद्य त्रीन्पिण्डान्करोति। तेषामेकं कर्त्रे प्रयच्छति गायत्रो ऽसीति। तेनास्य बुध्नं करोति गायत्रेण त्वा छन्दसा करोमीत्यतिशिष्टायै मृदो ऽर्धं प्रयच्छति त्रैष्टुभो ऽसीति। तेनास्य मध्यं करोति त्रैष्टुभेन त्वा छन्दसा करोमीति। सर्वामन्ततो मृदं प्रयच्छति जागतो ऽसीति। तेनास्य बिलं करोति जागतेन त्वा छन्दसा करोमीति। तं प्रादेशमात्रं पृथुबुध्नं मध्ये लग्नं करोत्यथास्य वेणुकाण्डेन द्विभागमवविध्यति। तदस्य पिन्वनं भवत्यथास्य त्र्यङ्गुले वा चतुरङ्गुले वा रास्नां पर्यस्यति मखस्य रास्नासीत्यथास्य बिलं गृह्णात्यदितिस्ते बिलं गृह्णातु पाङ्क्तेन छन्दसेत्यथैनमादित्येनाभितपति सूर्यस्य हरसा श्रायेत्यथैनं खरे निदधाति। निहितमनुमन्त्रयते मखो ऽसीत्येवमेव द्वितीयं महावीरं करोत्येवं तृतीयं। तूष्णीं पिन्वने रौहिणकपाले चाज्यस्थालीं चाथ या मृदतिशिष्यते तया प्रवाते प्रतिलेपमुपवातयति। तेषूपवातेषूपकल्पयत एकविꣳशतिं वृष्णो अश्वस्य शकृत्पिण्डानभिन्नमग्निं पचनमित्यथाश्मकमादीप्य मुख्यं महा-

वीरं धूपयति वृष्णो अश्वस्य निष्पदसि वरुणस्त्वा धृतव्रत आधूपयतु मित्रावरुणयोर्ध्रुवेण धर्मणेत्य'न्तरतश्च बाह्यतश्च सुधूपितं कृत्वा निदधात्येवमेव द्वितीयं महावीरं धूपयत्येवं तृतीयं' तूष्णीं पिन्वने रौहिणकपाले चाज्यस्थालीं चा'थोत्तरेण शालामुरुबिलमिवावटं खानयति' तं पचनेनावस्तीर्य तस्मिन्प्राचो वोदीचो वा महावीरानायातयति' पुरस्तात्पिन्वने' पश्चाद्रौहिणकपाले चाज्यस्थालीं चा'थैनान्पचनेनोपरिष्टात्संप्रच्छाद्य मृदावलिम्पति' चतुरङ्गुलमनुदिशमादीपनायातिशिनष्ट्य'थोपोषति ॥ ३ ॥

अर्चिषे त्वेति पुरस्ताच्छोचिषे त्वेति दक्षिणतो' ज्योतिषे त्वेति पश्चात्तपसे त्वेत्युत्तरतस्ते ऽह्ना वा रात्र्या वा पच्यन्ते' यदि प्रातरुपोषति सायमुपैति' यदि सायं प्रातस्तेषु पक्केषूपकल्पयते गोपयश्छागापयो धृष्टिमश्मसंद्रावꣳ[1]' सतꣳ संदꣳशं खारीꣳ शिक्यं कृष्णाजिनमित्येतत्समादायाभ्यैत्यभीमं[2] महिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् ॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तममित्य'थ धृष्टिमादत्ते सिद्ध्यै त्वेति' तया मुख्यान्महावीरादङ्गारानुद्वपति देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः । सुबाहुरुत शक्त्येत्य'थैनमुच्छ्रयत्युत्तिष्ठ बृहन्भवोर्ध्वस्तिष्ठ ध्रुवस्त्वमित्य'थैनमाग्नये प्रति-

---

[1] Thus all MSS.; the word occurs also elsewhere; Bh. Keś. write संधावं ।

[2] °भ्यैति BT Keś.; °भ्येति JIHFP.

स्थापयत्यपद्यमानः पृथिव्यामाशा दिश आपृणेत्यथैनमन्वीक्षते सूर्यस्य त्वा चक्षुषान्वीक्ष ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा भूत्यै त्वेत्यथैनं प्रदक्षिणं पुरीषेण पर्यूहतीदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामीति यथावर्णमथैनꣳ संदꣳशेन परिगृह्य सते ऽवधाय छागापयसाच्छृणत्ति गायत्रेण त्वा छन्दसाच्छृणद्मि त्रैष्टुभेन त्वा छन्दसाच्छृणद्मि जागतेन त्वा छन्दसाच्छृणद्मि छृणत्तु त्वा वाक् छृणत्तु त्वोर्क् छृणत्तु त्वा हविश्छृन्धि वाचं छृन्ध्यूर्जं छृन्धि हविर्देव पुरश्चर सध्यासं त्वेत्यन्तरतश्च बाह्यतश्च खाच्छृणं कृत्वा गोपयसाभिविष्यन्दयत्येवमेव द्वितीयं महावीरमाच्छृणत्त्येवं तृतीयं । तूष्णीं पिन्वने रौहिणकपाले चाज्यस्थालीं चाथ यदि विधुर्वा प्रदरो वा जायते ऽश्मचूर्णानि छागापयसि संप्रकीर्य तैः प्रत्युष्योल्मुकेनाभितपति विधुं दद्राणं यद्दृते चिदभिश्रिष इति द्वाभ्याꣳ । सꣳ हैव रोहति । यद्यु वै सर्वश एव भिद्यत एतान्येव कपालान्यवाञ्जनं पिष्ट्वा यैषा मृत्प्रायश्चित्ताय परिशेते तया सꣳसृज्य कृत्वा पक्त्वाच्छृद्य निदधाति । तेषां यदा श्वसथ उपरमत्यथैनान्खार्याꣳ समवधाय कृष्णाजिनेनोपरिष्टात्संप्रच्छाद्योत्तरे शालाखण्डे शिक्य आसजति । यथा पत्नी न पश्यति तथा । त आ कालात्परिशेरे । ऽथोत्तराꣳ शान्तिमुपयन्ति शं नो वातः पवतां मातरिश्वेति । ॥ ४ ॥ प्रथमः ॥

श्वो राज्ञः क्रय इत्युपकल्पयत औदुम्बरीꣳ सम्राडासन्दीमौदुम्बरीꣳ स्थूणां गोदोहनीमौदुम्बरं छागायै शङ्कुमौदुम्बरꣳ

शफोपयमनमौदुम्बरꣳ स्रुवमौदुम्बर्यौ स्रुचावनिष्कीर्णे रौहिणहवणी द्वे औदुम्बरी धृष्टी त्रीणि पवित्राणि कार्ष्णाजिनान्यौदुम्बरदण्डानि । वैणवदण्डानीत्येके । षडौदुम्बराञ्छकलान्वैकङ्कतीं च[1] समिधं त्रयोदश वैकङ्कतान्परिधीन्वैकङ्कतीꣳ स्रुचं प्रचरणीं कार्ष्मर्यमयान्परिधीन्सुवर्णरजतौ च रुक्मौ द्वे घर्मदुघे धेनुं च छागां च द्वौ कुशमयौ वेदावेकं मौञ्जं वेदमपरिवासितं मौञ्जं रज्जुदाम मुञ्जप्रलवान्व्रीहिपिष्टानि खरेभ्यः सिकता इत्यथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा राजानं क्रीत्वोह्यातिथ्यं[2] निर्वपत्यातिथ्येन प्रचर्य पूर्वाꣳ शान्तिमुपयन्ति नमो वाच इत्यथापरेण गार्हपत्यं तृणानि सꣳस्तीर्य तदेतत्परिघर्म्यꣳ सर्वꣳ सꣳसादयन्त्यत्र सम्राडासन्दीमत्र स्थूणां गोदोहनीमत्र छागायै शङ्कुमित्यथोत्तरेण गार्हपत्यꣳ स्फ्येनोद्धृत्यावोक्ष्य सिकता निवपति । तं प्रादेशमात्रं परिमण्डलं प्रवृञ्जनीयं खरं करोत्यथैनꣳ सिकताभिराभ्राशिनं करोत्यथोत्तरेणाहवनीयꣳ स्फ्येनोद्धृत्यावोक्ष्य सिकता निवपति । तं प्रादेशमात्रं परिमण्डलमुद्वासनीयं खरं करोत्यथैनꣳ सिकताभिराभ्राशिनं करोत्यथोत्तरे शालाखण्डे स्फ्येनोद्धृत्यावोक्ष्य सिकता निपवति । तं चतुरश्रं[3] निष्यन्दनवन्तमुच्छिष्टखरं करोत्यथैनꣳ सिकताभिराभ्राशिनं करोत्यथाध्वर्युः प्रचरणीयं

---

[1] om. IHP.

[2] क्रीत्वोह्य° only I.

[3] Thus BTBh.; °स्रं the other MSS.

स्वावापराह्णिके ˈ ऽथाध्वर्युः प्रचरणीयं महावीरꣳ शफाभ्यां परिगृह्य सव्ये पाणौ समावृत्याज्यस्थाल्याः सकृदुपहतेनाज्येन गार्हपत्ये ऽनवानꣳ संतताः सप्त प्राणाहुतीर्जुहोति प्राणाय स्वाहा व्यानाय स्वाहापानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा मनसे स्वाहा वाचे सरस्वत्यै स्वाहेति ˈ चतस्र उत्तरा यथोपपादं दक्षाय स्वाहा क्रतवे स्वाहौजसे स्वाहा बलाय स्वाहेत्यˈथैनमाज्येनानक्ति देवस्त्वा सविता मध्वानक्त्वित्येˈतस्मिन्काले प्रतिप्रस्थाता राजतꣳ रुक्मं प्रवृञ्जनीये खर उपगूहति पृथिवीं तपसस्त्रायस्वेत्यˈथ मुञ्जप्रलवान्व्यतिषज्यादीपयत्यर्चिरसि शोचिरसि ज्योतिरसि तपो ऽसीति ˈ तान्प्रवृञ्जनीये[1] खरे संप्रकीर्य तेषु प्रचरणीयं महावीरꣳ सꣳसादयति ॥ ६ ॥

सꣳसीदस्व महाꣳ असि शोचस्व देववीतमः । वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतमित्यˈथैनमाज्येन पूरयत्यञ्जन्ति यं प्रथयन्तो न विप्रा वपावन्तं नाग्निना तपन्तः । पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादीदित्यथास्य प्रादेशेन दिशो व्यास्थापयत्यनाधृष्या[2] पुरस्तादग्नेराधिपत्य आयुर्मे दा इति पुरस्तात्ˈपुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दा इति दक्षिणतः ˈ सुषदा पश्चाद्देवस्य सवितुराधिपत्ये प्राणं मे दा इति पश्चादाˈश्रुतिरुत्तरतो मित्रावरुणयोराधिपत्ये श्रोत्रं

---

[1] तान्प्र॰ BT Keś अथैतान्प्र॰ or अथैनान्प्र॰ the other MSS.

[2] Thus BTI Bh. and HP (the last two व्यास्था॰), FJ: व्यवस्था॰; Keś. thrice व्यास्थापयत्य॰

मे दा इत्युत्तरतो । विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्ये ब्रह्म मे दाः क्षत्रं मे दास्तेजो मे धा वर्चो मे धा यशो मे धास्तपो मे धा मनो मे धा इत्युपरिष्टादथैनामभिमृशति मनोरश्वासि भूरिपुत्रा विश्वाभ्यो मा नाष्ट्राभ्यः पाहि सूपसदा मे भूया मा मा हिꣳसीरित्यथ धृष्टीभ्यामुदीचो[1] ऽङ्गारान्निरूहति तपो ष्वग्ने अन्तराꣳ अमित्रान्तपा शꣳसमररुषः परस्य । तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्तामजरा अयास इति । तैरेनं प्रदक्षिणं परिचिनोति चित स्थ परिचितः स्वाहा मरुद्भिः परिश्रयस्वेत्यथैनं त्रयोदशभिर्वैकङ्कतैः परिधिभिः परिचिनुतो ऽध्वर्युश्च प्रतिप्रस्थाता च । मा असीति प्राङ्ङध्वर्युः । प्रमा असीत्युदङ्ङ् प्रतिप्रस्थाता । तावेवमेव व्यतिषङ्गं प्रतिमा असि संमा असि विमा अस्युन्मा असीत्यथैनं त्रयोदशं परिधिं दक्षिणत ऊर्ध्वाग्रं निमिनोत्यन्तरिक्षस्यान्तर्धिरसीत्यथैनꣳ सौवर्णेन रुक्मेणापिदधाति दिवं तपसस्त्रायस्वेत्यथैनमुपतिष्ठत आभिर्गीर्भिः शुक्रं ते अन्यदर्हन्बिभर्षि सायकानि धन्वेति । प्रज्वलिते रुक्ममपकर्षति । ॥ ७ ॥

अथ धवित्राण्यादत्ते गायत्रमसीत्यन्यतरत्त्रैष्टुभमसीत्यन्यतरज्जागतमसीत्यन्यतरत्तैरेनं पश्चात्प्राङ् जान्वाच्योर्ध्वं धूनोति मधु[2] मध्वित्युत्तरतस्तिष्ठते प्रतिप्रस्थात्रे द्वे धवित्रे प्रयच्छति ।

---

[1] धृष्णिभ्यामु॰ only IPH.

[2] मधु twice JT; thrice the other MSS.

तयोरन्यतरदाग्नीध्रायोत्प्रयच्छत्यथैनं त्रिः प्रदक्षिणं परियन्ति प्रणवेप्रणवे धून्वन्तस्त्रिः परीत्योत्तरतस्तिष्ठन्त्यथ धवित्राण्यादत्ते । ऽपरेण परिक्रान्तायोत्तरतस्तिष्ठते प्रतिप्रस्थात्रे द्वे धवित्रे प्रयच्छति । तयोरन्यतरदाग्नीध्रायोत्प्रयच्छत्यथैनं पर्युपविशन्ति । पश्चात्प्राङ्मुखो ऽध्वर्युरुपविशति । पुरस्तात्प्रत्यङ्मुखः प्रतिप्रस्थातोत्तरतो दक्षिणामुख आग्नीध्रस्त एवमेव प्रणवेप्रणवे धून्वन्त आसत उपसमासमु[1]ल्मुकान्याप्याययन्तो महावीरमथ यत्र होतुरभिजानाति याभिर्वर्तिकां ग्रसिताममुञ्चतमिति तदेनमुपोत्थाय रोचयतो ऽध्वर्युश्च यजमानश्च दश प्राचीर्दश भासि दक्षिणेत्येतेनानुवाकेनाथ यत्र होतुरभिजानात्यप्नस्वतीमश्विना वाचमस्मे इति तद्धवित्राण्युपोद्यच्छन्ते । ऽथ यत्र होतुरभिजानात्यरूरुचदुषसः पृश्निरग्रिय इति तद्रुचितो घर्म इत्युक्त्वा यथेतं त्रिः पुनः प्रतिपरियन्ति निधाय धवित्राण्यवकाशैरवेक्षमाणा उपतिष्ठन्ते ऽपश्यं गोपामिति प्रतिपद्याशीमहि त्वा मा मा हिꣳसीरित्यातो । ऽथ गार्हपत्यमुपतिष्ठते त्वमग्ने गृहपतिर्विशामसि विश्वासां मानुषीणाꣳ शतं पूर्भिर्यविष्ठ पाह्यꣳहसः समेद्धारꣳ शतꣳ हिमास्तन्द्राविणꣳ हार्दिवानमिहैव रातयः सन्त्वित्यन्तर्हिते प्रतिप्रस्थाता वेदे पत्नीं वाचयति त्वष्टीमती ते सपेयेत्यान्तादनुवाकस्यैतस्मिन्काले प्रतिप्रस्थाता दक्षिणꣳ रौहिणं जुहोत्यहर्ज्योतिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषाꣳ स्वाहेति । ॥ ८ ॥ द्वितीयः ।

---

[1] Thus BPJ Bh. Keś.; उपसमासव° H1; उपसमासंव° P.

अथ रशनामादत्ते देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्यादायाभिमन्त्रयतेऽदित्यै रास्नासीति दोहनं कꣳसं पिन्वने इति[1] प्रतिप्रस्थातापरेण परिक्रम्याथैतां घर्मदुघं त्रिरुपाꣳशु देवनामभिराह्वयतीड एह्यदित एहि सरस्वत्येहीति त्रिरुच्चैर्दक्षिणया द्वारोपनिष्क्रम्य यदस्यै नाम भवति तेनासावेह्यसावेहीत्यथैनाꣳ[2] रशनयाभिदधात्यदित्या उष्णीषमसीति वायुरस्यैड इति घर्मदुघो वत्समभिमृशत्यथैनमुपावसृजति पूषा त्वोपावसृजत्वश्विभ्यां प्रदापयेति धयन्तमनुमन्त्रयते[3] यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि । यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे करिति प्रत्तायामुन्नयत्युस्र घर्मꣳ शिꣳषोस्र घर्मं पाहि घर्माय शिꣳषेति नियुज्य संधायोपसीदति बृहस्पतिस्त्वोपसीदत्विति स्तनान्संमृशति दानव स्थ पेरवो विष्वग्वृतो लोहितेनेत्यथ यत्र होतुरभिजानात्या दशभिर्विवस्वत इति तदेनां पिन्वने पिन्वयत्यश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पतये पिन्वस्वेन्द्राय पिन्वस्वेन्द्राय[4] पिन्वस्वेत्यतिशिष्टं कꣳसे दोहयत्येतस्मिन्काले

---

[1] अथ ins. BT.

[2] असावेहि twice JT; thrice the other MSS, also P, comp. Rudradatta on Āp. XV. 9. 4.

[3] Thus TF Bh. Keś. (the last glosses स्तनं पिबन्तमनु॰, thus also the Somaprayoga 10); the other MSS. IBHP have स्तनमभि॰ ।

[4] All the MSS, except P, have इन्द्राय पिन्वस्व once only, but comp. Taitt. Ār. v. 7. 4 s. f. and 5 init. and Padārthanirv. p. 287.

प्रतिप्रस्थाता पिन्वने छागां पिन्वयति तूष्णीमथ यत्र होतुरभिजानात्युत्तिष्ठ ब्रह्मणस्पत इति तत्प्रतिप्रस्थात्रे पयसी संप्रदायैतेनैव यथेतमेत्य शफोपयमानादत्ते[1] गायत्रो ऽसीत्यन्यतरत्त्रैष्टुभो ऽसीत्यन्यतरज्जागतमसीत्युपयमनमथ यत्र होतुरभिजानात्युपद्रव पयसा गोधुगोषमिति तत्पयसी आह्रियमाणे अभिमन्त्रयते[2] महोर्जो भागेनोप मेहीन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजता वडित्यथ पुरस्तात्प्रत्यञ्चावुपविश्य महावीरे पयसी अवनयतो ऽध्वर्युश्च प्रतिप्रस्थाता चाध्वर्युः पूर्वो गोपयो ऽवनयति स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमि स्वाहेत्यथास्योष्माणमन्वीक्षते मधुहविरसि सूर्यस्य तपस्तपेत्येतस्मिन्काले प्रतिप्रस्थाता छागापयो ऽवनयति तूष्णीमुभयꣳ समानीयाध्वर्युस्तृतीयमवनयत्यत्र यत्कꣳसे पयस्तदुपयमने समवनयति प्रत्यूह्याङ्गारानथाध्वर्युः प्रचरणीयं महावीरꣳ शफाभ्यां परिगृह्णाति ॥ ९ ॥

द्यावापृथिवीभ्यां त्वा परिगृह्णामीति[3] वेदेनाधस्तादुपमृज्योपयमनेनोपयच्छत्यन्तरिक्षेण त्वोपयच्छामीत्यथैनमादायोपोत्तिष्ठति देवानां त्वा पितॄणामनुमतो भर्तुꣳ शकेयमिति

---

[1] Thus BT, Keś. and Taitt. Ār. v. 7. 5, comp. also Āp. xv. 9. 10; शफोपयमनानादत्ते HJIP शफोपयमनान्यादत्ते F and Padārthanirv. p. 287.

[2] Thus HIBP Keś., Padārthanirv.; प्रतिमंत्रयते TJF.

[3] I ins. मौंजेन before वेदेन।

प्राङ् हरति तेजोऽसि तेजोऽनु प्रेह्यग्निर्मा पृथिव्याः पातु वायुरन्तरिक्षात्सूर्यो दिवो दिविस्पृङ्मा मा हिꣳसीरन्तरिक्षस्पृङ्मा मा हिꣳसीः पृथिविस्पृङ्मा मा हिꣳसीः सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्यथ वातनामानि व्याचष्टे समुद्राय त्वा वाताय स्वाहेति पञ्चानवानमेवमेव द्वे उत्तरे । षडुत्तराणि यथोपपादमग्नये त्वा वसुमते स्वाहा सोमाय त्वा रुद्रवते स्वाहा वरुणाय त्वादित्यवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहा यमाय त्वाङ्गिरस्वते पितृमते स्वाहेति । विश्वा आशा दक्षिणसदिति दक्षिणत आसीनं ब्रह्माणमीक्षते । विश्वान्देवानयाडिहेति पश्चादासीनꣳ होतारꣳ । सव्येनात्याक्रामञ्जपति स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना स्वाहाग्नये यज्ञियाय शं यजुर्भिरिति । यजमानमतिवाचयत्यश्विना घर्मं पातꣳ हार्दिवानमहर्दिवाभिरूतिभिरनु वां द्यावापृथिवी मꣳसातामित्युच्चैराश्राव्याह घर्मस्य यजेति । वषट्कृते जुहोति स्वाहेन्द्रायेति । स्वाहेन्द्रावडित्यनुवषट्कृते हुत्वा वाचयति घर्ममपातमश्विना हार्दिवानमहर्दिवाभिरूतिभिरनु वां द्यावापृथिवी अमꣳसातां तं प्राव्यं यथावट् नमो दिवे नमः पृथिव्यै दिवि धा इमं यज्ञं यज्ञमिमं दिवि धा दिवं गच्छान्तरिक्षं गच्छ पृथिवीं गच्छ पञ्च प्रदिशो गच्छ देवान्घर्मपान्गच्छ पितॄन्घर्मपान्गच्छेत्येतस्मिन्काले प्रतिप्रस्थाता पिन्वनेनोपयमनादुपहत्य प्रचरणीयं महावीरं पूरयत्यथैनमन्तःपरिध्यभिपीप-

यतो[1] ऽध्वर्युश्च प्रतिप्रस्थाता च सहैवेषे पीपिह्यूर्जे पीपिहि ब्रह्मणे पीपिहि क्षत्राय पीपिह्यद्भ्यः पीपिह्योषधीभ्यः पीपिहि वनस्पतिभ्यः पीपिहि द्यावापृथिवीभ्यां पीपिहि सुभूताय पीपिहि ब्रह्मवर्चसाय पीपिहि यजमानाय पीपिहि मह्यमित्युपांशूक्त्वा ज्यैष्ठ्याय पीपिहीत्युच्चैरथैनमनुदिशमात्मानमभि पीपयति ५
त्विष्यै त्वा द्युम्नाय त्वेन्द्रियाय त्वा भूत्यै त्वेत्यत्र यन्महावीरे पयस्तदुपयमने समवनयत्यथोदङ्ङत्याक्रम्याथैतदुपयमनमन्तर्वेदि प्राचीनबिलꣳ सादयत्येतस्मिन्काले प्रतिप्रस्थाता राजतꣳ रुक्ममुद्वासनीये खर उपगूहति । तस्मिन्प्रचरणीयं महावीरꣳ सादयति ॥ १० ॥ १०

घर्मासि सुधर्मा मे न्यस्मे ब्रह्माणि धारय क्षत्राणि धारय विशं धारय नेत्त्वा वात स्कन्दयादित्यथ यद्यभिचरेदमुष्य त्वा प्राणे सादयाम्यमुना सह निरर्थं गच्छ यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्य षडौदुम्बराञ्छकलान्याचति । तेषामेकैकेनोपयमनादुपहत्य पूर्वार्धे आहवनीयस्य प्रश्चोतयति १५
पूष्णे शरसे स्वाहेत्यथैनमन्तराञ्जनं मध्यमे परिधौ सꣳस्पृष्टꣳ सादयत्येवमेव द्वितीयेनोपयमनादुपहत्य पूर्वार्धे एवाहवनीयस्य प्रश्चोतयति ग्रावभ्यः स्वाहेति । तं तथैवाञ्जनं[2] मध्यमे परिधौ

---

[1] Thus (ऽभि०) all and Bh., ऽतिपीप० F only.

[2] Thus B; तंतथैतवं ॥ जनं I; FJ om. तं and have तथांतरांजम तंतथवातरांजनं T; तंतथातरांजनं H; comp. infra.

सꣳसृष्टꣳ सादयत्येवमेव तृतीयेनोपयमनादुपहृत्य मध्यत आहवनीयस्य प्रश्चोतयति प्रतिरेभ्यः स्वाहेति । तं तथैवाञ्जनं[1] मध्यमे परिधौ सꣳसृष्टꣳ सादयत्येवमेव चतुर्थेनोपयमनादुपहृत्यापरार्ध आहवनीयस्य प्रश्चोतयति द्यावापृथिवीभ्याꣳ स्वाहेत्यथैनमूर्ध्वाञ्जनं भस्मान्त उपगूहत्येवमेव पञ्चमेनोपयमनादुपहृत्य दक्षिणार्ध आहवनीयस्य प्रश्चोतयति पितृभ्यो घर्मपेभ्यः स्वाहेत्यथैनं बर्हिराञ्जनं दक्षिणे परिधौ सꣳसृष्टꣳ सादयत्यथैतꣳ षष्ठꣳ शकलꣳ सर्वेषु लेपेषु समज्योपयमनादन्तत उपहृत्योत्तरार्ध आहवनीयस्य प्रश्चोतयति रुद्राय रुद्रहोत्रे स्वाहेत्यथैनमुत्तरेण शालाया अतीकाशेनानन्वीक्षमाणो निरस्यत्यमुना सह निरर्थं गच्छ यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्यातिशिष्टाञ्छकलानद्भिः सꣳस्पर्श्याहवनीये[2] ऽनुप्रहरत्येतस्मिन्काले प्रतिप्रस्थातोत्तरꣳ रौहिणं जुहोत्यहर्ज्योतिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषाꣳ स्वाहेत्यथैताꣳ समिधं मध्यत आहवनीयस्याभ्यादधाति तूष्णीं । तस्यामादीप्तायां प्रतिमुखं द्विर्जुहोति भूः स्वाहेत्यथैतदुपयमनमन्तर्वेदि प्राचीनबिलꣳ सादयित्वा तस्मिन्नग्निहोत्रविधिं चेष्टित्वा । स यावन्तः प्रवर्ग्यस्य[3]र्त्विजस्तेषूपहवमिष्ट्वा यजमान एव प्रत्यक्षं भक्षयति हुतꣳ हविर्मधु हविरिन्द्रतमे ऽग्नौ पिता नो ऽसि मा

---

[1] Thus PJHI; तथैवांतराजनं TF.

[2] सꣳस्पृश्य all.

[3] प्रवर्ग्यस्य om. PHTJ., the three others read it.

मा हिꣳसीरश्याम ते देव घर्म मधुमतो वाजवतः पितुमतोऽङ्गिरस्वतः स्वधाविनोऽशीमहि त्वा मा मा हिꣳसीरित्यथैतदुपयमनं परिकर्मी वाग्नीध्रो वोच्छिष्टखरे मार्जयित्वान्तर्वेदि प्राचीनबिलꣳ सादयित्वा तस्मिन्सुवर्णरजतौ च[1] रुक्मौ प्रास्य मदन्तीरप आनीय हिरण्यवतीभिर्मार्जयन्ते ॥ ११ ॥

हिरण्यवर्णाः शुचयः पावका इति चतसृभिश्चैव मदन्तीरपो निनीयाज्यस्थाल्याः स्रुवेणोपघातं घर्मप्रायश्चित्तानि जुहोति प्राणाय स्वाहा पूष्णे स्वाहेत्येताभ्यामनुवाकाभ्यामथैतदुपयमनमन्तर्वेदि प्राचीनबिलꣳ सादयित्वा तदेतत्परिघर्म्यꣳ सर्वꣳ समवशमयन्नाह[2] घर्मायोत्साद्यमानायानुब्रूहीत्यथैतदुपयमनमग्रेणाहवनीयं पर्याहृत्य दक्षिणतः सम्राडासन्द्यां कृष्णाजिने प्राचीनबिलꣳ सादयति स्वाहा त्वा सूर्यस्य रश्मिभ्य इत्यथोत्तराꣳ शान्तिमुपयन्ति शं नो वातः पवतां मातरिश्वेत्यथापराह्ण आपराह्णिकेन प्रवर्ग्येण प्रचरति तस्य यद्विहितं विहितमेवास्य तत्समानं कर्म दक्षिणस्य रौहिणस्य होमादथ दक्षिणꣳ रौहिणं जुहोति रात्रिर्ज्योतिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषाꣳ स्वाहेत्येवमेवोत्तरꣳ रौहिणं जुहोति समानं कर्म समिदाधानादथैताꣳ समिधं मध्यत आहवनीय-

---

[1] om T; Keś also reads it.

[2] Thus Bh., Keś. (pr. m.); समवशमयंत चाह J; समवशयन्नाह PHT. (Keś. sec m.); सवमवशयन्नाह F; समवशन्नाह I; समवस्वशन्नाह B, comp. Baudh. pitṛmedhasūtra p. 21.1 and S'at. Br. vii. 3.2.1. The word occurs again infra, ix. 15, and in the Aśvamedhapraśna.

स्याभ्यादधात्यपीपरो माह्नो रात्रियै मा पाह्येषा ते अग्ने
समित्तया समिध्यस्वायुर्मे दा वर्चसा माञ्जीरिति सायमपी-
परो[1] मा रात्रिया अह्नो मा पाहीति प्रातः । प्रातर्मन्त्रेणात
ऊर्ध्वं पूर्वाह्णिके[2] ऽभ्यादधाति । सायंमन्त्रेणापराह्णिके । तस्या-
५ मादीप्तायां[3] प्रतिमुखं [4]द्विर्जुहोत्यग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति
सायꣳ । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः । समानं
कर्मा संप्रैषादथैतदुपयमनमग्रेणाहवनीयं पर्याहृत्य दक्षिणतः
सम्राडासन्द्यां कृष्णाजिने प्रतीचीनबिलꣳ सादयति स्वाहा त्वा
नक्षत्रेभ्य इत्यथोत्तराꣳ शान्तिमुपयन्ति शं नो वातः पवतां
१० मातरिश्वेति । स एवमेव प्रवर्ग्येण प्रचरति त्र्यहꣳ षडहं द्वाद-
शाहꣳ संवत्सरं । चतुरो वा[5] मासाꣳस्तापश्चिते ऽग्नौ । प्रवर्ग्यं[6]
भक्षयित्वा संवत्सरं न माꣳसमश्नीयान्न रामामुपेयान्न मृन्मयेन
पिबेन्नास्य राम उच्छिष्टं पिबेत्तेज एव तत्सꣳश्यतीति ब्राह्म-
णम् । ॥ १२ ॥ तृतीयः ॥

१५ प्रवर्ग्यमुद्वासयिष्यन्नुपकल्पयते त्रीञ्छालाकानिध्माꣳस्त्रीणि
सतान्युदकुम्भौ दधि मधुमिश्रं पुमुष्टिमवकाभारं विꣳशति-

---

[1] सायम् om. all except B.

[2] पौर्वाह्णिके B only.

[3] This passage is found thus in T: सायंमन्त्रेणात ऊर्ध्वमापराह्णिके ऽभ्यादधाति तस्यामादीप्तायां etc., but comp. Rudradatta on Āp. xv. 12,7.

[4] द्विर् om. PT1H Keś.

[5] om. TF.

[6] प्रावर्ग्यं FIJ; the other MSS. also P and Bh., प्रव०।

महावीरꣳ शफाभ्यां परिगृह्य प्रवृञ्जनीये खरे सादयत्य।थैनं मौञ्जेन वेदेनापिदधात्य।थैतामासन्दीमग्रेणाहवनीयं[1] पर्याहृत्य दक्षिणतो निदधाति । तस्यां कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोप[2]स्तृणात्य।थैतावुपशयौ महावीरौ वेदाभ्यां परिगृह्याग्रेणाहवनीयं पर्याहृत्य दक्षिणतः सम्राडासन्द्यां कृष्णाजिने ५
प्राचीनबिलौ सादयत्य।थैतामभ्रिमग्रेणाहवनीयं पर्याहृत्य दक्षिणतः सम्राडासन्द्यां कृष्णाजिने सादयत्य।थैतां मृदमतिशिष्टामग्रेणाहवनीयं पर्याहृत्य दक्षिणतः सम्राडासन्द्यां कृष्णाजिने सादयत्य।थैताꣳ स्थूणां गोदोहनीं छागायै शङ्कुमित्यादाय जघनेन दक्षिणेन गार्हपत्यं परिक्रम्य दक्षिणया द्वारोपनिर्हृत्य १०
होतुः संदर्शे स्थूणां निहत्य मौञ्जेन दाम्ना घर्मदुघो वत्सं बध्नन्ति । तमुत्तरेण छागायै शङ्कुं निहत्य छागां निग्रथ्नन्ति । प्रत्युब्जति छगलम।थैतेनैव यथेतमेत्य निष्क्रमयन्ति[3] वृषलान् । ह्वयन्ति पत्नीꣳ । ह्वयन्ति होतारꣳ । ह्वयन्ति ब्रह्माणꣳ । ह्वयन्ति १५
प्रतिप्रस्थातारꣳ । ह्वयन्ति प्रस्तोतारꣳ । ह्वयन्त्याग्नीध्रं । परिश्रयन्ति द्वाराणि । पत्नीशाले पत्नीं परिश्रयन्ति । परस्तृणन्ति । दक्षिणत उपविशतो ब्रह्मा च यजमानश्चा।त्र पूर्वाꣳ शान्तिमुपयन्ति येषामनुपेता भवति[4] । ॥ ५ ॥

---

[1] ॰थैताꣳ सम्राडासंदीम॰ I.

[2] Thus PITHF; पास्तृणाति JB.

[3] ॰क्रामयंति BF.

[4] Thus PIH Keś.; भवंति TB.

अथाध्वर्युः सपवित्राः प्रोक्षणीराददान आह ब्रह्मन्प्रवर्ग्येण प्रचरिष्यामो होतर्घर्ममभिष्टुह्यग्नीद्रौहिणौ पुरोडाशावधिश्रय प्रतिप्रस्थातः प्रवर्ग्यं विहर प्रस्तोतः सामानि गायेति तद्ब्रह्मा प्रसौति यजुर्युक्तꣳ सामभिराक्तखं त्वा विश्वैर्देवैरनुमतं मरुद्भिः। दक्षिणाभिः प्रततं पारयिष्णुꣳ स्तुभो वहन्तु सुमनस्यमानꣳ स नो रुचं धेह्यहृणीयमानो भूर्भुवः सुवरोमिन्द्रवतः प्रचरतेत्यथाध्वर्युः प्रचरणीयं महावीरं प्रोक्षति यमाय त्वा मखाय त्वा सूर्यस्य हरसे त्वेत्यभिप्राप्नुवन्परान्परान्संभारान्प्रोक्षति तमेव प्रतिप्रस्थाता प्रवर्ग्यं विहरत्यथाहवनीये कार्ष्मर्यमयान्परिधीन्परिदधाति तदुपसादयति षडौदुम्बराञ्छकलान्वैकङ्कतीं च समिधं गार्हपत्ये त्रयोदश वैकङ्कतान्परिधीन्सुवर्णरजतौ च रुक्मौ मुञ्जप्रलवान्रौहिणपिष्टानीत्यथैष आग्नीध्रो जघनेन गार्हपत्यमुपविश्य धृष्टीभ्यां प्रतीचो ऽङ्गारान्निरूह्य तेषु रौहिणकपाले उपदधात्यथ दारुणसंयुतानि पिष्टानि संयुत्य रौहिणौ पुरोडाशावधिश्रयत्यथाज्यं निर्वपत्यथाज्यमधिश्रयत्युभयं पर्यग्नि कृत्वा रौहिणौ पुरोडाशौ श्रपयत्येतस्मिन्काले प्रतिप्रस्थाता मौञ्जेन वेदेन होमार्थानि पात्राणि संमृशति महावीरꣳ स्रुवं पिन्वने रौहिणहवनी उपयमनमित्यथ प्रतिप्रस्थाताज्यमुत्पूय रौहिणौ पुरोडाशावुपस्तीर्णाभिघारितावुद्वास्य रौहिणहवनीभ्यां परिगृह्यान्तर्वेद्यासादयति दक्षिणं परिधिसन्धिमन्वेकमुत्तरं परिधिसन्धिमन्वितरं प्राञ्चौ पूर्वाह्णिके[1] प्रत्य-

---

[1] पौर्वाह्णिके B.

औदुम्बरीः समिधो मुञ्जप्रलवान्व्रीहिपिष्टानि खरेभ्यः सिकता इत्यत्र पूर्वाꣳ शान्तिमुपयन्ति नमो वाच इत्यथाग्रेणाहवनीयं तृणानि सꣳस्तीर्य तदेतत्परिघर्म्यꣳ सर्वꣳ सह सꣳसादयन्त्यथ सम्राडासन्दीमत्र स्थूणां गोदोहनीमत्र छागायै शङ्कुमित्यथैतौ खरौ नानैव सतयोः समुप्यात्रैव सह सꣳसादयन्त्यथैतमुच्छिष्टखरं[1] परिकर्मी वाग्नीध्रो वा सते समुप्य दक्षिणया द्वारोपनिर्हृत्य मार्जालीयदेशे निवपत्यथैतेनैव यथेतमेत्य निष्क्रमयन्ति[2] वृषलान्ह्वयन्ति पत्नीꣳ। ह्वयन्ति होतारꣳ। ह्वयन्ति ब्रह्माणꣳ। ह्वयन्ति प्रतिप्रस्थातारꣳ। ह्वयन्ति प्रस्तोतारꣳ। ह्वयन्त्याग्नीध्रं। परिश्रयन्ति द्वाराण्यथैतां पत्नीमुदग्दशेन वाससान्तर्दधति[3]। परिस्तृणन्ति। दक्षिणत उपविशतो ब्रह्मा च यजमानश्चाथ पूर्वाꣳ शान्तिमुपयन्ति येषामनुपेता भवत्यथ[4] गार्हपत्य आज्यं विलाप्योत्पुनात्येतस्मिन्काले प्रतिप्रस्थाताहवनीये शालाकमिध्ममादीप्य मुखदघ्ने धारयन्पुरस्तात्प्रत्यङ्मुखस्तिष्ठति। तमध्वर्युः पश्चात्प्राङ्मुखस्तिष्ठन्स्रुवाहुत्याभिजुहोति घर्म या ते दिवि शुग्या गायत्रे छन्दसि या ब्राह्मणे या हविर्धाने तां त एतेनावयजे स्वाहेति। तमत्रैव प्रास्यापरमादीप्य नाभिदघ्ने धारयन्पुरस्तात्प्रत्यङ्मुखस्तिष्ठति। तमध्वर्युः पश्चात्प्राङ्मुखस्तिष्ठन्स्रुवाहुत्याभिजुहोति घर्म या तेऽन्तरिक्षे शुग्या त्रैष्टुभे

---

[1] °थैनमु° HIP; °थैतदु° TF; °थैनदु° B.

[2] Thus PITHJ; निष्क्रामयंति BF.

[3] Thus BT Bh. Keś.; °दधाति IFHP.

[4] Thus PIFHJ; भवंत्यथ BT.

छन्दसि या राजन्ये याग्नीध्रे तां त एतेनावयजे स्वाहेति। तमत्रैव प्राश्यापरमादीप्य जानुदघ्ने धारयन्पुरस्तात्प्रत्यङ्मुखस्तिष्ठति। तमध्वर्युः पश्चात्प्राङ्मुखस्तिष्ठन्स्रुवाकृत्याभिजुहोति घर्म या ते पृथिव्याꣳ शुग्या जागते छन्दसि या वैश्ये या सदसि तां त एतेनावयजे स्वाहेति। तमत्रैव प्राश्य विवृत्य द्वाराण्यथ प्रवर्ग्यमादाय पूर्वया द्वारोपनिष्क्रामन्त्यनु नोऽद्यानुमतिरन्विदनुमते त्वमिति द्वाभ्यामथ महावेदिमवक्रम्य प्रस्तोतारमाह प्रस्तोतः साम[1] गायेति। साम्ना प्रस्तोतान्ववैति[2]। त्रिर्निधनमुपैति। पुरुषःपुरुषो निधनमुपैतीति ब्राह्मणमथाभिक्रामन्ति ॥ १३ ॥

दिवस्त्वा परस्पाया अन्तरिक्षस्य तनुवः पाहि पृथिव्यास्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यस इति। विषुवति द्वितीयं निधनमुपयन्त्यथाभिक्रामन्ति ब्रह्मणस्त्वा परस्पायाः क्षत्रस्य तनुवः पाहि विशस्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यस इत्युपरवकाले तृतीयं निधनमुपयन्त्यथाभिक्रामन्ति प्राणस्य त्वा परस्पायै चक्षुषस्तनुवः पाहि श्रोत्रस्य त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यस इत्यथोत्तरेणोत्तरवेदिमुपरमन्ति। स यो बलवाꣳस्तमाहानेनोदकुम्भेन संततया धारया त्रिः प्रदक्षिणं परिषिञ्चन्परीहीति। स तथा करोति। परिषिच्यमाने यजमानं वाचयति वग्नुरसि शंयुधायाः

---

[1] Thus TB Keś., Prayoga, Padārthanirv; सामानि IFHJP.

[2] T ins. साम वैरखो।

ग्निर्जनधायाः शं च वक्षि परि च वक्षीति निधाय कुम्भं यथेतं त्रिः पुनः प्रतिपर्येत्यथोत्तरनाभिमभिमृशति चतुःस्रक्तिर्नाभिर्ऋतस्य सदो विश्वायुः शर्म सप्रथा अप द्वेषो अप ह्वरो ऽन्यव्रतस्य सश्चिमेत्यथैतौ खरावुत्तरेणोत्तरनाभिमवकिरति[1] तं[2] धृष्टीभ्यां प्राग्दीर्घं खरं करोति तस्मिन्सुवर्णꣳ ५
हिरण्यं निधाय कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणात्यथैनꣳ[3] रौहिणपिष्टैरनुप्रकीर्य मुञ्जप्रलवैरनुविग्राह्य सिकताभिरनुप्रकिरत्यथाध्वर्युः प्रचरणीयं महावीरꣳ शफाभ्यां परिगृह्य दध्ना मधुमिश्रेण पूरयति घर्मैतत्ते ऽन्नमेतत्पुरीषं
तेन वर्धस्व चा च प्यायस्व वर्धिषीमहि च वयमा च प्यासिषी- १०
महीत्यथैनमभिपूरयति महीनां पयो ऽसि विहितं देवत्रा ज्योतिर्भा असि वनस्पतीनामोषधीनाꣳ रसो वाजिनं त्वा वाजिनो ऽवनयाम इत्यथैनं पूर्वार्धे खरस्य सादयत्यूर्ध्वं नभः सुवर्गमिति ॥ १४ ॥

अथैतावुपशयौ महावीरौ वेदाभ्यां परिगृह्य दध्ना मधु- १५
मिश्रेण पूरयित्वाग्रेण प्रचरणीयं महावीरꣳ सꣳस्पृष्टौ सादयत्यथैतां प्रचरणीं दध्ना मधुमिश्रेण पूरयित्वोपरिष्टान्महावीरेषु प्रतीचीनबिलाꣳ सादयत्यथैतौ रुक्मौ दध्ना मधुमिश्रेण समज्याभितः प्रचरणीयं महावीरꣳ सꣳस्पृष्टौ सादयत्यथैते पिन्वने

---

[1] Thus IFHP Keś., Prayoga, Padārthanirv.; प्रतिकिरति BJT.

[2] तं BPI Keś.; तद् J; त T; F om.

[3] आस्तृणाति instead of उपस्तृ॰ IPH.

दध्ना मधुमिश्रेण पूरयित्वाभितः प्रचरणीयं महावीरं प्रतीचीनबिले सꣳस्पृष्टे सादयत्यथैतं मौञ्जं वेदं विस्रस्य दध्ना मधुमिश्रेण समज्यापेण महावीरान्प्रतीचीनाग्रꣳ[1] सꣳस्पृष्टं विस्तृणात्यथैतौ शफौ दध्ना मधुमिश्रेण समज्य जघनेन प्रचरणीयं महावीरं तिरश्चीनाग्रौ व्यतिषक्तौ सꣳस्पृष्टौ सादयत्यथैते रौहिणहवनी दध्ना मधुमिश्रेण समज्य शफाग्राभ्यां प्रतीचीनाग्रे सꣳस्पृष्टे सादयत्यथैता दशौदुम्बरीः समिधो दध्ना मधुमिश्रेण समज्य जघनेन रौहिणहवनी प्रतीचीनाग्राः सꣳस्पृष्टा विस्तृणात्यथैतं कुशमयं वेदं विस्रस्य दध्ना मधुमिश्रेण समज्य जघनेन प्रचरणीयं महावीरं प्रतीचीनाग्रꣳ सꣳस्पृष्टं विस्तृणात्यथैते स्थूणे दध्ना मधुमिश्रेण समज्य जघनेन शफौ प्रतीचीनाग्रे सꣳस्पृष्टे सादयत्यथैतदुपयमनं दध्ना मधुमिश्रेण पूरयित्वोपरिष्टात्स्थूणयोः प्रतीचीनबिलꣳ सादयत्यथैतद्रज्जुद्रव्यं[2] विस्रस्य दध्ना मधुमिश्रेण समज्याचैवोपयमने [3]समवशामयत्यथैतान्कार्ष्मर्यमयान्परिधीन्सविचदण्डानिति विस्रस्य दध्ना मधुमिश्रेण समज्योपरिष्टादुपयमनं तिरश्चीनाग्रान्व्यतिषक्तान् सꣳस्पृष्टान्विस्तृणात्यथैतामभ्रिं दध्ना मधुमिश्रेण समज्य जघनेन स्थूणे तिरश्चीनाग्राꣳ सꣳस्पृष्टाꣳ सादयत्यथैते धृष्टी दध्ना

---

[1] महावीरान् BTJP Bh. Keś.; ॰वीरं IFH; प्राचीनाग्रं PFJT Keś.; प्राचीनाग्रान् B; प्रतीचीनाग्रं WIH.

[2] Thus TBJ Bh. Keś. (pr. m); रज्जुदाम PHF Keś. (sec. m.)

[3] Thus only H.; समतंवशयत्य॰ I; समवनयत्य॰ the other MSS.; comp. supra p. 282. 10.

मधुमिश्रेण समज्याभ्यग्राभ्यां[1] प्रतीचीनाग्रे सꣳस्पृष्टे सादयत्यथैते धवित्रे दध्ना मधुमिश्रेण समज्य जघनेन धृष्टी सꣳस्पृष्टे सादयत्यथैता दशौदुम्बरीः समिधो दध्ना मधुमिश्रेण समज्य जघनेन धवित्रे प्रतीचीनाग्राः सꣳस्पृष्टा विस्तृणात्यथैतामाज्यस्थालीं दध्ना मधुमिश्रेण पूरयित्वा जघनेनाभ्रिꣳ सꣳस्पृष्टाꣳ सादयत्यथैतद्धवित्रं दध्ना मधुमिश्रेण समज्य तेनाज्यस्थालीमपिदधात्यथैते रौहिणकपाले दध्ना मधुमिश्रेण समज्य जघनेनाज्यस्थालीꣳ सꣳस्पृष्टे सादयत्यथैतꣳ स्रुवं दध्ना मधुमिश्रेण पूरयित्वा जघनेनाज्यस्थालीमन्तरेण रौहिणकपाले प्रतीचीनबिलꣳ सꣳस्पृष्टꣳ सादयत्यथैतं कुशमयं वेदं विस्रस्य दध्ना मधुमिश्रेण समज्य जघनेनाज्यस्थालीं प्रतीचीनाग्रꣳ सꣳस्पृष्टं विस्तृणात्यथैतामासन्दीं विस्रस्य दध्ना मधुमिश्रेण समज्याचैवोत्तरतः सꣳस्पृष्टाꣳ सादयत्यथैतां मृदमतिशिष्टां दध्ना मधुमिश्रेण समज्यान्तरेण सक्थिनी निवपति ॥ १५ ॥

घर्मैतत्ते ऽन्नमेतत्पुरीषं तेन वर्धस्व चा च प्यायस्व वर्धिषीमहि च वयमा च प्यासिषीमहीत्यथैनꣳ सिकताभिरनुप्रकीर्य मुञ्जप्रलवैरनुविशाद्य रौहिणपिष्टैरनुप्रकीर्य कृष्णाजिनेन प्राचीनग्रीवेणोत्तरलोम्ना प्रोर्णोत्यपि वाभितः प्रचरणीयं महावीरं परिचिनोत्यादित्यमण्डलवदथैनमुपतिष्ठते ऽयं यः पुरुषरूपो ऽसि स न आस्से न तिष्ठसि। नोर्ध्वो न तिर्यग्विधां ते ऽनु विहितो ऽस्मि विधां मे ऽनु विहितो ऽसि यस्त्वमसि सो

---

[1] Thus TB Bh.; स्रभियपाभ्यां J Koś.; स्रभिया स्रपाभ्यां PIF.

ऽहमस्मि यो ऽहमस्मि स त्वं नाकमारोह सह यजमानेन नाकमित्यथ गृमुष्टिमादाय दध्ना मधुमिश्रेणावोक्षत्यस्कान्द्यौः पृथिवीमस्कानृषभो युवा गाः। स्कन्नेमा विश्वा भुवना स्कन्नो यज्ञः प्रजनयतु। अस्कानजनि प्राजनि। आ स्कन्नाज्जायते वृषा। स्कन्नात्प्रजनिषीमहीत्यथ प्रस्तोतारमाह प्रस्तोतर्वार्षाहरꣳ साम गायेत्यास्तोत्रीयं चेति | स यो बलवाꣳस्तमाहानेनोदकुम्भेन संततया धारया त्रिः प्रदक्षिणं परिषिञ्चन्परीहीति | स तथा करोति | परिषिच्यमाने यजमानं गन्धर्वयजूꣳषि वाचयति रन्तिर्नामासि दिव्यो गन्धर्व इति प्रतिपद्येन्द्रो दक्षं परिजानादहीनमित्यातो | निधाय कुम्भं यथेतं त्रिः पुनः प्रतिपर्येत्यथैनमुपतिष्ठत एतत्त्वं देव घर्म देवो देवानुपागा इदमहं मनुष्यो मनुष्यान्सोमपीथानु मेहि सह प्रजया सह रायस्पोषेणेत्यथाञ्जलिनाप उपहरन्ति सुमित्रा न आप ओषधयः सन्त्विति | तां दिशं निरुक्षति यस्यामस्य दिशि द्वेष्यो भवति दुर्मित्रास्तस्मै भूयासुर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्य ज्योतिष्मत्यादित्यमुपतिष्ठत उद्वयं तमसस्परीत्यथैनमवकाभारेण प्रतिच्छाद्य गोप्तारꣳ समादिशति वयोभ्यो महावीरं गोपाय | प्रस्तोतः श्यैतेनान्वेहीति[1] प्रस्तोतारमाहाथैतेनैव[2] यथेतमेत्य गार्हपत्ये द्वे स्रुवाहुती जुहोत्युद्

---

[1] Thus PIHF Keś., Padārthanirv.; अन्विहीति BJT.

[2] Thus T; some of the MSS. om. आह, others अथ ।

त्वं चित्रमित्यथाहवनीयमुपतिष्ठन्त[1] इममू षु त्यमस्मभ्यꣳ सनिं गायत्रं नवीयाꣳसमग्ने देवेषु प्रवोच इत्यथाग्नीध्रदेशे[2] हुत्वा[3]ग्नीध्रदेश उत्तराꣳ शान्तिमुपयन्ति शं नो वातः पवतां मातरिश्वेति ॥ १६ ॥ चतुर्थः ॥

अथातो घर्मप्रायश्चित्तानि व्याख्यास्यामो ऽथ यदि प्रवर्ग्यमप्रवृत्तमादित्यो[4] ऽभ्यस्तमियाद्गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्युपसदा प्रचर्य श्वो भूते प्रवर्ग्येण प्रचरेदथ यदि प्रवर्ग्यं प्रवृत्तमादित्यो[4] ऽभ्यस्तमियाद्गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्यथापरस्यां द्वारि सूत्रेण हिरण्यं प्रग्रथ्य प्रचरेदथ यदि प्रवृत्तः[4] प्रपतेद्गार्हपत्ये[5] तिस्रः स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्यथैनमुच्छ्रयत्यूर्ध्व ऊ षु ण ऊतय ऊर्ध्वो नः पाह्यꣳहस इति द्वाभ्यामथैनमाज्येन पूरयत्यञ्जन्ति यं प्रथयन्तो न विप्रा इत्यथ यदि विधुर्वा प्रदरो वा जायतेऽश्मचूर्णानि छागपयसि संप्रकीर्य तैः प्रत्युष्योल्मुकेनाभितपति विधुं दद्राणं यद्रते चिदभिश्रिष इति द्वाभ्याꣳ सꣳ हैव रोहति यद्यु वै सर्वश एव भिद्यत एतान्येव कपालान्यवाञ्जनं पिष्ट्वा यैषा मृत्प्रायश्चित्ताय परिशेते तया सꣳसृज्य कृत्वा पक्त्वाच्छृद्य निदधात्यथान्यं प्रचरणीयं महावीरं प्रवृणक्त्यथ यदि प्रमत्ता अतिपरि-

---

[1] ०तिष्ठत PHIT; the other MSS., also Keś., have the plural.

[2] Thus FHJI; थाग्नीध्रं TBP.

[3] Thus PJF; कृत्वा B; गत्वा ITH.

[4] Thus all; read ०प्रवृक्त० and प्रवृक्तः (?)

[5] Thus B; प्रपद्येतगार्ह० TBh.; प्रपतेतगा० I; प्रवर्तेतगा० HJ; प्रवर्तत P.

यन्ति गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्यथ पुनरूर्जा सह रय्येति पुनः प्रतिपरियन्त्यथ यद्युद्यतः[1] प्रपतेद्गार्हपत्ये तिस्रः स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्यथैनमभिमृशति मा नो घर्म व्यथितो विव्यथो नो मा नः क्रतुभिर्हीडितेभिरस्मानिति द्वाभ्यामथ यदि घर्मदुघं वा महावीरं वा वयो ऽभिप्रस्रावयेत्तावुष्णोदकेन प्रक्षालयेदुप नो मित्रावरुणाविहावतमित्यथ गार्हपत्ये नव स्रुवाहुतीर्जुहुयादिमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयास्युद्वयं तमसस्पर्युदु त्यं चित्रं वयः सुपर्णा इत्यथ यदि घर्मदुघं न विन्देतान्यां दोहयेदथ यद्यन्यां न विन्देताजां दोहयेदथ यद्यजां न विन्देतार्कचीरैः प्रचरेदथ यद्यर्कचीरं न विन्देत यवपिष्टानि व्रीहिपिष्टानि श्यामाकपिष्टानि वाद्भिः संसृज्य तैः प्रचरेदथाद्भिः प्रचरेन्न त्वेव न प्रचरेन्माहीनां पयो ऽसीत्युक्तं महावीरे ऽवनयनमस्कान्द्यौः पृथिवीमिति स्कन्नानुमन्त्रणमथ यदि विद्युदापतेद्गार्हपत्ये स्रुवाहुतिं[2] जुहुयाद्या पुरस्ताद्विद्युदापतदित्येतैर्यथारूपं प्राणाय स्वाहा पूष्णे स्वाहेत्युक्तानि घर्मप्रायश्चित्तानि यत्किंचिद्घर्मकार्यविपर्यासे चैता[3] आहुतीर्जुहुयान्नमस्ते घर्म भूपतये स्वाहा नमस्ते घर्म भुवन-

---

[1] Thus T Bh; उद्यतः प्रवतेत् J; उद्यतः प्रयवे I; उदातः प्रपद्येद् B; उद्यतः प्रपत्येत H; अथ यद्यतः पप्रहत P.

[2] Thus only T; the other MSS. स्रुवाहुतीर्जु॰।

[3] B ins. वा।

पतये स्वाहा नमस्ते घर्म भूतानां पतये स्वाहा घर्माय स्वाहाश्विभ्याꣳ स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा प्रजापतये स्वाहा ब्रह्मणे स्वाहेत्यथाषाढां व्यालिखितामुत्तरलक्ष्माणमुपधायाथ घर्मेष्टकां कुलायिनीं चोपदधात्युदस्य शुष्माद्भानुरिति घर्मेष्टकां। यास्ते अग्न आर्द्रा योनयो या इति कुलायिनीꣳ। ५ संचितमग्निꣳ सामभिरुपस्थायोक्थ्येनानुशंसमुत्तरे¹ श्रोण्यन्ते तिष्ठन्नग्निमभिमृशत्यग्निरसि वैश्वानरोऽसीत्येतेनानुवाकेनाथाध्वर्यवे ऽग्निदक्षिणां² ददाति शतꣳ सहस्रमन्विष्टकं वा ॥१७॥

³प्रवर्ग्यवति सोमे दधिघर्मं भक्षयन्ति भूर्भुवः सुवर्मयि त्यदिन्द्रियं महदित्येतेनानुवाकेनाथ घोरास्तनूरनुदिशति। यास्ते १० अग्ने घोरास्तनुव स्नौकुच स्नौहीतिश्च स्नौहितिश्चेति⁴ घोरास्तनुवो। धुनिश्च ध्वान्तश्चेति राजसूयिको गण। उग्रश्च धुनिश्चेत्याग्निचित्यो। ऽथ यदि घर्मदुघं वा महावीरं वा स्तेनो ऽपहरेद्गार्हपत्ये स्रुवाहुतिं जुहुयादहोरात्रे त्वोदीरयतामिति। खडिति वाचः क्रूराणीत्यथ यद्येकसृको वाश्येत तमनुमन्त्रयते १५ वि गा इन्द्र विचरन्स्पाशयस्वेत्यथास्मा उभयतआदीप्तमुल्मुकं क्षिपेदग्ने⁵ अग्निना संवदस्व मृत्यो मृत्युना संवदस्वेत्यथैनमुप-

---

[1] Thus HJP; उक्थ्येना उपस्थमुत्तरे I; उक्थ्येनानुशꣳसतितदुत्तरे B; उक्थ्येनानुशंसमुत्तरेण T.

[2] ग्निदक्षिणा T; दक्षिणां B; ग्निंदक्षिणां J; ग्निर्दक्षिणां IPH.

[3] This chapter is given by TB only

[4] स्नौहितिश्च om. T.

[5] निक्षिपेद॰ B; क्षिपेत॰ T.

तिष्ठते सक्त्ते अग्ने नमो दिवे नमस्त्विषे नम इत्यथ यदि गर्दभो वाश्येत तमनुमन्त्रयते ऽसृङ्मुखो रुधिरेणाव्यक्त इत्यथ यद्यार्ता वागुदियात्तामनुमन्त्रयते यदेतद्वृकसो भवतीत्यथ यदि भयेडकः काकपिञ्जको[1] वाश्येत तमनुमन्त्रयते यदीषितो यदि वा स्वकामीत्यथ यदि मालाहकी वाश्येत तामनुमन्त्रयते दीर्घमुखि दुर्हणित्यथ यद्युलूकोलूकी वाश्येत तमनुमन्त्रयत[2] इत्यादुलूक आपप्तदित्यथ यद्युन्मत्ता वागुदियात्तामनुमन्त्रयते यदेतद्भूतान्यन्वाविश्येत्यथ यदि घर्मदुघं वा महावीरं वा श्वा ऽभिप्रपतेत्तमनुमन्त्रयते प्रसार्य सक्थ्यौ पतसीत्यथ यदि घर्मदुघं वा महावीरं वा क्रिमय उपाधिगच्छेयुस्तानद्भिः प्रक्षाल्यदक्षिणा त्वा क्रिमे हन्मीत्यथ यदि प्रवृत्त[3] प्रवर्ग्यं श्वाश्वो ऽभिप्रपद्येत गार्हपत्ये स्रुवाहुतिं जुहुयादाहरावद्येत्यथैनमनुव्याहरिष्यन्भवति । तमनुव्याहरेद्ब्रह्मणा त्वा शपामीत्यथ यं द्वेष्टि तस्य दक्षिणं दार्वाङ्गमनुप्रचालयेदुत्तुद शिमिजावरीति । स यो ऽन्य[4] एतेभ्यो वाश्येत तस्मा उभयतश्चादीप्तमुल्मुकं क्षिपेदुत्तुद शिमिजावरीत्यथ यद्युद्धून्वन्निव वातो वायात्तमनुमन्त्रयते[5] भूर्भुवः सुवो भूर्भुवः सुवो भूर्भुवः सुवो भुवो ऽधायि भुवो

---

[1] Thus Bh; काकपिञ्जकी T; कपिंजलो B.

[2] तमनु॰ B; तमामनु॰ T; probably तामनु॰ is to be corrected.

[3] T om; read प्रवृत्तं (?)

[4] न्यश T; न्य B.

[5] Uncertain. यद्युद्धन्यन्नवपातोवायाततमनु॰ T (grantha!); यद्यतंन्निवपतोवाधातमनु॰ B; Bh. comments: उद्धुन्वन्निव ऊर्ध्वं कम्पयन्निव महावात इत्यर्थः।

ऽधायि भुवो ऽधायीत्यथ यद्यवृतः[1] शालां[1] प्रपद्येताभिर्गीर्भिर्यदतो न ऊनमित्येतया प्रपद्येत । यद्यु वै प्रवृत[2] एतयैव । ॥ १८ ॥ पञ्चमः ॥

[3]अथातो ऽवान्तरदीक्षां व्याख्यास्याम । उदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे केशश्मश्रु वापयित्वा पूर्ववदुपाकृत्य ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य खिले ऽच्छदिर्दर्शे ऽग्निमुपसमाधाय संपरिस्तीर्य मदन्तीरधिश्रित्य प्रथमेनानुवाकेन शान्तिं कृत्वा दर्भैः प्रवर्ग्यदेवताभ्य आसनानि कल्पयत्यग्रेणाग्निं प्रवर्ग्याय कल्पयामि घर्माय कल्पयामि महावीराय कल्पयामि सम्राज्ञे कल्पयामीति । दक्षिणेनाग्निं ब्रह्मणे कल्पयामि प्रजापतये कल्पयामीत्युत्तरेणाग्निमृषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यः कल्पयामि देवेभ्यो घर्मपेभ्यः कल्पयामीत्यथ दक्षिणतः प्राचीनावीती पितृभ्यो घर्मपेभ्यः कल्पयामि यमायाङ्गिरस्वते पितृमते कल्पयामीत्यथाप उपस्पृश्योत्तरतो यज्ञोपवीती रुद्राय रुद्रहोत्रे कल्पयामीत्यथाप उपस्पृश्य सर्वाभ्यः

---

[1] Thus T; यद्यवृत्तः शाला B.

[2] प्रवृत्त MSS.

[3] The following adhyāya, containing the avāntaradikṣā, is preserved only in T, E and Ta; the last MS. is a copy of the gṛhyasūtra MS. No. 9316 of the Tanjore Collection, in Grantha; E is a copy of the gṛhyasūtra (Report on a Search for Sanskrit and Tamil MSS. 1893-94, No. 2, 66). As the tradition of this adhyāya is rather a bad one, I had to amend several passages, according to Āpastamba, Hiraṇyakeśin, Bhāradvāja and a Baudhāyanagṛhyaprayoga.

प्रवर्ग्यदेवताभ्यः कल्पयामीति । प्रदक्षिणमग्निं परिषिच्य व्याहृतीभिर्वैकङ्कतीः समिधो ऽभ्याधाय मदन्तीभिः प्रवर्ग्यदेवतास्तर्पयत्यग्रेणाग्निं प्रवर्ग्यं तर्पयामि घर्मं तर्पयामि महावीरं तर्पयामि सम्राजं तर्पयामीति । दक्षिणेनाग्निं ब्रह्माणं तर्पयामि प्रजापतिं तर्पयामीत्युत्तरेणाग्निमृषीन्मन्त्रकृतो मन्त्रपतीꣳस्तर्पयामि देवान्घर्मपाꣳस्तर्पयामीत्यथ दक्षिणतः प्राचीनावीती पितॄन्घर्मपाꣳस्तर्पयामि यममङ्गिरस्वन्तं पितृमन्तं तर्पयामीत्यथाप उपस्पृश्योत्तरतो यज्ञोपवीती रुद्रꣳ रुद्रहोतारं तर्पयामीत्यथाप उपस्पृश्य सर्वाः प्रवर्ग्यदेवतास्तर्पयामीति । चतस्र औदुम्बरीः समिधो ऽप्रतिशुष्काग्रा घृताक्ता अभ्याधापयन्वाचयति पृथिवी समिदित्येतैः प्रतिमन्त्रमथ देवता उपतिष्ठते ऽग्ने व्रतपते शुक्रियं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते शुक्रियं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामित्यथैतेषामनुवाकानां प्रभृतीर्वाचयति प्रथमोत्तमयोर्वाथैनꣳ सꣳशास्ति संमील्य वाचं यच्छेत्यथास्याहतेन वाससा त्रिः प्रदक्षिणꣳ संमुखꣳ[1] शिरो वेष्टयति चित स्थ परिचितः स्वाहा मरुद्भिः परिश्रयस्वेति । प्रदक्षिणमग्निं परिषिच्य व्याहृतीभिर्वैकङ्कतीः समिधो ऽभ्याधाय मदन्तीभिः प्रवर्ग्यदेवतास्तर्पयित्वोत्तमेनानुवाकेन शान्तिं कृत्वाथास्तमित आदित्ये ग्राममायन्ति । वाग्यतस्तिष्ठेदेताꣳ रात्रिमुपविशेत्संविशेद्वाथ प्रातरुदित आदित्ये ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य

---

[1] Emended; समुखं the MSS.

खिले ऽच्छदिर्दर्शे ऽग्निमुपसमाधाय संपरिस्तीर्य मदन्तीरधिश्रित्य प्रथमेनानुवाकेन शान्तिं कृत्वा दर्भैः प्रवर्ग्यदेवताभ्य आसनानि कल्पयित्वा वयः सुपर्णा इति वासो विमुच्या।थास्य षट्तयमभिविदर्शयत्यग्निमप आदित्यं गां ब्राह्मणꣳ हिरण्यमिति । चीनादितो ऽनुदर्शयित्वा यथोपपादमितराणि दर्शयित्वा प्रदक्षिणमग्निं परिषिच्य व्याहृतीभिर्वैकङ्कतीः समिधो ऽभ्याधाय मदन्तीभिः प्रवर्ग्यदेवतास्तर्पयित्वोत्तमेनानुवाकेन शान्तिं कृत्वा।थास्य व्रतचर्यामुपदिशे।न्न यानमारो।हेन्न[1] वृक्षमधिरोहे।न्न कूपमवरो।हेन्न छत्त्रं धारयीत । नोपानहौ धारयीत । नासन्द्याꣳ[2] शयीत । न स्त्रिया न शूद्रेण[3] संभाषेत । यदि संभाषेत ब्राह्मणेन[3] संभाषेत । न सायं भुञ्जीत । यदि सायं भुञ्जीतावज्वलितं[4] भुञ्जीत । न स्नायादष्टम्यां[5] पर्वणि[5] चोपवसे।त्तदहस्स्नायाद्।वाग्यतस्तिष्ठेदेताꣳ रात्रिमुपविशेत्संविशेद्वा।मेध्यलोहितशवापपात्रदर्शने[6] ज्योतिषां संदर्श।नममेध्यं दृष्ट्वा जपत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाꣳ श्रेष्ठो दीक्षे मा मा हासीरि।त्यथ यद्येनमभिवर्षत्युन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेति जपति । ॥ १९ ॥

---

[1] Thus TE ; यानमधिरोहे॰ Ta.

[2] Emended ; नसंद्यां T ; नसंध्यां E Ta.

[3] Ta ins. सह ; E the second time.

[4] Thus E ; प्रज्वलितं T ; Ta om. the whole passage.

[5] Thus E ; चाष्टम्यां पर्वणी Ta ; चाष्टम्याः पर्वणि T.

[6] Thus E ; मेध्यांलोहितशवासवपात्र॰ Ta ; ॰मेध्यलोहितशवापान॰ T.

[1]संवत्सरमेतद्व्रतं चरेत्संवत्सरꣳ हि व्रतं नातीत्यैतस्मिꣳस्त्वेवैतत्संवत्सरे ऽधीयीत । यद्यु वा एतस्मिन्संवत्सरे नाधीयीत यावदध्ययनमेतद्व्रतं चरेदथ संवत्सरे पर्यवेते ऽध्यापयते श्रावयते वा । पूर्ववदुपाकृत्य ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य खिले ऽच्छदिर्दर्शे ऽग्निमुपसमाधाय संपरिस्तीर्य मदन्तीरधिश्रित्य प्रथमेनानुवाकेन शान्तिं कृत्वा दर्भैः प्रवर्ग्यदेवताभ्य आसनानि कल्पयित्वाथाव्रत्यप्रायश्चित्ते जुहोति यन्म आत्मनो मिन्दाभूत्पुनरग्निश्चक्षुरदादिति द्वाभ्यां । [2]प्रदक्षिणमग्निं परिषिच्य व्याहृतीभिर्वैकङ्कतीः समिधो ऽभ्याधाय मदन्तीभि प्रवर्ग्यदेवतास्तर्पयित्वा[2] । चतस्र औदुम्बरीः समिधो ऽप्रतिशुष्काग्रा घृताक्ता अभ्याधापयन्वाचयति द्यौः समिदित्येतैः प्रतिमन्त्रमथ देवता उपतिष्ठत आदित्य व्रतपते शुक्रियं व्रतमचारिषं तदशकं तन्मे ऽराधि वायो व्रतपते ऽग्ने व्रतपते व्रतानां व्रतपते शुक्रियं व्रतमचारिषं तदशकं तन्मे ऽराधीति । प्रदक्षिणमग्निं परिषिच्य व्याहृतीभिर्वैकङ्कतीः समिधो ऽभ्याधाय मदन्तीभिः प्रवर्ग्यदेवतास्तर्पयित्वोत्तमेनानुवाकेन शान्तिं कृत्वा । तस्यानध्यायानुपदिशेन्नाधीयीतास्तमित[3] आदित्ये । नानुदिते ।

---

[1] The beginning of this khaṇḍa has been emended and restituted after the collateral passages in the gṛhyasūtra.

[2] The passage प्रद॰ तर्पयित्वा om. T.

[3] Uncertain ; तस्याध्ययेनध्यायानु॰ Ta ; तस्याध्यायनु॰ T ; अथास्याध्यायेन स्वस्वाध्यायानु॰ E.

न विप्रोषितो[1] । न पर्यावृत्ते । नाभ्रच्छायायां[2] । न ग्राम्यस्य पशोरन्ते । नारण्यस्य । नापामन्ते । न हरितयवान्प्रेक्षमाणो[3] । न हर्म्याणि । न शरीराणि । न लोहितमुत्पतितं दृष्ट्वा । न माꣳसमशित्वा । न श्राद्धं भुक्त्वा । न केशश्मश्रु वापयित्वा । न केशान्प्रसार्य[4] । न दतो धावते । नाक्ते । नाभ्यक्ते । नार्द्रे । नार्द्रेण वाससा । नार्द्र[5] इत्यथ स्वाध्यायमधीयीतापरेणाग्निं दर्भेष्वासीनो दर्भान्धारयमाणः पराचीनꣳ स्वाध्यायमधीयीत । [6]यत्र क्वचाशान्तिकृतं पश्येत्पुनरेव शान्तिं कृत्वाधीयीताधीत्य प्रोत्तमेन[7] । प्रवर्ग्यायोपनिष्क्रम्य[8] नाप्रविश्य ग्राममन्यदधीयीतान्यदधीयीत । ॥ २० ॥ षष्ठः ॥

॥ इति नवमः प्रश्नः ॥

New Delhi ARCHAEO

---

[1] Thus E; विप्रोषिते Ta; विप्रुषिते T.

[2] Thus E Ta; नाभ्रे न छायायां T.

[3] Thus E; प्रोक्षमाणे Ta; प्रेक्षते T.

[4] Thus E T. (comp. Hir. प्रविध्य); प्रसाध्य Ta.

[5] Conjectur[illegible] नार्द्रमित्य॰ T; नार्द्रयामित्य॰ Ta; नाव्रणमनार्द्रयाग्निमित्य॰ E.; probably आर्द्रे is to be taken as a locative, sc. देशे, comp. Āpastamba xv. 21.8.

[6] E ins.: यदि लौकिकमनुव्याहरेत् शान्तिं कृत्वास्ते ।

[7] T Ta om. अधीत्य; अधोत्तमेन Ta.

[8] Thus E Ta; प्रवर्ग्यायैवोपनिष्क्रम्य T.

CORRIGENDA.

p. 1 l. 14 r. वक्रौरिति

p. 27 l. 2 r. द्वितीयमवदा०

p. 101 n. 8 r. ait Br.

p. 112 l. 19 r. प्रोष्यौ०

p. 126 l. 18 r. बर्हिर्वप०

p. 130 n. ९ r. प्रष० i.s.o. प्रषं

INDEX.

Preface ... ... Page VII.

Darśapūrṇamāsau ... ... Praśna I.

Agnyādheyam ... ... „ II.
  upavyāharaṇam ... ... „ „ 1 } adhy. 1.
  devayajanayācanam ... ... „ „ 2 }
  ṛtvijāṃ varaṇam .. ... „ „ 3, 4 } adhy. 2.
  vinidhayaḥ ... ... „ „ 5 }
  agnyādheyakarmāntam ... „ „ 6, 7 adhy. 3.
  upavasathagavī ... ... „ „ 8-11 adhy. 4.
  agnyādheyam ... ... „ „ 12-20 } adhy. 5, 6.
  anvārambhaṇīyeṣṭiḥ ... ... „ „ 21 }

Daśādhyāyikaḥ ... ... „ III.
  punarādheyam ... ... „ „ 1-3 (adhy. 1).
  agnihotram ... ... „ „ 4-7 („ 2).
  agnyupasthānam ... ... „ „ 8-9 („ 3).
  piṇḍapitṛyajñaḥ ... ... „ „ 10-11 („ 4).
  āgrayaṇam ... ... „ „ 12 („ 5).
  agnibhyaḥ pravāsaḥ ... ... „ „ 13-14 („ 6).
  yājamānam ... ... „ „ 15-22 („ 7, 8).
  brahmatvam ... ... „ „ 23-26 („ 9).
  hautram ... ... „ „ 27-31 („ 10).

Paśubandhaḥ ... . „ IV.

Cāturmāsyāni ... ... „ V.
  vaiśvadevahavīṃṣi ... ... „ „ 1-4 (adhy. 1).
  varuṇapraghāsahavīṃṣi ... „ „ 5-9 („ 2).
  sākamedhahavīṃṣi ... ... „ „ 10 („ 3).
    mahāpitṛyajñaḥ ... ... „ „ 11-15 („ 4).
    traiyambakahomaḥ ... „ „ 16-17 („ 5).
  śunāsīrīyahavīṃṣi ... ... „ „ 18 („ 6).

Agniṣṭomaḥ ... ... „ VI, VII, VIII.
  prātaḥsavanam ... ... „ VI, VII.
  mādhyandinaṃ savanam ... „ VIII. 1-8 (adhy. 1, 2).
  tṛtīyasavanam... ... ... „ VIII. 9-15 („ 3, 4).
  yajñapucchaḥ ... ... „ VIII. 15-22 („ 5, 6).

Pravargyaḥ ... ... „ IX. 1-16 („ 1-4).
  pravargyaprāyaścittāni ... „ „ 16-18 („ 5).
  avāntaradikṣā ... ... „ „ 19-20 („ 6).



Central Archaeological Library,
NEW DELHI. 14446

Call No. 892Vs1/Bau/Cal

Author—Caland W. ed.

Title—Baudhayana Srauta Sutra. Vol. I

Borrower No.	Date of Issue	Date of Return
G.R. Kansal	3/8/81	21-10-81

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the
clean and moving.

S. B., 148. N. DELHI.